शरीरादिव्यतिरिक्त आत्मा। छांदोग्यश्रुतेश्च 'एवमेवैष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतीरूपं संपद्य स्वेन रूपेणाभिनिष्पद्यते' इति। क एषामुच्चारयितेति पृष्टे तस्योत्तरं दत्तमात्मेति। कथमुच्चारयति केन क्रमेणोच्चारयतीतिप्रश्नद्वयस्योत्तरं दीयते। स आत्मा बुद्ध्या सहार्थान्बाह्यान्समर्थ्य सम्यगवगम्यार्थप्रत्यायनाय यदि शब्दा उच्चार्यन्ते तदा मनो युंक्ते। वक्तुमिच्छया तच्च मनो नियुंक्ते आत्मा। मनः कायाग्निमाहन्तीति।तच्च मनो नियुक्तं सत्कायाग्निं शरीराग्निमाभिमुख्येन हन्ति तेनातिसंघर्षं प्राप्नोति सोऽग्निरभिहतः सन्मारुतं वायुं प्रयुंक्ते प्रेरयति। मारुतो वायुरुरसि वक्षसि चरन्मंद्रं गंभीरं स्वरमुत्पादयति'मंद्रस्तु गंभीरे' इत्यमरः। प्रातःसवनेन सह योगोऽस्येति प्रातस्सवनयोगस्तम्। तथा च सुयज्ञः 'मंद्रया वाचा प्रातःसवनम्' इति। गायत्रं छन्दोऽस्याश्रयः॥ एतेन गायत्रीछंदोपि तत एव जातमिति ध्वनितम्। कंठ इति। अत्र मारुतः सवनं छंदस्स्वरं चरन्नित्यनुवर्त्तते। कंठे चरन् वायुर्मध्यमं स्वरं जनयति मध्यंदिनं युनक्तीति माध्यंदिनं सवनभाजं त्रिष्टुप्छंदोनुगामिनम्। तारमिति। तृतीयसवनभाजं तारं स्वरं मूर्ध्नि चरन्वायुर्जनयति जागतं छंदोनुगच्छतीति जागतानुगस्तम्। शीर्षं छंदसीति। शिरःशब्दस्य शीर्षादेशस्तत्र भवं शीर्षण्यम्। स वायुरुदीर्ण ऊर्द्ध्वगतो मूर्द्धानं यावदुपारितनां गतिमलभमानः शिरःकपालेनावष्टब्धत्वात्पुनः प्रत्यावृत्य वक्त्रमेवापद्य वर्णान् जनयत्युत्पादयति। पुनर्मारुतग्रहणं स्पष्टार्थम्। तेषां वर्णानां जन्यमानानां विभागो विवेकः पञ्चधा पंचप्रकारः स्मृतः। कैर्हेतुभिः पञ्चधा तत्राह। स्वरत इत्यादि। स्वरस्था-

निबोधत शृणुत । अत्र किञ्चिदुच्यते बालव्युत्पत्त्यर्थम् ।
सर्वमेवैतदनुपपन्नम् । कथम् । आत्मा बुद्ध्या सहार्थान्समर्थ्य
युंक्ते इति व्याख्यातम् । आत्मनश्च विनियोजकभावो नोप
अकर्तृत्वात्तस्य । तथा च श्रुतिः ' असंगो ह्ययं पुरुषः '
'अस्थूलमनण्वह्रस्वम्' इत्यादिका च । भगवता चैवमात्मन
व्याख्यातम् । आत्मनश्च नियोजकभावे शरीरेंद्रियमनोबुद्धि
तिरिक्त इति शरीरादिव्यतिरिक्त आत्मा मनो युंक्ते इत्ये
पपन्नम् । उच्यते । अयमात्मा समर्थ्यार्थान्मनो युंक्ते इत्येत
त्रज्ञाभिप्रायं क्षेत्रज्ञस्यैतदेव स्वरूपं यन्नियोजकत्वम् । तथा च
'योऽस्यात्मनः कारयिता तं क्षेत्रज्ञं प्रचक्षते ॥ यः करोतीति
णि स भूतात्मेत्युच्यते बुधैः ॥ जीवसंज्ञोन्तरात्मान्यः स
सर्वदेहिनाम् । येन वेदयते सर्वं सुखं दुःखं च कर्मसु ॥ तावुभौ
तसंपृक्तौ महाक्षेत्रज्ञ एव च ॥ उच्चावचेषु भूतेषु स्थितं संव्या
तिष्ठति ॥ ' इति संव्याप्येति परमात्मानमाहुः । तथा च व्या
'द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ॥ क्षरः सर्वाणि भूतानि
टस्थोक्षर उच्यते ॥ उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृ
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ' ॥ ननु यद्यात्मा
द्ध्या समर्थ्यार्थानित्युदाहृतो यो नित्यःक्षेत्रज्ञ एवात्रात्माभि
भवेत्ततः क्षेत्रज्ञ एवात्मशब्दस्य चरितार्थत्वात् शरीरेंद्रि
नोबुद्धिव्यतिरिक्तत्वं कतरस्माच्छब्दात्त्वया वर्णितं किमर्थं
उच्यते । आत्मा बुद्ध्येत्यत्र द्वावप्यात्मानौ तौ क्षेत्रज्ञपरमात्मा
धेयरूपावभिप्रेतौ तंत्रेणोच्चारितौ। तंत्रेणोच्चारणं सूत्राणामलंका
एवं चेत्किमर्थं परमात्मनो [illegible] यदुक्तं तत्रोच्यते ।

दिभिरैक्यं भवति किं तदपवर्गसाधनं यस्य शिक्षोपकारे वर्त्तते
उच्यते । वेदाश्च यज्ञाश्च । तथा च श्रुतिः । 'तमेतं वेदानुवच
नेन विविदिषंति ब्रह्मचर्येण तपसा श्रद्धया यज्ञेनानाशके
च' इति । वेदानुवचनं यज्ञगतमंत्रांगत्वात्सम्यग्वर्णोच्चारणेन य
स्मान्मोक्षमवाप्नोति । वक्ष्यति च 'सुखमतुलं च' अतुलं सुखं मो
एव भवति । 'स्वरतः कालतः स्थानात्प्रयत्नानुप्रदानतः । इ
वर्णविदः प्राहुर्निर्णयं तं निबोधत ॥ उदात्तश्चानुदात्तश्च स्वरित
श्च स्वरास्त्रयः ।' इति। अलमतिप्रसंगेन प्रकृतमनुसरामः । उदात्त
श्चेति । स्वरतः कालत इत्येतौ द्वौ हेतू श्लोके विवृणोति । स्व
उदात्तादिः कालो मात्राप्रभृतित्रिमात्रपर्यंतः।उदात्त इत्युपरिष्टात्पा
गृहीतः।अनुदात्तस्तद्विपरीतः।अधस्ताद्गृहीतइत्यर्थः।स्वरितइति
स्वरांतरं स्वरतीतिस्वरितः।आक्षेपनिष्पाद्यो य उदात्तानुदात्तविक
रः।तथा च नारदः । 'उच्चादुच्चतरं नास्ति नीचान्नीचतरं तथा ।
स्वर्ये स्वरसंज्ञायां किं स्थानं स्वर उच्यते ॥ उच्चनीचस्थयोर्मध
साधारण इति श्रुतिः । तं स्वरं स्वरसंज्ञायां प्रतिजानंति
क्षिकाः ॥' स्वरास्त्रय इति । त्रय एव ऋग्यजुर्विषयाः । पञ्च स
च सामसु । ह्रस्व एकमात्रो दीर्घो द्विमात्रः प्लुतस्त्रिमात्रः । 'नि
षकाला मात्रा स्यात्'इत्यौदव्रजिः। तथा च नारदः । 'निमेषकाल
मात्रा स्याद्विद्युत्कालेति चापरा' इतिशब्दः प्रकारार्थः । अने
प्रकारेण कालतो हेतोः स्वरतश्च विषयविभागनियमः । तथा
नारदः ।'स्वर उच्चः स्वरो नीचः स्वरः स्वारित एव च। व्यंजनान्यनु
वर्त्तंते यत्र तिष्ठति स स्वरः'इति। 'ह्रस्वो दीर्घः प्लुत इति काल
नियमा अचि '॥११॥ व्याख्यातमेतत् ।'उदात्ते निषादगांधारावनु

श्च नासिकोष्ठौ च तालु च ॥ १३ ॥ ओभावश्चविवृत्तिश्च शषसा रेफ एव च। जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः ॥ १४ ॥ यद्योभावप्रसन्धानमुकारादि परं पदम्। स्वरान्तं तादृशं विद्याद्यदन्यद्व्यक्तमूष्मणः ॥१५॥ हकारं पञ्चमैर्युक्तमंतस्थाभिश्च संयुतम्। औरस्यं तं विजानीयात्कण्ठ्यमाहुरसंयुतम् ॥ १६ ॥ स्पष्टार्थाः ॥ 'कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू। स्युर्मूर्द्धन्या ऋटुरषा दन्त्या लृतुलसाः स्मृताः॥ १७॥ जिह्वामूले तु कुः प्रोक्तो दन्त्योष्ठ्यो वः स्मृतो बुधैः। ए ऐ तु कण्ठ्यतालव्या ओऔ कण्ठोष्ठजौ स्मृतौ ॥ १८ ॥ अर्द्धमात्रा तु कण्ठ्यस्य ऐकारौकारयोर्भवेत्। ओकारौकारयोर्मात्रा तयोर्विवृतसंवृतम् ॥ १९ ॥ संवृतं मात्रिकं ज्ञेयं विवृतं तु द्विमात्रिकम्। घोषा वा संवृताः सर्वे अघोषा विवृताः स्मृताः॥२०॥ स्वराणामूष्मणां चैव विवृतं करणं स्मृतम्। तेभ्योऽपि विवृतावेङौ ताभ्यामैचौ तथैव च ॥ अनुस्वारयमानां च नासिका स्थानमुच्यते। अयोगवाहा विज्ञेया आश्रयस्थानभागिनः ॥ २२ ॥ स्थानत इति यदुक्तं तदाह। कण्ठ्याविति। स्थानं कंठादि। अहावकारहकारौ।कण्ठ्यौ कण्ठतो जातौ।इचुविति।इकारश्च चवर्गश्च यकारशकारौ च एते तालव्यास्तालुतो जाताः। चु इत्युकारानुबंधो वर्गं ज्ञापयति वर्गादावन्यत्रापि कु चु टु तु पु इत्येवमादिषु। तथा च पाणिनिः। 'अणुदित्सवर्णस्य चाप्रत्ययः' इति। औदव्राजिरपि। 'स्पर्शवर्गस्य स्पर्शग्रहणे च ज्ञेयं वर्गस्य ग्रहणं स्थानेष्वित्यधिकारः' इति। उकारः पवर्गश्च ओष्ठाभ्यां जातौ। ऋकारः टवर्गश्च रेफषकारौ च मूर्द्धन्या मूर्द्धजा भवेयुः। लृकारस्तवर्गश्च लकारसकारौ च दन्त्या दन्तोद्गताः ॥ १७ ॥

ओकार औकारश्च कंठोष्ठाभ्यां जातौ ॥ १८ ॥ एकारस्य ओका-
रस्य च सवर्णग्राहकत्वादैकारस्य औकारस्य चैतेषां चतुर्णां
संध्यक्षराणां सम्बन्धिनी अर्द्धमात्रा कण्ठ्या कंठजा भवतीत्यर्थः
अध्यर्द्धास्ताल्वोष्ठस्थाना इति ॥ १९ ॥ स्पष्टार्थौ ॥ २० ॥ २१ ॥
अयोगेति । अनुस्वारो विसर्गश्च ᳵक ᳶपौ च इति चत्वारो
ऽयोगवाहाः । तथा चौदव्रजिः । 'अयोगवाहा अः इति विसर्जनीय
ᳵक इति जिह्वामूलीयः ᳶप ᳶफइत्युपध्मानीयः अंइत्यनुस्वा
रः नासिक्यः । न विद्यते योगः संयोगो वर्णांतरेण येषां तेऽ
योगवाहास्ते चाश्रयस्य ककारादेः स्थानं भाजितुं शीलं येष
त आश्रयस्थानभाजिनः । अन्ये तु यमानप्ययोगवाहान्मन्यंते तेष
मतेऽयोगवाहशब्दः अश्वसमितावयवो रूढिशब्दोऽश्ववर्णवद्वेदित
व्यः। अनुस्वारस्वरूपमाह। 'अनुस्वारप्रकृतिस्तु पाणिनिनैव कथित
' मोनुस्वारः ' इति ॥२२॥ मूलम्॥ 'अलाबुवीणानिर्घोषो दंतमूल्य
स्वरानुगः । अनुस्वारस्तु कर्तव्यो नित्यं ह्रोः शषसेषु च ॥२३॥
अलाबुःतुंबी अलाबुयुक्तवीणाया निर्घोष इव शब्दो यस्य सोऽलाबुवी
णानिर्घोषः स्थानं दन्तमूलं तत्र भवो दन्तमूल्यः।स्वरानकारादीननु
गच्छत्यनुभवतीति स्वरानुगः।हकाररेफयोः शषसेषु च सदा भवति
तथा च नारदः । ' आपद्यते मकारो रेफोष्मसु प्रत्ययेष्व
नुस्वारम् । यवलेषु परसवर्णं स्पर्शेषु चोत्तमायतिम् ' इति । 'अष्टौ
स्थानानि वर्णानामुरः कंठः शिरस्तथा । जिह्वामूलं च दन्ताश्च
नासिकोष्ठौ च तालु च ' इतीमं श्लोकमनुवादरूपं केचित्पठंति
॥ २३ ॥ 'अनुस्वारे विवृत्यां तु विरामे चाक्षरद्वये । द्विरोष्ठौ तु
विगृह्णीयाद्यत्रौकारवकारयोः ॥ २४ ॥ व्याघ्री यथा हरेत्पुत्रान्दं

ष्ट्राभ्यां न च पीडयेत् । भीता पत

प्रयोक्तव्याः खे अराँ इव खेदया ॥ २६ ॥ रंगवर्णान्प्रयुंजीरन्नं
त्पूर्वमक्षरम्। दीर्घस्वरं प्रयुंजीयात्पश्चान्नासिक्यमाचरेत् ॥
हृदये चकमात्रस्तु अर्द्धमात्रस्तु मूर्द्धनि। नासिकायां तथाऽ
रंगस्यैवं द्विमात्रता ॥ २८ ॥ हृदयादुत्करे तिष्ठन्कांस्येन
स्वरम्। मार्द्दवं च द्विमात्रं च धन्वाँ इति निदर्शनम् ॥ २
मध्ये तु कंपयेत्कम्पमुभौ पार्श्वौ समौ भवेत्। सरंगं कंपये
र्थावेति निदर्शनम् ॥ ३० ॥ एवं वर्णाः प्रयोक्तव्या नाव्यर
च पीडिताः। सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते ॥ ३१ ॥
शीघ्री शिरःकंपी तथा लिखितपाठकः। अनर्थज्ञोऽल्पकण्ठः
डेते पाठकाधमाः ॥ ३२ ॥ माधुर्य्यमक्षरव्यक्तिः पदच्छेदस्तु
स्वरः। धैर्यं लयसमर्थश्च षडेते पाठका गुणाः ॥ ३३ ॥ शं
भीतमुद्धुष्टमव्यक्तमनुनासिकम्। काकस्वरं शिरसिगं तथा स्थान
वर्जितम् ॥ ३४ ॥ उपांशु दष्टं त्वरितं निरस्तं विलंबितं गद्ग
प्रगीतम् । निष्पीडितं ग्रस्तपदाक्षरं च वदेन्न दीनं न तु सानु
स्यम् ॥ ३५ ॥ प्रातः पठेन्नित्यमुरःस्थितेन स्वरेण शार्दूलर
पमेन। माध्यंदिने कण्ठगतेन चैव चक्राह्वसंकूजितसन्निभेन ॥३
तारं तु विद्यात्सवनं तृतीयं शिरोगतं तच्च सदा प्रयोज्यम्। म
हंसाम्बुभृतस्वराणां तुल्येन नादेन शिरःस्थितेन ॥ ३७
अचोऽस्पृष्टा यणस्त्वीषन्नेमस्पृष्टाः शरः स्मृताः । शेषाः स्
हलः प्रोक्ता निबोधानुप्रदानतः ॥ ३८ ॥ अस्यार्थः । स्व
कालतः स्थानतो वर्णानां भेदः कथितः । अधुना प्रयत्नतो भे
कथ्यते । प्रकर्षेण यत्नो वर्णोच्चारणं प्रत्यस्पृष्टादिभिस्स प्रयत्नः
अजिति प्रत्याहारग्रहणम् । अइउऋऌएऐओऔएतेऽस्पृष्टाः । य

हकारादारभ्यालकरात् । उक्तादन्यः शेषः । अनुप्रदानं स्वस्था वर्गे
नादिकं घोषादि अनु प्रकर्षेण दीयते इत्यनुप्रदानम् 'द्वौ नादा वि
नुप्रदानौ' इत्यौदव्रजिः॥३८॥ अमोऽनुनासिकानह्रौ नादिनोह झषवर्गे
स्मृताः । ईषन्नादा यणुजसः श्वासिनश्च खफादयः ॥ ३९ ॥ अनुसा
प्रदानतो हेतोर्वर्णानां भेदं शृणु । अमिति प्रत्याहारः अमङणनम् विन
अनुनासिका इति स्वस्थानैरधिकाराःअनुपाठात् । नासिकामनुभव घो
तीत्यनुनासिकम् । अमङणनमोऽनुनासिकानिमान् जानीयात् वि
तथा च पाणिनिः । 'मुखनासिकावचनोऽनुनासिकः' । अह्नाविति दय
अकारो रेफश्च हकारो झभघढधष् एते अनुनासिका अभाविर्य
संतौ रेफहकारौ नेति व्याख्यातं पाठद्वयात्।अह्नादयो नादोऽस्त्येषांच
नादिनःस्मृताः।क्वचिदमोऽनुनासिकानह्नाविति पाठः।तत्राम्प्रत्याहर कख
अइउण् ऋलृक् एओङ् ऐऔच् हयवरट् लण् यमङणनम् एते पवि
अमां हकाररेफवर्जितानां विकल्पेनानुनासिकत्वं अमान्तु नित्यम् ग
तथा च शौनकः । 'सचादयो या विहिता विवृत्तयः प्लुतोपधांत मा:
अनुनासिकोपधा' इति । तथा।उकाश्चेति करणे युक्तः पृक्तो द्राघित
शाकलेनेति । अकाररेफयोः प्रथमे पाठे नादित्वं द्वितीयपाठे हकार
रेफयोरनुनासिकत्वप्रतिषेधः । ईषन्नादा मनागूनादा यणः कथित
जशो जबगडदश् एते चेति।खफादयः खफछठथा एते श्वासोऽस्त्येषा
मिति श्वासिनः श्वासो घोषाणां तृतीयात् प्रथमानामघोषाश्चतुर्था
नां युग्मासोष्मणामित्यौदव्राजिः । ईषच्छ्वासांश्चरो विद्याद्गोधामेकं
तत्प्रचक्षते। दाक्षीपुत्रपाणिनिना येनेदं व्यापितं भुवि । चरः चटतयो
वु,कपयू, शषशर् एतन्नामकानीषच्छ्वासाञ्जानीयात् गोर्वाचो धामु वे
स्थानमेतच्चरामाचक्षते वर्णविदः।आनुपूर्व्यमितिय उक्ताः। अथही

स्था वर्गद्वितीयवर्णास्युः ×क×पाभ्यां सविसर्गकाः । श्वासा
नादा विवाराख्यमहाप्राणप्रयत्नकाः ॥ २ ॥ घोषसंवारनादाल्पप्र
झष वर्गतृतीयकाः ॥ घोषसंवारनादाख्यमहाप्राणप्रयत्नकाः ॥
अनु सानुस्वारचतुर्थास्तु वर्णा वर्गेषु कीर्तिताः ॥ महा
नम् विना प्रोक्ता अल्पप्राणाधिकास्तथा ॥ ४ ॥ वर्णपंचमवर्ण
भव घोषसंवारनादकाः ॥ यमयोर्वावसानास्तु वर्णाः प्रो
यात् विचक्षणैः ॥ ५ ॥ घोषसंवारनादाल्पप्राणकाः सुगमोक्तिभिः ॥
विति दयः सान्तमादाय महाप्राणाधिकास्तथा ॥६॥ विवाराघोषश्वा
नावरिव्यप्रयत्नाः परिकीर्तिताः ॥ घोषसंवारनादाख्यमहाप्राणास्त
त्येषच ॥ ७ ॥ हकारस्य तु विज्ञेयाः प्रयत्नाः शब्दवित्तमैः ॥ यंत्र

कखचछटठतथपफएतत्सहशयमाः ×क× पविसर्गाःशषसाः२६एतेश्वासाघोषविवाराः	कगङचजनटडणतदनपबमएतत्सहशय यरलवा एते २९ ऽल्पप्राणाः
गघङजझञडढणदधनबभमएतत्सहशय माः यरलवाः ३१ घोषसंवारानादाः	खघछझठढथधफभएतत्सहशयमाअनुस्व विसर्ग×क× प शषसहाः२८ एतेमहाप्रा

बाह्यप्रयत्नाः	विवाराघोषश्वासाल्पप्राणाः	विवाराश्वासघोषमहाप्राणाः		संवारनादघोषाल्पप्राणाः उदात्तानुदात्तस्वरिताः				संवारनादघोषामहाप्राणाः	
अक्षराणि	कचटतप	खछठथफ	शषस	गजडदब ञमणन		अइउऋ ऌएऐ ओऔ	यरलव	घझढधभ	
आभ्यंतरप्रयत्नाः	स्पृष्टः		ईषद्विवृतः	स्पृष्टः	संवृतः ह्रस्वः	विवृतः	ईषत्स्पृष्टः	स्पृष्टः	ई

धामैकं चात्र लेख्यम् ।'छन्दः पादौ तु वेदस्य हस्तौ कल्पोथ पठ्यते
चटतज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥ ४१ ॥ शिक्षा घ्रा
धाम वेदस्य मुखं व्याकरणं स्मृतम् ॥ तस्मात्सांगमधीत्यैव ब्रह्मलो
ः। अथहीयते ॥ ४२ ॥ उदात्तमाख्याति वृषोंगुलीनां प्रदेशिनीमू

निहतं तु कनिष्ठिक्यां स्वरितोपकनिष्ठिकाम् ॥ ४ ॥ अनुदात्तो
हृदि ज्ञेयो मूर्ध्न्युदात्त उदाहृतः। स्वरितः कर्णमूले तु नासाग्रे प्रच
यः स्मृतः ॥ उदात्तं भुवि पातव्यं प्रचं नासाग्रमेवच । हृत्प्रदेशेऽ
नुदात्तं तु तिर्यग्जात्यादिरीरितः॥अधो रक्तोऽनुदात्तः स्यादुदात्तोऽ
ताम्र ईरितः । उपरिरक्तास्तिरोरक्तो वा स्वरितश्च कीर्त्तितः ॥ स्वरि
तपरा अताम्राः प्रचयाः परिकीर्तिताः । एकपदे नीचपूर्वोऽपूर्वे
वाच्यवान्यतरयुक्तो जात्यः॥ जात्ये तु पितृदानवद्धस्तम् । अंतोदा
त्तमाद्युदात्तमुदात्तमनुदात्तनीचस्वरितम् । मध्योदात्तं स्वरित
द्व्युदात्तं त्र्युदात्तमितिनवपदशय्या ॥४५॥ अग्निः सोमः प्रवो वीर्यं
हविषां।स्वर्बृहस्पतिरिंद्राबृहस्पती !अग्निरित्यंतोदात्तं सोम इत्याद्यु
दात्तं प्रेत्युदात्तं वइत्यनुदात्तं वीर्यं नीचस्वरितं हविषां मध्योदात्
स्वरितिस्वरितं बृहस्पतिरिति द्व्युदात्तमिंद्राबृहस्पतीतित्र्युदात्तम्
अनुदात्तो हृदि ज्ञेयोमूर्ध्न्युदात्त उदाहृतः ॥ स्वरितः कर्णमूलीय
सर्वास्ये प्रचयः स्मृतः ॥ ४६ ॥ चाषस्तु वदते मात्रां द्विमात्रञ्चै
वायसः ॥ शिखी रौति त्रिमात्रं तु नकुलस्त्वर्द्धमात्रकम् ॥ ४७ ॥
कुतीर्थादागतं दग्धमपवर्णं च भक्षितम्॥ न तस्य पाठे मोक्षोऽस्ति
पापाहेरिव किल्बिषात् ॥ ४८ ॥ सुतीर्थादागतंव्यक्तंसाम्नायंसुव्यव
स्थितम् ॥ सुस्वरेणसुवक्त्रेण प्रयुक्तं ब्रह्म राजते ॥ ४७ ॥ मंत्रो
हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह॥स वाग्वज्रो य
जमानं हिनस्तियथेंद्रशत्रुः स्वरतोऽपराधात् ॥ ५० ॥ अवक्षरम
नायुष्यं विस्वरं व्याधिपीडितम् ॥ अक्षताः शस्त्ररूपेण वज्रं पतति
मस्तके ॥ ५१ ॥ हस्तहीनं तु योऽधीते स्वरवर्णविवर्जितम् ।
ऋग्यजुःसामभिर्दग्धो वियोनिमधिगच्छति ॥ ५२ ॥ हस्तेन वे

वाङ्मयेभ्यः समाहृत्य देवीं वाचमिति स्थितिः॥ ५४ ॥ येन
क्षरसमाम्नायमधिगम्य महेश्वरात् ॥ कृत्स्नं व्याकरणं प्रोक्तं
स्मै पाणिनये नमः ॥५५ ॥ येन धौता गिरः पुंसां विमलैः शब्
वारिभिः ॥ तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः ॥ ५६
त्रिनयनमुखनिःसृतामिमां य इह पठेत्प्रयतः सदा द्विजः ॥
भवति धनधान्यकीर्त्तिमान्सुखमतुलं च समश्नुते दिवीति दिवीति
इति पाणिनीयशिक्षा। शंकरः शिवः शांकरीं सुखकरीं विद्यां दा
नाम्नी ऋषिकन्या तस्याः पुत्राय बुद्धिमते। नन्वप्रकृतं पाणिनि
नमस्करणं किमर्थम्। उच्यते। अचोऽस्पृष्टा यणस्त्वीषदित्य
दिना प्रत्याहाराः शिक्षाग्रथिताः प्रत्याहाराश्च पाणिनिना शंकर
दधिगम्य व्याकरणं शिष्योपकाराय प्रोक्तं स्वप्रत्याहाराल्लोके
वर्त्तितास्तदर्था स्तुतिः ॥ १ ॥ त्रिनयनमुखान्निस्सृता यथा गुरु
याः सिंहस्तेन नेयं कृतेत्यर्थः। सदातनत्वात्। अतुलं मोक्षाख्
सुखं स्वर्गादेः सुखस्य परिमितकालत्वेन तुलितत्वादित्यर्थः। अ
वर्गसमाम्नाये श्रीनन्दिकेशेन सर्वविश्वोत्पत्तिस्थितिसंहृतिकार
तत्त्वानामुद्भवः षड्विंशतिकारिका रूपेणपतंजलिव्याघ्रपाद
सिष्टादिभ्यः प्रतिपादितो यथा तथोच्यतेऽधुना। तथा हि
खलु सकललोकेशनायकः परमशिवः सनकसनंदनसनातनसन
त्कुमारनंदिकेशपतंजलिव्याघ्रपादवसिष्टादींश्चोद्धर्तुकामोढक्कानि
दव्याजेन चतुर्दशसूत्रात्मकं तत्त्वमुपदिदेश तदनु ते सर्वे मु
नीन्द्रवय्यां ऊचुः। चिरमुपास्ति कृतवतामस्माकं श्रीशिवश्च
र्दशसूत्रात्मकं तत्वमुपदिदेशैतत्सूत्रजालस्य तत्त्वार्थं श्रीशिव
रानग्रहेण श्रीनंदिकेश एव जानं समर्थोऽत एनमेव वयं प्र

वसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् ॥ उद्धर्त्तुकामः स
नकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम् ॥१॥ ' नटराजराजः वि
श्वरूपविलासवैचित्र्यचमत्कारप्रवीणत्वस्य वागाद्यगोचरत्वेन तत्प्र
काशकत्वान्नटराजराजः तांडवादिविलासवैचित्र्यचमत्कारप्रवीण
त्वस्य त्वन्यत्र नटादावपि सत्त्वात् । स स्वात्मज्ञापनाय ढक्कानि
नादव्याजेन सनकादीनुद्धर्तुकामोऽयं नवपञ्चवारं स्वांतर्गतात्मतत्त्वं
प्रकटयितुं तदवसाने ढक्कां ननाद । अहं तदेतद्विततनिनादो
द्भूतवर्णाद्यात्मकमाद्यमतिरहस्यं मातृकारूपेण सनातनमखिलग
शब्दशास्त्रप्रवृत्तये किंचिद्वैलक्षण्येन श्रीशिवेनोक्तं शिवसूत्रजालं
शिवसंबंधिसूत्रसमूहं कल्याणरूपसूत्रसमूहं वा विमृशे विचा
स्फुटीकरोमि विमर्शे इति छांदसप्रयोगः ॥ १ ॥ अनुबन्धाश्रित
पाणिन्याद्युद्देश्यका एवेत्याह । ' अत्र सर्वत्र सूत्रेषु ह्यं
त्यवर्णचतुर्दशम् ॥ धात्वर्थं समुपादिष्टं पाणिन्यादीष्टसिद्धये॥२॥
अत्र'एषु सर्वत्र सर्वेषु अंत्यं वर्ण'इत्यपि पाठः। उभयथापि बहु
व्रीहिकदंबमन्यपदार्थः समासांतः । धात्वर्थं धातुमूलकशब्द
शास्त्रप्रवृत्त्यर्थम् तथा चोक्तमिंद्रेण।'अंत्यवर्णसमद्भूता धातवः परि
कीर्तिताः' इति ॥ ३ ॥ तत्राद्येन सूत्रेण सर्ववर्णानां समस्तभुव
नानां च समुद्भवरूपं स्वात्मतत्वमुपदिष्टमित्याह।'अकारो ब्रह्मरूप
स्यान्निर्गुणः सर्ववस्तुषु ॥ चित्कलाभि समाश्रित्य जगद्रूपी उणी
श्वरः ॥३० ॥ अनेन अः परमेश्वरो निर्गुणः इ मायामाश्रित्य उव्या
पकः सगुणः ण् ईश्वरः आसीदिति सूत्रार्थः सूचितः । सर्ववस्तु
षु परापश्यंतिमध्यमावैखर्य्यादिषु चित्कलामाश्रित्येत्यत्र गायत्री
मीं पद्मानीमीतिवदीकारो बोध्यः। तत्र सूत्रे ईकारस्तु त्रिनेत्रेण
नोदित उकारेण प्रकटीक्रियते ...

अकाररूपाक्षरात्मकमासीत् । ततोक्षरादसतो वै सत्सगुणमजा
जातमिति तदर्थः । श्रीगीतोपनिषत्स्वपि 'अक्षराणामकारो
इति ॥ ३ ॥ अतएवाह । ' अकारः सर्ववर्णाग्र्यः प्रका
परमेश्वरः ॥ आद्यमंत्येन संयोगादहमित्येव जायते ॥ ४
आदिरंत्येन सहेता' इत्यादिप्रत्याहारसूत्राद्यप्यनेनाऽसूचि ।
दिरकारः अंत्यो हकारः अकारादिसकारांताः सर्वे वर्णाः परमा
त एव भवंतीत्यर्थः ॥ ४ ॥ सर्वं परात्मकं पूर्वं ज्ञप्तिमात्रा
जगत् ॥ ज्ञप्तेर्बभूव पश्यंती मध्यमा वाक् ततः स्मृता ॥ ५
चक्रे विशुद्धिचक्राख्ये वैखरी सा मता ततः ॥ सृष्ट्याविर्भाव
ख्यात्मं मध्यमा वाक्समायुतम् ॥ ६ ॥ ईश्वर एवानादिजीवोपाध
श्रितकर्मप्रेरितप्राणव्यापारान्तरं नाभौ पराख्यं मायया परिणा
मुपेत्य हृदि पश्यंत्याख्यमुपेत्य विशुद्धिचक्रे मध्यमाख्यमुपे
श्वाद्रक्रे वैखर्याख्यमवाप्य वेदादिरूपो भवतीत्यर्थः । श्रुति
पि 'वागेव विश्वा भुवनानि जज्ञे' इति सूक्ष्मा वागेव विश्वाकारे
विवर्त्तते परिणमते वेति तदर्थः । श्रुत्यंतरमपि 'वाचैव विश्वं ब
रूपनिबद्धं तदेतदेकं विभज्योपभुङ्क्ते ' इति । अतात्त्विकोऽन्यथ
भावो विवर्तो रज्जुभुजंगवत् । तात्त्विकोऽन्यथाभावो हि परिणा
द्घटकनककुंडलादिवत् । उभयरूपेण कथनं तु वेदांतस
ख्यरूपमतद्वयाभिप्रायेण । सांख्यस्य पक्षः परिणामवादो वेदांतप
स्तु विवर्त्तवाद इति संक्षेपशारीरिकोक्तेः । अत्र सर्ववर्णसंभवका
'अइउऋऌ' इति वर्णपंचकमेव सर्वेषामेकोनपंचाशदक्षराण
भूतपञ्चकानां पञ्चवर्गाणां क्रमेण योनिः । तच्च ह्रस्वदीर्घभेदाद्वि
धम।

तां कारणत्वतः । इकारः सर्ववर्णनां शक्तित्वात्कारणं मतम् ॥ ७ ।
जगत्स्रष्टुमभूद्वाञ्छा यदा ह्यस्य तदाभवत् ॥ कामबीजमिति प्र
हुर्मुनयो वेदपारगाः ॥ ८ ॥ अक्षरार्थः स्पष्ट एव कामबीजस्वरू
तंत्रांतरे । 'स्वप्रकाशपरमात्मवस्तुनो दृश्यमानजगतः सिसृक्षया
कामतः पराशिवप्रवेशनं कामबीजमिदमेव निश्चितम्' इति।'बीजं ईं
दुद्वयारूढं सार्द्धं योनिस्वरूपकम् ॥ महाकामकलारूपमात्मा
चिंतयेत्प्रिये' इति श्रीरुद्रेणोमां प्रत्युक्तम् ॥ ८ ॥ उक्तमेव द्रढयां
'अकारो ज्ञप्तिमात्रः स्यादिकारश्च कला मता । उकारो विष्णुरि
त्याहुर्व्यापकत्वान्महेश्वरः ॥ ९ ॥' उकार इति उव्यापकत्वेनेश्व
आसीदित्यर्थके उणीश्वर इत्यत्रोति भावः।ननु सर्ववेदान्तेषु परमेश्व
एक इति निश्चितत्वात् मायामीं चित्कलामाश्रित्य जगद्रूपोऽभू
त्युक्तेरद्वैतहानिःस्यादित्याशंक्याह । 'ऋलृक्सर्वेश्वरो मायां म
वृत्तिमदर्शयत् ॥ तामेव वृत्तिमाश्रित्य जगद्रूपमजीजनत् ॥ १०
ऋपरमेश्वरः लृमायाख्यां मनोवृत्तिमदर्शयत् तामेवाश्रित्य स्वेच्छ
जगज्जनयामासेत्यर्थः । ऋपरमेश्वरइत्यत्र 'ऋतं सत्यं परं ब्र
पुरुषं कृष्णपिंगलम्' इति श्रुतिः प्रमाणम् । ऋतमिह तपर इदुं
तिवत् । ऋतपदार्थमेव परं ब्रह्मेत्यर्थः 'सोऽकामयत बहु स्यां प्र
येय' इतिश्रुत्यन्तरम् श्रीतंत्रेऽपि' मम चाभून्मनोरूपं लृकारः पर
श्वरी' इति ऋलृवर्णौ यथा तादात्म्यमापन्नौ संध्यादिकार्यं कुरु
स्तथा मायेशावपि जगत्कार्यं कुरुत इति भावः ॥ १० ॥ ता
त्म्यमेवाह 'वृत्तिवृत्तिमतोरत्र भेदलेशो न विद्यते । चंद्रचंद्रिकयो
र्यथा वागर्थयोरिव ॥ ११ ॥' इखेह पादपूरणे । अत्र प्र

ते भेदलेशो वास्तव इत्यर्थः ॥११॥

सग्रहणयोग्यायांमायायां निमित्तभूतायां विश्वं जनयति । योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहम्’इति श्रीमुखोक्तेः । ब्रह्मरूपमित्यर्थः ॥ १२ ॥ ननु जन्यजनकभावेऽ द्वैतहानिः दित्याशंकायां ‘तत्सृष्ट्वा तदेवानुप्राविशत्’इति श्रुतिमाश्रित्य ‘एओङ् मायेश्वरात्मैक्यविज्ञानं सर्ववस्तुषु ॥ साक्षित्वा भूतानां स एक इति निश्चितम्’॥ १३ ॥ जन्यजन च स्वस्यैव तत्तद्रूपेण विवर्त्तनादितिनाद्वैतहानिः । अ काराभ्यां निष्पन्नप्रणवरूपेणोंकारेण सगुणनिर्गुणयो बोधिते तेनैव दृष्टांतेन सर्वत्रैक्यबुद्धौ द्वैतनाशो ध्वनितः । ष्टिव्यष्टिभेदेन पूर्ववर्णयुतद्वितीयस्य तद्युततृतीयस्य च समन्व धकमिदं सूत्रम् । अकारात्मकः ईमायायुक्तः सन् य एरूप ओङ् अनुज्ञानरूपः प्रज्ञानात्मना सर्ववस्तूनामेकत्वादद्वैतं त्तिर्न नानात्वम् । जन्यजनकत्वं च स्वयं प्रविश्य तत्तद्रूपेण व इत्यर्थः । वटबीजन्यायेन च पूर्वसूत्रद्वयजनितं वर्णपञ्चकमेव कलजगत्कारणमिति प्रागुक्तमुत्तरसूत्राणामपि तस्मादेव सं समष्टिव्यष्टिभेदेषु पूर्ववर्णयुतद्वितीयस्य तद्युततृतीयस्य च योगजनकमिदं सूत्रं समन्वयबोधकमप्येकत्वेनोक्तं सर्ववेदसं व । तथा हि सनकदक्षिणामूर्त्तिसंवादे महावाक्यविवरणे ‘शृणु सावधानेन चतुर्णामपि साम्यता । देवानाञ्च महाभाग च काणामिहोच्यते ॥ ब्रह्मशब्देन यद्वस्तु तत्प्रज्ञानमिहोच्यते ज्ञानं ब्रह्म यस्माद्धि तस्माद्ब्रह्मास्म्यहं ततः ॥ यतो जीवो ह्मैव ततस्तत्त्वमसीति वै । अन्यस्य वारणार्थाय ह्ययमात्मेत्य

ईक्षणानंतरं स्वांतर्गतं स्वस्मिन्सूक्ष्मरूपेण स्थितं जगद्विस्ता
रयितुमिच्छुः ऐआदिशक्तियुतः अकाराक्षरः पूर्वगताकारेका
दीर्घयोगस्यैव ऐकारत्वमेकत्वं च सम्यग्ज्ञानस्वरूपः परमेश्वरे
यः पूर्वसूत्रगतः स एव अकारदीर्घौकारदीर्घस्यैव योगे औकारत
यः प्रज्ञानात्मा मायाशबलितः स औकारः य आऊ इति॥१४॥ए
शिवादिप्रकृत्यंतानां चतुर्दशतत्वानामुद्भवं वर्णयित्वा पंचभूता
द्युद्भवमग्रिमसूत्रस्य वर्णैराह। 'भूतपंचकमेतस्माद्धयवरमहेश्वरात्
व्योमवाय्वम्बुवह्न्याख्यभूतान्यासीत्स एव हि ॥१५॥ 'हयवररूप
न्महेश्वरात् सएवपरमेश्वरएव॥१५॥ 'हकाराद्व्योमसंज्ञश्च यकाराद्वा
रुच्यते ॥ रकाराद्वह्निस्तोयं तु वकारादिति शैववाक् ॥ १६ ॥
'तस्माद्वा एतस्मादात्मन आकाशः संभूतः आकाशाद्वायुर्वायोरग्नि
ग्नेरापः' इतिश्रुतेरेतस्मात्परमेश्वराद्भूतपंचकमाकाशादिप्रपंचकारण
मासीदिति॥१३॥नन्वस्मिन्सूत्रे भूतपंचकमासीदित्युक्तंतत्राकाशा
चतुष्टयमेवोक्तं न पृथ्वीति तत्राह। 'आधारभूतं भूतानामन्नादीनां
कारणम् ॥ अन्नाद्रेतस्ततो जीवः कारणत्वाल्लणीरितम्॥ १७ ॥'
तानामुद्भिज्जस्वेदजजरायुजांडजानां प्रधानकारणत्वादाधारभूतं
थ्वीति लणितिशब्देनोच्यते ॥ १७ ॥ पुनस्तन्मात्रोत्पत्तिक्रमम
'शब्दस्पर्शौ रूपरसगंधाश्चञमङणनम् ॥ व्योमादीनां गुणा ए
जानीयात्सर्ववस्तुषु ॥१८॥ 'पञ्चवर्गेष्वंतिमवर्णा गुणास्ते च पां
भौतिकवस्तुमात्रे संतीति भावः ॥ १८ ॥ द्वाभ्यां कर्मेंद्रियोत्पत्ति
माह। 'वाक्पाणी च झभञासीद्विराडूपचिदात्मनः ॥ सर्वजंतु
विज्ञेयं स्थावरादौ न विद्यते ॥ १९ ॥ वर्गाणां तुर्य्यवर्णा
कर्मेन्द्रियगणो हि ते ॥ घढधष् सर्वभूतानां पादपायुउपस्थका इ

मपि जंतूनामीरितं जबगडदश्रू ॥ २१ ॥ ' ' वर्गाणां मध्यः
ज्ञानेंद्रियगणः स्मृतः ' इति मंत्रशास्त्रात् एतेभ्य एव सर्वेषां
द्रियगणोद्भव इति ज्ञेयमेवं पूर्वत्रापि ॥ २१ ॥ प्राणादि
द्भवमाह । ' प्राणादिपंचकं चैव मनो बुद्धिरहंकृतिः ॥ वभ
रणत्वेन खफछठथचटतव् ॥ २२ ॥ वर्गद्वितीयवर्णोत्थाः प्र
पंच वायवः ॥ मध्यवर्गत्रयाज्जाता अन्तःकरणवृत्तयः ॥ २
स्पष्टार्थद्वयमेतत् । अथ सर्वप्राणिकारणत्वेनाद्यन्तवर्गद्व
ग्रहणेन संपुटीभावं प्रकृतिपुरुषाभ्यां संभावयति । ' आद्य
संभूतौ पुरुषः प्रकृतिर्गुहा ॥ प्रकृतिः पुरुषश्चैव सर्वेषामे
णम् ॥ तत्संभूतिस्तु विज्ञेया कपाभ्यामिति निश्चितम् ॥ २
ककारपकारौ प्रकृतिपुरुषाविति ॥ २४ ॥ ततोवस्थात्र
' सत्वं रजस्तम इति गुणानां त्रितयं पुरा । समाश्रित्य म
शषसर् क्रीडति प्रभुः ॥ २५ ॥ सृष्टेः प्राक् शषसर्वर्णसं
सत्वरजस्तमोगुणानाश्रित्य परःशिवः क्रीडति सर्वत्रेत्यर्थः॥
' शकाराद्राजसं रूपं षकारात्तामसोद्भवः ॥ सकारात्सत्वसंभूां
त्रिगुणसंभवः॥२६॥ 'स्पष्टम् । ' तत्वातीतः परः साक्षी सर्वा
विग्रहः ॥ अहमात्मापरो हल्स्यादिति शंभुस्तिरोदधे ॥ २
सर्वतत्त्वजनकः स्वयं तत्वातीतः सर्वलोकहितार्थं प्रकटितदे
साक्षी परः परमेशो हल्स्यादिति ढक्कानिनादव्याजेन सर्वेषां
तत्त्वमुपदिशंस्तिरोदधेतद्दर्शनमापेत्यर्थः । हकारः शिववर्णस्य
ति शैवागमात्॥इत्युपमन्युव्याख्यातनंदिकेशकाशिकादिसूत्र
शिका।अथैतज्ज्ञापकं चक्रमपि एतदग्रेलिखामः।अयमेवार्थः श्री
चन्द्रेण निजभक्ताशिरोमणय उद्धवाय ' स एष जीवो विवरप्रसू
इत्यत्र भङ्ग्यन्तरेणोक्तः । तथाहि स एष जीवो विवरप्रसूतिः

अथ चक्रम् ।

अकारो ज्ञप्तिमात्रं निर्गुणब्रह्माक्षरः सः

इकारश्चित्कला मायाशक्तिस्तामाश्रित्य कामबीजं भूत्वा

उकारो व्यापकः सगुण ईश्वरः संपन्नः । अत्र द्वैतशंकायामाह

ऋकारः परमेश्वरः

ऌकारो मनोवृत्तिमाश्रित्य चराचरमजीजनद्वृत्तिवृत्तिमतोर्द्वैताभावेन चंद्रचंद्रिकयोरिवैक्यम्।तथा च ऌवर्णः पृथगेव न द्वैतम्

अकारेकारसंयोगादेकारः स च मायासहित ईश्वरः सचैक एव

अकारोकारनिष्पन्न ओकारः निर्गुणब्रह्म सगुणब्रह्म चानेन दृष्टांतेन जन्यजनकभावद्वैतशंकापास्ता वटबीजन्यायेनाद्वैतासमर्थनश्च

स्वांतर्गतजगद्विस्तारयितुमिच्छुरादिशक्तियुत ईश्वर आकारदीर्घैकारयोगात्तत्सिद्धेः

आऊ इत्याविर्भाव आविर्भूतजगद्विस्तारयितुमुद्युक्तः ततः परमेश्वरात्

आकाशः	ल	पृथिवी	ण	रसः	घ	पादौ	ब	त्वक्	ख	प्राणः	थ	उदानइति प्राणपंचकमासीत्	क	पुरुषः	स
वायुः	ञ	शब्दः	न	गधःश्वसनं	ढ	पायु	ग	चक्षुः	फ	अपानः	च	मनः	प	प्रकृतिः	ह
जलम्	म	स्पर्शः	झ	वाक्	ध	उपस्थ	ड	घ्राणं	छ	समानः	ट	बुद्धिः	श	रजः	
अग्निः	ङ	रूपम्	भ	पाणीअचिदात्मनोविराड्रूपस्य	ज	श्रोत्रम् च कर्मेंद्रियपंचकमासीत्	द	जिव्हेति ज्ञानेंद्रियपंचकर्मा	ठ	व्यानः	त	अहंकृतिः	ष	तमः	

तत्वमेतैः पुरुषः सर्वत्ररमते तत्वातीतःसर्वसाक्षी पुरुषोनेन कथ्यते१अथ तत्वमाह।तथाचाद्यंतयोहस्य कीर्त्तनात्परम् मन उत्पन्नं तत्रैव ते इत्युक्तम् आद्येनाकारेणांत्येनयोगेइमितीश्वरात्मकं सर्वं निरूपितं भवतीति सिद्धम् ।

परमेश्वरः । अपरोक्षत्वे हेतुः विवरेष्वाधारादिचक्रेषु प्रसृ
प्रसूतिरभिव्यक्तिर्यस्य सः । तामेवाभिव्यक्तिमाह । घोषे
घोषेण पराख्येण नादवता प्राणेन सह गुहामाधारचक्रं
सन्मनोमयं सूक्ष्मं रूपं पश्यंत्याख्यं मध्यमाख्यं च मणि
चक्रे विशुद्धिचक्रेचोपेत्य प्राप्य वक्रे मात्रा ह्रस्वादिः स्वर
दिर्वर्णोऽकारादिरित्येवं वैखर्य्याख्यः स्थविष्ठोतिस्थूलो नाना
खात्मकोऽभवदिति ॥ तथा च श्रुतिः । 'चत्वारि वाक्प
पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ॥ गुहा त्री
हिता नेङ्गयंति तुरीयं वाचो मनुष्या वदंति ' इति।एतदर्थस्तु
रिमितानि चत्वारि पदानि स्थानानि परापश्यंतीमध्यमावै
तानि च ये ब्राह्मणा मनीषिणोऽध्यात्मकुशलास्ते विदुः । तेष
आदौ त्रीणि पदानि गुहायां शरीरे आधारनाभिहृदयेषु नि
नि नेङ्गयन्ति न जानन्ति तुरीयं चतुर्थं वैखर्य्याख्यं मनु
दन्ति मनुष्याणां वदने वर्तमानोऽर्थबोधकः शब्दो भव
र्थः ।'मूलाधारः स्वाधिष्ठानं मणिपूरकमेवच । अनाहतं विशु
ख्यमाज्ञापट्चक्रमुच्यते ॥ मूलाधारे लिंगमूले नाभौ चहृदि
के । भ्रुवोर्मध्ये ब्रह्मरन्ध्रे क्रमाच्चक्राणि चिन्तयेत्' इति
न्तामण्युक्तेः । अत्रार्थेऽभियुक्तैरप्युक्तम् । ' या सा मित्रावरुण
दुच्चरन्तित्रिपथिवर्णानन्तः प्रकटकरणैः प्राणसङ्गात्प्रसूते
पश्यंतीं प्रथममुदितां मध्यमां बुद्धिसंस्थां वाचं वक्रे क
शदां वैखरीञ्च प्रपद्ये ॥ ' इति । ह्रस्वदीर्घप्लुतभेदेन स्वरा
शतिः । ऋलोरप्लुतत्वात्संध्यक्षराणामह्रस्वत्वाच्च व्यं
त्रयस्त्रिंशत् । अनुनासिकाः अमङणनाः पञ्च । विसर्गानु

यि । मातृकावर्णानां पौर्वापर्य्यं परित्यज्येतिध्येयम् । तदुक्तं । 'म
हादेवो मुनींद्रेभ्यो मातृकामेव संजगौ । पौर्वापर्य्यंपरित्यज्य प्रत्याहा
रप्रवृत्तये ॥ सर्वथा सापि नो त्यक्ता चोऽकुरित्यादिदर्शनात् ।' वि
श्च'स्पर्शांतस्थोष्मसंज्ञादिक्रमत्यागेन संभवेत्' इतिसनातनक्रमस्
श्रीशौनककृतवेदविभागप्रश्नोत्तरत्वेनश्रीसूतेनवेदाविर्भावार्थं प्रक
टीकृतः । श्रीमद्भागवतद्वादशस्कंधे तथाहि । 'शौनक उवाच । पै
लादिभिर्व्यासशिष्यैर्वेदाचार्यैर्महात्मभिः । वेदाश्च कतिधा व्यस्त
एतत्सौम्याभिधेहि नः ॥ सूत उवाच । समाहितात्मनो ब्रह्मन्ब्र
ह्मणः परमेष्ठिनः । हृदाकाशादभून्नादो वृत्तिरोधाद्विभाव्यते ॥ य
दुपासनया ब्रह्मन्योगिनो मलमात्मनः । द्रव्यक्रियाकारकाख्
धूत्वा यांत्यपुनर्भवम् ॥ ततोभूत्त्रिवृदोंकारो योऽव्यक्तप्रभवः स्व
राट् । यत्तल्लिङ्गं भगवतो ब्रह्मणः परमात्मनः ॥ शृणोति य इ
स्फोटं सुप्तश्रोत्रे च शून्यदृक् । येन वाग्व्यज्यते यस्य व्यक्ति
राकाश आत्मनः । स्वधाम्नो ब्रह्मणः साक्षाद्वाचकः परमात्मनः ॥
सर्वमंत्रोपनिषद्वेदबीजं सनातनम् ॥ तस्य ह्यासंस्त्रयो वर्णा अ
कारद्या भृगूद्वह । धार्यन्ते यैस्त्रयो भावा गुणनामार्थवृत्तयः ॥ ते
नाक्षरसमाम्नायमसृजद्भगवानजः ॥ अंतस्थोष्मस्वरस्पर्शह्रस्वदी
र्घादिलक्षणम् ॥ तेनासौ चतुरो वेदांश्चतुर्भिर्वदनैर्विभुः ॥ सव्याहृ
तिकान्सोंकारांश्चातुर्होत्रविवक्षया ।' इति ॥ व्याख्यातं चैतच्छ्रीस्वा
मिचरणैः । ब्रह्मणो हृदि य आकाशस्तस्मान्नादोऽभूत् यः कर्ण
पुटपिधाने श्रोत्रनिरोधादस्मदादिष्वपि विभाव्यते वितर्क्यते य
स्यान्नाहन्नामापि योगशास्त्रेकथ्यते ॥ १ ॥ यस्य नादस्योपास
नयाऽऽत्मनोंतःकरणस्य मलं क्रियाख्यं ... ...

रस्सरंयोगशास्त्रे तथाहि । ' गुदध्वजांतरे कंदमुत्से
विंदुः । तस्माद्विगुणविस्तारवृत्तरूपेण शोभितम् ॥ वि
' मापस्थाने मषं कुर्याच्छंदोभंगं नकारयेत् ' इति कि
द्विदुशब्दोत्रविंदुपरो ज्ञेयः ॥ ' नाड्यस्तत्र समुद्भूता
स्तिस्रः समर्थिताः । इडा वामे स्थिता नाडी पिंगल
मता । तयोर्मध्यगता नाडी सुषुम्ना वंशमास्थिता ॥ '
शाख्यम् । ' पादांगुष्ठद्वयं याता शिफाभ्यां शिरसा पु
स्थानं समापन्ना सूर्यसोमाग्निरूपिणी ॥ ' शिफाभ्यां ज
' तस्या मध्यगता नाडी चित्राख्या योगिवल्लभा । ब्रह्म
स्तस्यां पद्मसूत्रनिभं परम् ॥ आधारांश्च विदुस्तत्रमत
कधा ॥ दिव्यमार्गमिदं प्राहुरमृतानंदकारणम् ॥ आधार
स्थं त्रिकोणमतिसुंदरम् । तत्र विद्युल्लताकारा कुंडली
ता । सुप्ताहिभोगसदृशाकृतिर्जीवसमाश्रिता । हंसः
नित्यं प्राणो नाडीपथाश्रयः । आधारादुद्गतो वायुर्य
देहिनाम् ॥ देहं संव्याप्य नाडीभिः प्रयाणं कुरुते वहिः
ष्ठाभ्यामुभे श्रोत्रे तर्जनीभ्यां विलोचने । नासारंध्रे मध्य
न्याभिर्वदनं दृढम् ॥ वद्धात्मप्राणमनसामेकत्वं समनु
धारयेन्मारुतं सम्यग्योगोऽयं योगिवल्लभः ॥ नादः संजाय
क्रमादभ्यसतः शनैः । मत्तमृगांगनागीतसदृशः प्रथमो ध्व
शिकास्यानिलापूर्णः वंशध्वनिसमोऽपरः ॥ घंटारवसम
द्धनिर्मेघसमोऽपरः ॥ एवमभ्यसतां पुंसां संसारध्वांतन
ज्ञानमुत्पद्यते पूर्वं हंसलक्षणमव्ययम् ॥ पुंप्रकृत्यात्मकौ प्र

माश्रिता॥यदा तद्भावमाप्नोति तदा सोहमियं भवेत् ॥ सकारा
हकारार्णं लोपयित्वा ततः परम्। संधिं कुर्यात्पूर्वरूपं तदासौ
प्रणवो भवेत् ॥ आत्मभेदास्थितो योगी भावयेत्प्रणवं सदा ॥
जीवन्नेव मुक्तःस्याद्ध्रियते नात्र संशयः ॥' इति। त्रिवृत् त्रि
मात्रः। कंठोष्ठादिभिरुच्चार्यमाणोंकारस्य त्वस्वरसमाम्नायांतर्भा
वात् सूक्ष्मतया तं विशिनष्टि। अव्यक्तो न प्रकटः प्रभव उत्प
त्तिर्यस्य स तथा। तदेवाह। स्वराट् स्वत एव हृदि प्रकाशमान
तमेव कार्य्येण लक्षयति। यत्तदिति। क्लीबत्वं लिंगविशेषणत्वाल्लि
ङ्गं गमकम्। 'ओमित्येकाक्षरं ब्रह्म' इतिश्रुतेः। कोऽसौ परमात्मा
तमाह। इमं स्फोटमव्यक्तमोंकारम्। ननु जीव एव तं शृणोतु ने
त्याह। सुप्तश्रोत्रे कर्णपिधानादिनाऽवृतिके श्रोत्रे सति जीव
स्तु करणाधीनज्ञानत्वान्न तदा श्रोता तदुपलब्धिस्तु तस्य प
रमात्मद्वारिकैवेति भावः। ईश्वरस्तु नैवं यतः शून्यदृक् शून्येऽ
पींद्रियवर्गे दृक् ज्ञानं यस्य स तथा 'त्वमकरणः स्वराडखिल
कारकशक्तिधरः' इतिश्रुतेः। तथा हि। सुप्तो यदा शब्दं श्रुत्वा प्र
बुध्यते न तदा जीवः श्रोता॥ नेंद्रियत्वात्। अतो यस्तदानीं श
ब्दं श्रुत्वा जीवं प्रबोधयति स यथा परमात्मैव तद्वत्। कोऽ
सावोंकारस्तं विशिनष्टि सार्द्धेन। येनोंकारेण वाक् बृहती व्य
ज्यते प्रकटीक्रियते। यस्य च हृदयाकाशे आत्मनः परमात्मनः
सकाशाद्व्यक्तिः प्राकट्यम्॥४॥ किञ्च स्वधाम्नः स्वस्य धामाश्रयो
र्थात्कारणं यद्ब्रह्म तस्य। किञ्च परमात्मांशभूतसमस्तदेवतावा
चकोऽपीत्याशयेनाह। सः सर्वमंत्राणामुपनिषद्रहस्यं सूक्ष्मं रूप
मित्यर्थः। तत्र हेतुः। वेदानां बीजं कारणम् 'प्रणवश्छन्दसामिव'

तत्संबंधिनः । यैरकारोकारमकारैस्त्रिसंख्याकाभावाः
धार्यंते । तत्कारणत्वात् तानेवाह । गुणाः सत्वाद्याः
॥ ऋग्यजुस्सामानि अर्थाद्भूरादयो लोका वृत्तयो जाग्रद
तथा हि नृसिंहतापिन्याम् 'ऋग्वेदो जाग्रदवस्था भूर्लोको ब्रह्म
विराट् सृष्टिश्चाकारार्थः । यजुर्वेदः स्वप्नावस्था भुवर्लोको वि
सो हिरण्यगर्भः स्थितिश्चेत्युकारार्थः । सामवेदः सुषुप्
स्वर्लोको महेश्वरः प्राज्ञोऽव्याकृतः प्रलयश्चेति मकारार्थः ।
तेनाप्युक्तम् ।'त्रयीं तिस्रो वृत्तीस्त्रिभुवनमथो त्रीनपि सुरान
वर्णैस्त्रिभिरभिदधत्तीर्णविकृति 'इति ॥ ८ ॥ ततस्तेभ्य एव
भ्योऽक्षराणामादिक्षान्तानां समाम्नायं समूहं भगवान्सर्ववित
ब्रह्मरूपः सन् । तमेवाह । अन्तस्था यरलवा ऊष्माणः शष
स्वरा अकारादयः षोडश । स्पर्शाः कादयः पञ्चविंशतिः ।
दीर्घाश्चादिना जिह्वामूलीयोपध्मानीयगजकुंभाकृतीनां ग्रहः ।
प्राक्तनैः । 'स्वराः षोडश विज्ञेयाः स्पर्शास्तु पञ्चविंश
अंतस्थाश्चतुःसंख्याका ऊष्माणश्चैव तन्मिताः ॥ जिह्वामूली
कोपध्मानीयकस्तथा ॥ गजकुंभाकृतिश्चैक इत्येवंवर्णसंह
एवं वर्णा द्विपञ्चाशन्मातृकायामुदाहृताः । क्षकारं त्वागम
बीजार्थमधिकं विदुः ॥ तच्चोपलक्षणं ज्ञेयं षट्कज्ञानामपि ध्रु
इति ॥ ननु वर्णेषु च्छंदोभेदोनादिस्सादिर्वेति शंकायाम्
रेव स इति वर्णसमाम्नायेन सहैवाविर्भूतत्वात्तदाह श्री
एकादशे उद्धवं प्रति 'शब्दब्रह्म सुदुर्बोधं प्राणेंद्रियमनोमयम्
तपारं गंभीरं दुर्विगाह्यं समुद्रवत् ॥ १ ॥ मयोपबृंहितं भूम्ना ब्रह्मण
शक्तिना । भूतेषु घोषरूपेण विसेषूर्णेव लक्ष्यते ॥ २ ॥ यथोर्णना

जितस्पर्शस्वरोष्मांतस्थभूषिताम् ॥ ४ ॥ विचित्रभाषावितत
छन्दोभिश्चतुरुत्तरैः । अनन्तपारां बृहतीं सृजत्याक्षिपते स्वयम्॥५
गायत्र्युष्णिगनुष्टुप्चबृहतीपंक्तिरेव च । त्रिष्टुब्जगत्यतिच्छंदो ह्यत्य
ष्ट्यतिजगद्विराट् ॥ ६ ॥ ' इति । पूर्वं वेदस्य त्रिकांडविषयस्य
ब्रह्मपरत्वमापादितं 'वेदा ब्रह्मात्मविषयास्त्रिकांडविषया इमे' इत्या
दिना तदाकर्ण्योद्धवेनाशंकितं भगवज्जैमिन्यादिभिस्तथा कथं
प्रतिपादितम् तत्र श्रीभगवतोत्तरितम् हेउद्धव शब्दब्रह्म स्वरूपतोऽ
र्थतश्च दुर्विज्ञेयमेव।तच्च सूक्ष्मं स्थूलं चेति द्विविधम्।तत्र सूक्ष्मं ताव
त्स्वरूपतोपि दुर्ज्ञेयामत्याह । प्राणेंद्रियमनोमयं प्रथमं प्राणमयं
पराख्यं ततो मनोमयं पश्यंत्याख्यं तत इंद्रियगम
मध्यमाख्यं तस्य वाग्व्यंजकत्वेन वागिंद्रियप्रधानत्वात्
किञ्चानन्तपारं समष्टिप्राणादिमयस्य निर्विशेषस्य च तस्य का
लतो देशतश्चापरिच्छेदात् । अर्थतोऽपि दुर्ज्ञेयत्वमाह । गंभीरं नि
गूढार्थं तत एव दुर्विगाह्यं मतिप्रवेशानर्हम् ॥ तथा च श्रुतिः ।'च
त्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः
गुहा त्रीणि निहता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदंति ॥' इति
व्याख्यातचरेयं श्रुतिः । तत्र मनीषिभिरेव ज्ञेयं सूक्ष्मं रूपं दर्श
यति । मयेति । मयांतर्यामिणोपबृंहितमधिष्ठितम् । अंतस्थत्वेऽ
प्यपरिच्छेदमाह । भूम्नेति । अधिष्ठातृत्वेऽप्यविकारित्वमाह
ब्रह्मणेति । अविकृतस्यापि नियंतृत्वं घटयति । अनन्तशक्तिनेति
भूतेषु सर्वप्राणिषु घोषरूपेण नादरूपेण लक्ष्यते मनीषिभिः
अत्यन्तसूक्ष्मत्वेन दर्शने दृष्टांतः । बिसेपूर्णा तन्तुरिवेति ॥ २
ततो वैखर्याख्याया बृहत्या वाच उत्पत्तिप्रकारं सदृष्टांतमाह

गर्भरूपः प्रभुर्भगवान् ॥ ३ ॥ तेन रूपेण छन्दोमयो वेदः
स्वतस्त्वमृतमयः घोषवान् नादोपादानवान् मनसा नि
तेन । निमित्ततामेव दर्शयति । स्पर्शादीन्वर्णान् रूपयति
यतीति स्पर्शरूपी तेन स्पर्शग्रहणमुपलक्षणं हृदयाकाः
सृजतीति तृतीयेनान्वयः । बृहतीशब्दार्थव्याख्यानाय वि
नि सहस्रपदवीं बहुमार्गाम् । तदेवाह । ओंकारात् उरःकं
योगेन व्यंजितैः स्पर्शादिभिर्भूषिताम् । ओंकारश्चात्र हृ
क्ष्मोऽभिप्रेतो न त्वकारादिवर्णरूपस्तस्य व्यंग्यको
त्वात् । स्पर्शादयो व्याख्यातचराः ॥ ४ ॥ विचित्राभिर्वैदि
कभाषाभिर्विततताम् । यथोत्तरं चत्वारि चत्वार्यक्षरा
ण्यधिकानि येषां तैरुपलक्षितामेवमनंतपारां सृजति स्वयमे
उपसंहरति च ॥ ५ ॥ तेषु कतिचिच्छंदांसि नामतो निर्दि
यति । गायत्रीति । तत्र चतुर्विंशत्यक्षरा गायत्री । ततश्चतुरक्ष
ष्णिगादिछंदांसि । अत्यष्टिः अतिजगती अतिविराडित्यर्थः
छंदःप्रसंगादेषां स्वरूपज्ञानार्थमेषां लक्षणसंज्ञादिकमपि
दाय लिखामः । तदर्थं गुरुसंज्ञामाह । ' संयुक्ताद्यं दीर्घं स
विसर्गसंमिश्रम् । विज्ञेयमक्षरं गुरु पादांतस्थं विकल
तत्रछंदांसितावद्विविधानि मात्राछंदांसि वर्णच्छंदांसि
मात्राछंदांस्यार्यादीनि । तत्रार्यास्वरूपं ' यस्याः प्रथ
दे द्वादशमात्रास्तथा तृतीयेपि । अष्टादश द्वितीये चतुर्थके
श सार्या ॥ १ ॥ ' अस्या एव भेदाः पथ्यादयोपि । तत्
गणैरेव तेषां स्वरूपम् ' आदिमध्यान्त्यगुरवो भजसाः
मः । [illegible] ॥ नको

गणाश्चतुर्लघूपेताः पञ्चार्यादिषु संस्थिताः ॥ १ ॥ ' यथा सर्वगुरु ऽऽऽ १ अंत्यगुरुः ॥ ऽ २ मध्यगुरुः ।ऽ। ३ आदिगुरुःऽ॥ ४ चतुर्लघु ॥॥ । यत्र गणत्रयमुल्लंघ्य यतिर्दलयोश्च सैव पथ्या स्यात् ॥ २ ॥ उल्लंघ्य गणत्रयमादिमंशकलयोर्द्वयोर्भवति पादः । यस्यास्तां पिंगलनागो विपुलामिति समाख्याति ॥ ३ ॥ उभयार्द्धयोर्जकारौ द्वितीयतुर्यौ गमध्यगौ यस्याः ॥ चपलेति नाम तस्याः प्रकीर्तितं नागराजेन ॥ ४ ॥ आद्यं दलं समस्तं भजेत् लक्ष्म चपलागतं यस्याः ॥ शेषे पूर्वजलक्ष्मा मुखचपला सोदित मुनिना ॥ ५ ॥ प्राक्प्रतिपादितमर्द्धे प्रथमे प्रथमेतरे तु चपलायाः ॥ लक्ष्माश्रयेत सोक्ता विशुद्धधीभिर्जघनचपला ॥ ६ ॥ आर्याप्रथमदलोक्तं यदि कथमपि लक्षणं भवेदुभयोः ॥ दलयोः कृतयतिशोभां तां गीतिं गीतवद्भुजंगेशः ॥ ७ ॥ आर्याद्वितीयकेऽर्द्धे यद्गदितं लक्षणं तत्स्यात् ॥ यद्युभयोरपि दलयोरुपगीतिं तां मुनिर्ब्रूते ॥ ८ ॥ ' इत्यादीनि बहूनि मात्राछंदांसि संति तानि च पिंगलादिभ्योऽवसेयानि । यतिर्विच्छेदसंज्ञक इति दलशकलावर्द्धपर्यायौ । लक्ष्म लक्षणम् । वर्णच्छंदसां च षड्विंशतिर्जातयः संति तदुक्तं वृत्तरत्नाकरे । ' आरभ्यैकाक्षरात्पादादेकैकाक्षरवर्द्धितैः । पृथक्छंदो भवेत्पादैर्यावत्षड्विंशतिं गतैः ॥ तदूर्द्ध्वं चंडवृष्टयादिदंडकाः परिकीर्तिताः । शेषं गाथास्त्रिभिः षड्भिःश्चरणैश्चोपलक्षिताः ॥ उक्तात्युक्ता तथा मध्या प्रतिष्ठान्या सुपूर्विका । गायत्र्युष्णिगनुष्टुप्चबृहती पंक्तिरेव च।त्रिष्टुप्चजगती चैव तथाऽतिजगती मता । शक्वरी सातिपूर्वा स्यादष्टयत्यष्टी तथा स्मृते ॥ धृतिश्चातिधृतिश्चैव कृतिः प्रकृतिराकृतिः । विकृतिः संकृतिश्चैव

सर्वगुर ध्यायाम् मो नारी प्रतिष्ठायां म्गौ चेत्कन्या सुप्रतिष्ठायां
तुर्लघु पंक्तिः । गायत्र्यांत्यौस्तस्तनुमध्या शशिवदनान्यो
स्या सा मोमः तत्सौ चेद्वसुमती । उष्णिहिम्सौगः स्यान्मद
दः नुष्टुभि भोगिति चित्रपदागः । मो मो गो गो विद्युन्माला
उभया जरौ लगौ।बृहत्याम् रान्नसाविह हलमुखी।पंक्तौ१०म्सौ ज्गौ
ना राडिदं मतम् । त्रिष्टुभि॥स्यादिंद्रवज्रा यदि तौ जगौगः ।
भजे जतजास्ततो गौ । कनकमंजरी नश्चरौ लगौ । चेदिंद्रवज्र
दित यस्यामुपेंद्रवज्राचरणानि च स्युः। तदोपजातिः कथिता
पल दा भवन्तीह चतुर्दशास्याः॥ दोधकमिच्छति भत्रितयाद्
आ ता रनभगैर्गुरुणा म्तौ गौ चेच्छालिनी वेदलोकैः
क्र यदि वार्ताहारी सनयागुरुयुगलं सौधांघ्रिः । मोनौ गावि
द्विती च मात्रा स्यादनुकूलाभतननगाश्चेत् । उक्ता सा मयदा
गीति रथपदामिह यदि नौ सोगौ उपचित्रमिदं ससंसलगौ॥जगत
तानि चत्वारोमावेदैर्वेदैर्विद्याधारः भवति च तामरसं नजजंयः
कला नभजयैः कालितं स्यात् । भवतीहसजयैः परितोया उक्ता
तयः लिका तसजसाः कीर्तितैवाचतूरेफिका स्रग्विणी भवति
स्रव मालती जरौ धीरैरभाणि ललिता तभौजरौ । नभजरैश्च
चं प्रियंवदः सगणोभौ रगणो यदि राधिका स्यादिंद्रवंशा
रणै जरौ । जतौ तु वंशस्थमुदीरितं जरौ । द्रुतविलंबितम्
। भरौ । ननभररचिताकथितोज्ज्वला प्रमिताक्षरा सजस
ति जसौजसयुतौ जलोद्धतगतिः चंद्रवर्त्मनि गदंति रनभसैः
॥ ला भवति भतनसाः इह तोटकऽमब्धिसकारकृतम् जव
यिमौक्तिकदाम मोदकमत्रभकारचतुष्टये अर्पितमदना

कारैर्गुरुर्दर्पमालास्यात् यदि सौ जरगाजगत्समानिकास्यात्
तौ रौ जगौ यदा स्युस्तदा पृषद्वती । उक्ता कनककेत
तसजाजगौ चेत् भसजसगा मयूखसरणिः स्यात् । उत
पंकजधारिणी मसजसा गः यदि सौ जसगाः कुबेरकुटिका । उत
प्रमोदतिलका तभजा जगौ प्रज्ञामूलं मभनयगणगाश्चेत्स्युः य
रौ विख्याता चञ्चरीकावलीगः । त्र्याशाभिर्मनजरगाः प्रहर्षिणीह
वेदैरंध्रैर्म्नौ यसगा मत्तमयूरः । सचतुष्टयगाविह तारकवृत्तम्
सजसाः सगौच कथितः कलहंसः।सजसा जगौ च यदिमंजुभाषिणी
मंजुमालिनीयदि रसौ सजौगुरुः।नगणयुगलमत्र रौगः प्रमोदः।कर्म
माह भकारचतुष्टयगौः उक्ता यदा तभसजगाः प्रभावती अशोकनाम
तरंप्रभावत्याः च नयुगलरजगुचेदशोकपुष्पम् । अखंडमंडनं त्रै
रजौग्वगरसैःजलधि नगुरुयदि हरिवानिता। शक्वर्य्याम् चत्वारो माग
चेत्स्युःस स्यात्संकल्पासारः।उक्ता वसंततिलका तभजा जगौ गः
द्विःसप्तच्छिदलोलाम्भौ गौ यदि चेत्स्युः भोजसनकारगगइंदुवदन
नयुगरसलगैः स्वरैरपराजिता । रौ तकारौ गुरू चेत्स्युर्यदा वभ्रूल
क्ष्मीः । प्रतिभादर्शनमुक्तं स भतनगागः । सभसाजोगुरुयुगलंचवंश
मूलम् । नासाभरणं तोयोभतलागश्चयदा । चूडापीडं मभनयगण
गागुर्वत्र तोनोनयगुयुगमिह पारावारः । सगणौ भगणौ गौ यदि
मन्मथनामा तोयोभगणौ गौ चेद्याति सा रतिरेखा । अतिशक्व
य्यीम् । क्रीडितकटका यदि भः सौ मौ रुद्रैर्वेदैः । मो भौ मौ
चेद्यादि चार्वटकं स्याद्दिग्भिर्वर्णैः म्रौ मो यो चेद्भवेतां सप्ताष्टैकश्चं
द्रलेखा । चित्रानामच्छंदः प्रोक्तं चेत्रयो मा यकारौ । ननमयययु
तेयं मालिनी भोगिलोकैः । इह पंचसकारकृता भ्रमरावलिका

याताणीभूषा ममतनमा यत्र दीपकवृत्तं भवति भतौ नस्त
कृतकलिाचंद्रं नागैरश्वैर्यदि चेन्मौ तयसाः मदनमालिका भव
उक्तनौ रौ यदा ॥ अष्टयाम् १६ विद्युन्मालापादौ यत्र स्या
उक्तचंद्रापीडम् । नजभजरैर्यदा भवति वाणिनी गयुक्तैः ज
यगणसगणगु शिशुभरणं स्यात् । आरभटी युगभगणनजा
गीहगाश्चेत् । कलधौतपदं सगणायदि पंचगुरुः स्यात् । उक्त
तम्वलयमिदं चेन्मभसभसागः भोगावलिरियमिह यदि तो
षणीसगाश्चेत् । सगणद्वयभौयौं च गुरुः प्रतापवल्ली स्यात् ।
कर्मत्तवसुलघुभिरचलधृतिरिह । अत्यष्टयाम् १७ मंदाक्रांत
नामरसनगैर्मों भनौ तौ गयुग्मम् । नसमरसला गः षड्वेदैः
नं श्रेणी मता । जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः ॥ भा
मार्गमभनरसला गुरुः श्रुतिषड्हयैः । इह यदि चेन्नजौ भ
गःगुरु नर्दटकम् । रसै रुद्रैश्छिन्ना यमनसभला गः शिख
वदनदिग्मुनिवंशयत्रयतितं भरनभनलगैः यदि वाणार्कैः स त
भ्रूलग्लौ विधुरविरहिता मो रो भो नस्तगौ गो भवति यदि
चवंशमरूपम् । चेद्रसजसया लगौ भवति बालविक्रीडितम् । न
गगणगगा यदा भवति वीरविश्रामः । धृत्याम् १८ मत्तकोकिलवृ
यदिवोहि रः सजजं भरौ स्याद्भूतत्वश्वैः कुसुमितलतावोल्लितात्मं
शक्यौ नजभजरैस्तु रेफसहितैः शिवैर्हयैर्नंदनम् । मात्सो जौ
ी मैयक्तौ करिवाणकैर्हरिणप्लुतम् । मः सो जः सतसा दिनेश
केश्वंशार्दूलललितम् । हीरकहारधरं भवतीह च षड्भगण
यथुगमौ भोमः सो यः स्युश्चेद्यदि मंजीरा फणिपेन प्रोक्ता व
लिकाजरी भवति यत्र नजौ भजौ जरौ । अतिधृत्यां १९

दूंलविक्रीडितम् । भवेच्छायावृत्तं यमनसतयुग्मं चेद्यदा गस्त
यत्र स्यान्मननससजगुरुकल्पलता पताकिनी । नयुगगुरुलघु
रंतरं यदा प्रपंचचामरम् । अश्वैरविभिर्यदा तो जतौ भनसगु वि
रणकीर्तिः । कृत्याम् २० ज्ञेया सप्ताश्वषड्भिर्मरभनयभलाश्चेत्सुव
ना । रसाश्वागैर्यो मो नयुगतयुगगा गस्तदा नाम शोभा । अंग
श्वागैर्मो मो नयुगतयुगमा गस्तदा भूरिशोभा । सभरा नो मयत
गुरुश्च । कथितं मत्तेभविक्रीडितम् । सौरभशोभासा
स्याद्भमतनसनला गुरु यदि चेत् । षड्भगणाश्च गु
यदि धीरविमानमिदं खलु वृत्तम् । प्रकृत्याम् २१ म्रभ्नैर्यां
त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम् । रो नरौ नरन
भवंति खलु यशसा कनकमालिका । इह सप्तसकारकृता फ
पप्राथिता भवति प्रतिमा सप्तभकारविनिर्मितकायमिदं तडिदंब
मत्र हि यकारा भवेयुर्यदा सप्तसा स्यात्फणीशोदिता विद्युदाली
अप्राकृत्याम् २२ मौ गौ नाश्चत्वारो गो गो वसुभुवनयतिरि
भवति हंसी । वनवासिनी सजजं भरौ नसला यदा दशरविपतिश्च
चतुर्भिर्यकारैस्त्रिभिश्चापि रेफैर्वीरैर्नीराजना गैकयुक्तैः । यदि
ति चतुःसगणा नयभा गुरु भवति स्वर्णाभरणम् । यत्र भवेयुर्भतन
तना मः सगणगुरू चेदर्भकमाला । विकृत्याम् २३ नजभ
जभा जभौ लघुगुरूवुधैस्तु गदितेयमद्रितनया । गोत्रगरीयो भव
यदा चेद्भगणस्तो नतनयनजा लगुरू सप्तभकारगला यदि सं
तदा भवति ह चकोरकनाम । सप्तभकारगुरुद्वयनिर्मितकायम
हि च मत्तगजेंद्रम् । भः सभसजा भो गुरुयुग्ममिह विलासवासना
मकवृत्तम्।सुनिमितनगणा लघुगुरूविरचिततनुरमरचमरी। कृत्याम

कारविनिर्मितमेव हि मेदुरदंतमिमं परिभावय द्रुतविलंबितवृत्त
द्वयं वदति शम्बरवृत्तमिदं फणी। अष्टरेफा भवेयुर्यदा तर्हि वृ
णीशोदितं नाम गंगोदकम्। वेल्लितवेलमिदं फणिगीतं यत्र च
यमसनयुगलसाः। भद्वयसद्वयमिह नौ च समौ फणिपतिर्भा
मिदं धौरेयम्। रो जरौ मकारकौ जरौ मश्चेत्सा भोगींद्रेण वं
न्नता निर्दिष्टा। अतिकृत्याम्२४भो नजयभननसा गुरुरेको भा
रमिदमिति। यदि च भवेयुः ननससभतनसगा इह चेत्स्युर्भ
य यदिरसिकरसाला। अष्टरेफा भवेयुर्गुरुश्चापि चेद्वृत्तमेत
द्रीणहैयंगवीनम्। चित्तचिंतामणिः स्यान्नवाष्टवसुभिरत्र रेफत्र
जतौ तौ च गुः।चेद्यदारनचतुष्टयं गुरुरपि स्फुटं भवति भाविनी
सितम्। उत्कृत्याम्॥ २६॥ यत्राष्टौ मास्स्युश्चेद्गौ च स्य
जीमूतध्वानं नूनं नागाधीशो ब्रूते तद्वृत्तम्। चेद्भगणाष्टकमंत्यगु
यमत्र यदा भवति प्रियजीवितवृत्तम्। सगणाष्टकमंत्यलघुद्व
तदवेहि वशंवदनामकमेव हि। नयुगसमनजरजा गौ चेद्या
तिरियं तदेति वक्ति सर्पराजः। भवति विरामवाटिका यदि
न्नजरसना जरौ नलौ गुरू च तदा वृत्तं स्यादिह सूरसूचकमि
समजाः सगणत्रयं चेद्यकारौ लगौ वाणैस्त्रिस्वरैश्चेद्विरामो यदा
यत्रयं रौ च तौ गौ विश्वविश्वासवृत्तम्। इति समवृत्तैकदेश
नम्॥ अर्थात् समवृत्तविषमवृत्तान्यपि कतिचिदत्र दर्शयाम
अंघ्रयो यस्य चत्वारस्तुल्यलक्षणलक्षिताः। तच्छन्दःशास्त्रत
ज्ञाः समं वृत्तं प्रचक्षते॥ प्रथमांघ्रिसमो यस्य तृतीयश्चरणो भवे
द्वितीयस्तुर्यवद्वृत्तंतदर्द्धसममुच्यते॥ यस्य पादचतुष्केपि ल
भिन्नं परस्परम्। [illegible]

सौ सलगा विषमे दले भत्रितयं युजि गावुपचित्रा ॥ ३ ॥
लोमे वहित्रा ॥ ४ ॥ विषमे प्रथमाक्षरहीनं दोधकमेवहि वेगव
स्यात् ॥ ५॥ विलोमे वर्गवती ॥ ६ ॥ अयुजोर्यदि सौ सगौ युज
सभरालगौ ननु सुंदरी मता ॥ ७॥ कोरकिता विषमे भगणा
भवति समे चेत्कुसुमविचित्रा ॥ ८ ॥ विलोमे पाटलिका ॥ ९
पादे विषमे तजौ रगौ चेदन्यस्मिन्मनजरगाः शुकावली स्या
॥ १० ॥ विलोमे किंशुकावली ॥ ११ ॥ आख्यानकी तौ जगुरू
मोजे जतावनोजे जगुरू गुरुश्चेत् ॥ १२ ॥ जतौ जगौ गो विष
समे स्यात्तौ ज्गौ ग एषा विपरीतपूर्वा ॥ १३ ॥ तोजोविषमे र
यदा चेत्सभराजश्च गुरू समे विलासवापी ॥ १४ ॥ स्यादयुग्म
रजौ रजौ समे च जरौ जरौ गुरुर्यदामरावतीयम् ॥ इत्यर्द्धसम
त्तैकदेशः । प्रथमे सजौ यदि सलौ च नसजगुरुकाण्यनंतरम् ।
द्यथ भनभगास्स्युरथो सजसा जगौ च भवतीयमुद्गता ॥१॥ न
सकारयुगलंच भवति यदि चेत्तृतीयके अहिपतिभणितमिदं ल
यदि शेषमस्य सकलं यथोद्गता ॥ २ ॥ त्रयमुद्गतासदृश
पदमिह तृतीयमन्यथा जायते रनभगैर्ग्रथितं कथयंति सौरभ
मनीषिणः॥३॥नगसगणाश्चेत्प्रथमे जतौ भगौ च द्वितीयपदे।भो म
कारौ चापि ततः स्तो जो रगगं वरार्थिनी तुर्ये॥४॥आदौ चेन्मनभ
गुरुर्यदा नगणयकारौ जभौ ततौ गुरुयुग्मम् । तो नो रनगणगास्
तीयचरणेनोदिष्टा मनजनया भवति च चतुर्थे॥५॥इति विषमवृत्त
देशः ॥ पंचमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः । षष्ठं गुरु यथावस्
मयं श्लोकः प्रकीर्त्तित इति । अस्य भेदाः पिंगलादितोवसेया
अथ दंडकाः । नगुणयुगलमत्र चेत्सप्त रेफास्तदा दण्डकश्चण्

नरौ रजौ रजौ रजौ रजौ रसंयुतौ यदा तदा भवेत् ॥ ३ ॥ नवां
सगणैः परिवक्ति फणावदधीश इदं नियतं कुसुमस्तबकम् ॥ ४
नंदसंख्यैश्च रेफैः फणाभृत्पतिप्रोदितो मत्तमातंगलीलाकरो
डकः ॥ ५ ॥ यदि च निजेच्छया विरचितलघुगुरुर्यथायतिभवत
तंगशेखरः ॥ ६ ॥ शेषप्रोक्तं स्वेष्टप्रोतं कुसुमितकायं मितकायं
काममायं यंत्रितस्वकायं गणसमुदायं कृतयतिदायं द्विमतनता
सजनानां रभसानां सभसानां भसभानां सभतानां यसभानां त
सानां दधदपि भननगगानाम् ॥ ७ ॥ अन्यथापि कवीच्छातो यः
विरचितैर्न्यस्तैः॥भवंति दंडका भव्या गुच्छकाद्यर्थनामकाः॥इति
अथ गद्यानि । स जयति जगतां विधाता समस्तं येन पालि
भुवनं तस्मै नमोऽस्तु सततम् ॥ एतन्मुक्तकनाम गद्यम् । अ
नंदनंदनजननाकर्णनजातानंदसंदोहशबलमानसाः सकलतद्देश
सिनः किल बभूवुः सर्वाः सरूपा अपि निरुपमरूपाश्च श्रुतिरू
गोप्यः स्नेहाकूपारप्लवनव्यापारपरवशांतःकरणाः स्वर्णमणिगणभू
णदुकूलांजनप्रभृतिभूषितविग्रहा गृहात्परिगृहीतमांगल्यसाहित्य
प्रत्याहिततद्दर्शनाभिलाषा मंगलं प्रबन्धं गायंत्यस्सानंदं नंद
दनमभिससुः । एतच्चूर्णकनामकम् । जयतु भुवननाथः प्रार्थ्यमा
सुरैर्वैरवनतांसलांसैः प्रकृतमनुविधेयतत्कर्मप्रयुक्तमानसैः स्व
रिरक्षणदक्षतामनुविचिंत्य स्वार्थार्थवाहपरिचारकत्वमवगम्य कृप
लुतैकनिधिरधिभवनमनिशम् । एतद्वृत्तगंधिनामकम् । अ
तालवनगमनमनुभूय सायमसौ भगवान्कृष्णः सकलवनविहारि
शृंखलविजृंभितकुतूहलिना महाबलिना बलदेवेन सहासादितगोष्ठ
गणद्वारस्तद्गुणवर्णानुरूपामात्मजां दातुमिव भाविजामातुः सु
मां मातुमंबरतलं विहायागतेन भगवता भासांनिधिनाऽद्दस्क

जोविशेषेण तेन तैजसद्वयेन हृद्गतदिवसविरहभरतापं सूचयंत्य प्रवृद्धप्रेमप्रपूरप्रपंचप्रसंगेन पयोधरद्वयादिव नेत्रपयोजद्वयाद पि पयःपूरं परित्यजंत्याऽत्युत्पुलकाङ्ग्या मात्रा यशोदया कृत नीराजनो व्रजजनतामोददः स्वस्वस्थानविनिवेशितगोधनस्तज्ज न्मसमयपयोदानुषंगेण प्राप्तं कालिमानं दुग्धेन परिहर्तुं समागतेन धृतशांतवेषेण शेषेणेव दोष्णा कृतधेनुसेवनो व्रजावनो बन्धुत्वेन कनकेंद्रदृषढासनावस्थिततपनबिम्बे स्वास्मिन्निवनिजोत्पत्तिकार णजातं शीतलिमानं विधातुं विहितप्रयासस्य सुंदरपयोभवयुग्म स्य शंकामुद्भावयन्नूरुयुगलमध्यवर्तितपनीयदोहनपात्र आरब्धदो हनस्त्रिलोकीमोहनः पाततलदोहधाराघातरवामिश्रितगोपीगृहीतव त्सलेहनचलद्ग्रीवाघण्टाभरणराणितसहवर्तिमहाककुत्कलितपृष्ठदे शदृढमहोक्षपरिवृढगर्जितनिरंतरितकाष्ठावकाशो व्रजयुवतिधृताशी विरजस्कीकृतांगो जननीसमर्पितसपायसरसस्वन्नैरवसायितसायं तनाशनकृत्यो व्रजे स्वल्पशशिकल्पतल्पप्रसूनपरिमलपरिमलि तनिकुंजसदने विहारं विरचय्य सुखेन सह सावकाशं तस्थौ इत्यादि रचनाविशिष्टागद्यविशेषा उत्कलिकाप्रायनामकाःसन्तीत्यलम्।अथ वर्णमात्राप्रस्तारयोरादौ मात्राप्रस्तारमाह। आदौ विलेख्या गुरवः प्र स्तार्यास्ताः समा यदि।आदौ लघुरथान्ये च गुरवो विषमा यदि॥ १॥ प्रथमगुरोरधरे लघु दत्त्वा शेषं समानमितरेण ॥ उद्वृत्तं गुरुलघुवा

द्विकलस्य	त्रिकलस्य	चतुष्कलस्य	पंचकलस्याष्टौभेदाः ८
ऽ ॥ २	।ऽ ऽ। ३ ॥।	ऽऽ ॥ऽ ।ऽ। ऽ॥ ॥॥	।ऽऽ ऽ।ऽ ॥।ऽ ऽऽ। ॥ऽ। ।ऽ॥ ऽ॥। ॥॥।

षट्कलस्य त्रयोदशभेदाः

प्रस्तारः सर्वलघुर्यावत्।तद्यथा।एककलस्य प्रस्तारो न भवति
द्विकलस्य प्रस्तारः त्रिकलस्य चतुष्कलस्य पञ्चकलस
भेदाः षट्कलस्य त्रयोदश भेदा एवमग्रेपि । अथमात्रोद्दिष्टवि
दत्त्वा पूर्वयुगांकं गुरु शीर्षांकं विलुप्य शेषाङ्के । अंकैरितोवा
शिष्टैरुद्दिष्टं मात्रोद्दिष्टम् ॥१॥ तद्यथा। षट्कलप्रस्तारे एको गु
लघू एको गुरुः ऽ।।ऽ एवमाकारो भेदः कुत्रास्तीतिप्रश्ने कृ
युगलांकान् लिखेत् १ २ ५ ८ द्विमात्रस्य गुरोरूर्द्ध्वं पूर्वं पञ्च
लिखेत्।गुरुशीर्षांकं शेषांकं९शेषांके १३ विलुप्योर्वरितम् ४तः
ऽ।।ऽ २ ५ १३ षट्कलप्रस्तारे चतुर्थस्थाने ये ऽ।।ऽ भेद इति वाच्यम्
पञ्चकलप्रस्तारेपि।।ऽ। अयं भेदः कथित इति पृष्टेंकान्विलिख्य
गुरुशीर्षांके ३ अन्त्यैंके ८ लुप्ते शिष्टम् ५ पञ्चमो भेद इति वा
तथा चतुष्कलप्रस्तारे ।ऽ। अयं भेदः क्व स्थाने इति पृष्टेंक
स्थाप्य गुरुशीर्षांके २ त्यांके ५ लुप्ते शिष्टं तृतीयोयं भेद
वाच्यम् । अथ मात्रानष्टविधिः॥नष्टे कृत्वा कलाः सर्वाः पूर्वयु
कयोजिताः ॥ पृष्टांकहीनशेषांकं येन येनैव पूर्य्यते ॥ १ ॥
कलामुपादाय तत्र तत्र गुरुर्भवेत् । मात्राया नष्टमेतत्तु फणि
भाषितम् ॥ २ ॥ यथा षट्कलप्रस्तारे द्वितीयस्थाने कीदृशो
इति षट्कलाः स्थापनीयाः । तदुपरि पूर्वयुगलसदृशा अंका दे
तदुपरि पूर्वयुगलसदृशा अंका देयाः १२३५१३ ।।।।।। शेषांके १३ पृष्ट
लोपे सत्यविशिष्टांकाः ११ भवन्ति तत्र ११ अव्यवहिता
पेऽवशिष्ट३मष्टांकस्थानीयकलापरकलया गुरुत्वं याति शेषांक
पञ्चाङ्कलोपस्याशक्यत्वात् त्र्यंको लुप्यतेऽवशिष्टम्०तृतीयाम्
परामुपादाय गुरुः शिष्टांकात्० [illegible] लोपयितं न श

ङ्कतः १३ पृष्टांक १३ लोपे शिष्टं० ततोऽपरांकलोपाभावात्स लघव एवे ।।।।।। त्यवसीयते। चतुर्दशादिप्रश्ने चांकलोपाभावादस

अथ टकारपंक्तेः । टष्टंकष्टंकणं प्लीहा मूत्रकृच्छ्रोऽथ पिप्पलः । टा शूर्पष्टिः करेणुर्भूः सरमा टीर्धराधरः ॥ ३४ ॥ टुः कंकणोऽथ चूडः स्याट्टूर्ननांदा स्वसा च भीः ॥ टेः काणष्टैर्द्विडन्धः स्याट्टैः प्रेतो नभसी हयः ॥ ३५ ॥ टोः परेतो गुरुः शिष्यष्टौर्विनीतो दवो वृषः ॥ टं नेत्रं श्रवणं पात्रं भ्रमणं मरणं तथा ॥३६ ॥ टः प्रागुक्तोऽपि दुःशब्दो घंटाशब्दश्च ध्वन्यते ॥

ठठाठिठीठुठूठेठैठोठौठंठः ॥ १२ ॥

अथ ठादेः । ठो ध्वंसो नंदनश्चैव ज्ञानी मध्वरिरेवच ॥ ३७ ॥ वाचालः शून्य आसारष्ठा शून्या मासिकेऽथवा ॥ ठिः कुमारो-

ठं ज्ञानं विवरं शून्यममृतं शारदं पयः ॥ ठः प्रागुक्तोऽपि ग्निरग्निशस्त्रध्वनिस्तथा ॥ ४० ॥

डडाडिडीडुडूडेडैडोडौडंडः ॥ १३ ॥

अथ डादेः। डः पूज्यो बहुमूल्योऽर्थो डा क्ष्मा च सरमा रमा॥ डीः शिवा धात्री डुश्चंद्रो डूः कलापवान्॥४१॥ डेर्दमो डैर्वृषः डोः पापी पुरुषादकः ॥ डौर्धेनुश्च करो जारो डं च नेत्रं पय ॥४२॥ डः प्रागुक्तोऽपि डयने भये चैव भयानके ॥

ढढाढिढीढुढूढेढैढोढौढंढः ॥ १४ ॥

अथ ढादेः । ढो ढक्का रासभश्चैव श्वादमार्ज्जारकुक्कुराः ॥ ४ ढा नाभिर्ढिर्गुदो मेढ्रो ढीर्धूमो वह्निरुत्कटः ॥ ढुः कूर्मः सूकरो लो ढूः कुचे ढेः कुरंगजः ॥ ४४ ॥ ढैर्मारो ढोः सुखी वर्षो ढौ पयोंबरम् ॥ ढः प्रागुक्तोऽपि गमनी रमणी रमणोत्सुकः ॥ ४

णणाणिणीणुणूणेणैणोणौणंणः ॥ १५ ॥

अथ णादेः । णो मत्स्यो बहुविस्तारो णो निषेधावधिर्वि णो नक्रो णा सदाव्याधिर्णा नाभिर्णिर्वृकोदरः ॥ ४६ ॥ स्वर्गो णुः करेणुर्भूर्णूः कालिन्दी जराजरा ॥ णेर्मार्जारो विडंगः शृगाली हरीतकी ॥४७ ॥ णोः सर्षपोऽथ णौर्माया णं दर्शनमि तम् ॥ णः प्रागुक्तोऽपि संशोषी नमस्कारोनमस्कृतः ॥ ४८ ।

ततातितीतुतूतेतैतोतौतंतः ॥ १६ ॥

अथ तादेः । तः सुवेशोऽथ ता मारी तिर्मेपः कपिलोरु तीर्ज्ञानी तस्करस्तैलं तृष्णा च तुरुमेश्वरः ॥ ४९ ॥ तूर्म्लेंच्छ करी तरुरुत्तैः कृष्णाभीरुश्च मगः ॥ तोः सर्पो निराकृत्याणी

थथाथिथीथुथूथेथैथोथौथंथः ॥ १७ ॥

अथ थादेः । थः स्थायी ठक्कुरः सूर्यो गणेशो विनतासुतः ॥ था धरित्री प्रभा गंगा थिर्गोदा यमुना तथा ॥ ५२ ॥ थीः समुद्रो व्रणो रेवा थुःसाक्षी थूः पराशरः॥ थेर्व्यासस्थैः शुकः प्रोक्तस्थोर्धर्मो गाधिपुत्रकः ॥५३॥ थौः शंखस्थं विषं कर्म बहुलं सूक्ष्ममेवच ॥ थः प्रागुक्तोऽपि स्तंभः स्यात्स्थाणुदेवस्तदाश्रयः ॥ ५४ ॥

ददादिदीदुदूदेदैदोदौदंदः ॥ १८ ॥

अथ दादेः । दः पाता खंडिता दाता दा दात्री धरिणी शुभा ॥ दिर्दीनो दीः सुधानाथो दुर्दरिद्री करो वरः ॥ ५५॥ दूर्दुःखी देः स्मृता जाया दैर्मत्स्यो वामनर्षभः ॥ दोर्हस्तश्चरणः शिश्नो दौः स्वर्गः प्राण आत्मजः ॥ ५६ ॥ दं दानं शरणं कर्म भव्यं न्यून मकिल्विषम्॥दः प्रागुक्तोऽपि दध्याढ्यो दमी दानी दयापरः ॥५७॥

धधाधिधीधुधूधेधैधोधौधंधः ॥ १९ ॥

अथ धादेः । धो धर्मी धनवान्धन्यो धाता विष्णुर्विनायकः॥ धा धरित्री रमा गौरी धिर्धर्मो धीर्वृकोऽसुरः ॥ ५८ ॥ धुः सूनुर्धूः करो भारो धेर्वृक्षो धैश्च रावणः॥ धोः पापी वृषणः पूषा धौर्धर्मः पृथिवी गिरा ॥ ५९ ॥ धं धनं धूननं दानं धारणं करणं सुखम् ॥ धः प्रागुक्तोऽथ धम्मिल्ले बंधो धन्वंतरिर्मृगः ॥६०॥

ननानिनीनुनूनेनैनोनौनंनः ॥ २० ॥

अथ नादेः । नो नाट्यज्ञो नलो नम्रो भावो नस्यो नरांतकः ॥ नानारिमप्यहेऽपि ना पुमान् गरिमा तथा ॥ ६१ ॥ निर्दु-

पुरुषोमरः ॥ नं नेत्रमंजनं श्रोत्रं करणं कारणं सुखम् ॥६३
प्राग्युक्तोऽथ नो नीचो नरवेषधरोऽपरः ॥

पपापिपीपुपूपेपैपोपौपंपः ॥ २१ ॥

अथ पादेः। पः पापी पालको गंता पूषा वृषण आत्मजः।
पाऽपर्णा पिः पवित्रोऽग्निःपी स्मृतार्थं पिपीलिका ॥ पुः पु
पुरं देहः पेः पेशी पैश्च गालवः ॥६५॥ पोः पौत्रः पौः पुमा-
पं प्रमाणमृणं पयः ॥ पः प्राग्युक्तोऽपि पो विष्णुर्नृपो
पिता गुरुः ॥ ६६ ॥

फफाफिफीफुफूफेफैफोफौफंफः॥ २२ ॥

अथ फादेः। फः फणी फलदो वृक्षो फल्गुः फो माघ ईरित
फालिका च फा जालं फा फूत्कारवती विषा ॥ ६७ ॥ फिः
विबुधे प्रोक्तः फीर्वायुःकरणोऽनलः॥फुः कार्त्तिकोऽथ फूः सर्पो
शरणागतः ॥ ६८ ॥ फेः फाल्गुनोऽथ फैः शंखः फोः काल
फणीश्वरः॥गर्गो द्रोणो रणःप्राणः फं फल्गु चारु वा स्मृतम्।
फः प्राग्युक्तो भाष्यकर्त्ता–

बबाबिबीबुबूबेबैबोबौबंबः॥ २३ ॥

अथ बादेः। बो बिंबो बा च नर्मदा ॥ बिःपूर्णो बीर्बहु-
बुर्भयं शरणं हारिः ॥ ७० ॥ बूः क्लेशः कपिला धेनुर्बेः सा
कणो रणः॥ बोः प्राणो बौः सरिद्गंगा यमुना बं बलं स्मृतम् ॥
बः प्राग्युक्तोऽपि बलवान्बलिर्दैत्येश्वरो वटः ॥

भभाभिभीभुभूभेभैभोभौभंभः ॥ २४ ॥

भीतिस्स्याद्भुर्भुजंगोऽथ भूर्मही ॥ ७३ ॥ जाताजातश्च भेः कांतिर्भै-र्ब्रह्मा वरुणो यमः ॥ भैः प्रहारोऽथ भीरुः स्याद्भोः कंसो भौ रमापतिः ॥ ७४ ॥ भं नक्षत्रं भयं ब्रह्म भरणं धरणं यमः ॥ भः प्रागुक्तो भराक्रांतो भवभीतो भवानुगः ॥ ७५ ॥

मममामिमीमुमूमेमैमोमौमंमः ॥ २५ ॥

अथ मादेः । मो महेशोऽथ मः स्तोमः सोमो रामो रणो गजः ॥ मा जालंध्री व्यथा लक्ष्मीर्माता मा मास ईरितः ॥ ७६ ॥ मिः कर्णो मीर्महाबाहुर्मुर्माता मूर्महाबलः ॥ मेः सारंगोऽथ मैः पूषा सारथिः प्रणतोवरः ॥ ७७ ॥ मोः पत्नी मौः सुरावासो मंगलं मलिनं पलम् ॥ मः प्रागुक्तोऽपि मतिमान्मणिवेधकरः पुमान् ॥७८॥

ययायियीयुयूयेयैयोयौयंयः ॥ २६ ॥

अथ यादेः । यो यज्ञश्चैव यस्तोयं सुदेवीसूनुरीश्वरः ॥ या योनि-र्यिश्च संग्रामो यीर्गजः सारविद्रुमः॥७९॥युः सर्पोयूः स्मृता यूका येः सार्थो यैश्च वासवः ॥ योर्यादो यौः कणः स्वर्गो यं यत्नः करणं मधु ॥ ८० ॥ यः प्रागुक्तोऽपि यमराड् यमी यमलजः पुमान् ॥

ररारिरीरुरूरेरैरोरौरंरः ॥ २७ ॥

अथ रादेः।रो रमेशोऽथ रः कामो वह्निः सूर्योऽथ तोयधिः॥८१॥ रा लक्ष्मी राः समृद्धिः स्याद्रिः कर्पूरो महेश्वरः॥रीः कामी नृगपत्नी री रुर्मृगो रूः प्रजापतिः ॥ ८२ ॥ रेः खेदो नीचसंबुद्धी रैः कृष्णो वर्ण उच्यते । रोः शेषो रौर्भवः स्वर्गो रं रत्नं रोधनं धनम् ॥ ८३ ॥ रः प्रागुक्तोऽपि रक्ताढ्यो रजनीपतिरेव च ॥

ललालिलीलुलूलेलैलोलौलंलः ॥ २८ ॥

ला शोभा ला च ललना दात्री रात्री वसुंधरा ॥ लिः सर्पो ली लुर्भूर्लू रुद्रो गरुडोऽरुणः ॥ ८५ ॥ लेर्लैष्टो लैः कुशो रामो त्स्यो लौःप्रजापतिः ॥ लं लक्षणं सुखं नाम रक्षः श्रोत्रं विषम् ॥ ८६ ॥ लः प्रागुक्तोऽपि लगुडो ललामाढ्यश्च लोल

ववाविवीवुवूवेवैवोवौवंवः ॥ २९ ॥

अथ वादेः । वो ग्रामो वातकी वालो वारुणीपानतत्परः॥८ वनसेव्यथ वः पंगुर्वा सखी त्रिदशप्रसूः ॥ विः पक्षी गरुडः स्र जलधिः सोम उच्यते ॥ ८८ ॥ वीर्विष्णुर्वुःपदातिः स्याद्वूः संयं उच्यते ॥ वेः पारिजातो वैः सारो वोः कालो वौः सुखा ॥ ८९ ॥ वं सुरं वसनं रक्तं वपुर्वचनमासुरम् ॥ वः प्रागुक्तो बधिरो वणिक्पुंजो वनालयः ॥ ९० ॥

शशाशिशीशुशूशेशैशोशौशंशः ॥ ३० ॥

अथशादेः । शःशरण्यश्शवः शंभुः शा गौरी कमलालया॥ पक्षी शीश्च सौभाग्यं शिशुः शुः शीकरो बलः॥९१॥ शूः शूद्रः शिरीषोऽगः शैः स्मृतो धुंधुहा नृपः ॥ शोर्दोषः शौः शिशुः शं शं सुखं शरणं वपुः ॥ ९४ ॥ शः प्रागुक्तोऽपि शमकः शमी श जनालयः ॥

षषाषिषीषुषूषेषैषोषौषंषः ॥३१॥

अथ षादेः । षो वालः पादहीनो ना वह्निः सूर्यो र कणः ॥ ९३ ॥ परिखा षा खरी षा वा षिः शंखो वर्तु स्मृतः ॥ षीः पुत्रः षुः खुरः प्रोक्तः षूः सोमो म्लेच्छ एव च॥ ९६ षेः सार्थः षैः स्वरः पारः षोर्देहो मलिनो जनः ॥ षौः खड्गा धर

ससासिसीसुसूसेसैसोसौसंसः ॥ ३२ ॥

अथ सादेः । सस्सर्वजनपाता च सर्वज्ञः सुलभो रविः ॥ ॥ ९६ ॥ सा साक्षिणी च साटी च सा सीता सिस्सखामरः ॥ सीः सुखी सुः कुठारोऽर्कः सूर्धरा गर्भिणी तरी ॥ ९७ ॥ सेः करः सैः शुकः श्वादः सोः सोमः सौः सहोदरः ॥ सं सुखं चरणोपांतं मुख्यं श्रेष्ठं समेतरम् ॥ ९८ ॥ सः प्रागुक्तोऽपि संतानी सर्वमान्यः सहोदरः ॥

हहाहिहीहुहूहेहैहोहौहंहः ॥ ३३ ॥

अथ हादेः । हो हरिर्हरिणो हर्षो हिरण्याक्षोऽथ तस्करः ॥९९॥ हा गंधर्वश्च हिः सर्पो हीर्नरो हर्षवान्मृगः ॥ हुः स्मृतो नहुषो राजा हूर्विप्रो हेः प्रसादकृत् ॥ २ ॥ हैर्हंसो होश्च संबुद्धो हौर्विरञ्चिः षडाननः ॥ हं चौर्यं हरणं पूर्णं भासुरं भरणं भरम् ॥ १ ॥ हः प्रागुक्तोऽथ पंचास्यो हनुमानंगदस्तथा ॥ लं तु ज्ञेयं परं ब्रह्म वाङ्मनोगोचरं सुखम् ॥ २ ॥

क्षक्षाक्षिक्षीक्षुक्षूक्षेक्षैक्षोक्षौक्षंक्षः ॥ ३४ ॥

अथ क्षादेः । क्षःक्षांतः क्षा मही सीता क्षिज्योतिः क्षीर्हुताशनः ॥ क्षुः क्षुद्रो वासवो वार्कः क्षूः पापिष्ठः प्रणाशनः॥३॥क्षेः कर्षुकोथ क्षैर्मूर्खो जारः क्षोः क्षुरको व्रणः ॥ क्षौः खंजो धरणीधर्ता क्षं क्षेत्रं क्षं पयो मधु ॥ ४ ॥ क्षः प्रागुक्तोऽपि क्षत्रेशः क्षमी क्षयहरो हरिः ॥ ५ ॥

मालेयं मातृकावर्णैः कृता सौभरिणा पुरा ॥ विस्तृतांगिरसा भूमौ विद्वत्संप्रसादनी ॥ अनेकार्थप्रदा ...

अत्र लस्य द्विःकथनं मतांतरेणैव ज्ञेयम् । यद्यपि क्षका
द्यक्षरादिप्रकरणे कथनमुचितं तथापि क्षकारेतरद्यक्षराणां
कानन्तर्भावबोधनायैहैव न्याय्यमिति ध्येयं मनीषिभिरिति।
षां कादिशब्दानां क्रियायोगेन प्रत्येकं कारकत्वमप्यत्रानुसंध्ये
तथाहि। कस्तिष्ठति कौ हरिं पश्यतः। का गच्छंति वृंदावन
कं पश्य कौवा कान्वा हेरामेति श्रीबलदेवं प्राति श्रीकृष्णोक्तिः।
काभ्यां कैर्वा धनुर्भिन्नम्। काय काभ्यां केभ्यो वा कन्या देय
कात्काभ्यां केभ्यो वा धनं नेयम्।कस्य कयोः कानां वेदं सर
कयोः केषु वा सद्बुद्धिः कार्येति॥१॥एवं का गच्छाति के तिष्ठतः
मंतीति टाबन्तवद्रूपं सर्वं नेयम्। तथा किरायाति श्रीरामं नेतुं
द्रूपाणि हरिवद्धयेयानि कीर्गच्छति। क्यौ स्थितौ।क्यः सुंदराः
पश्य। बहुत्वे कीन्पश्य। क्या सहाश्वो गच्छति। क्ये की
कीभ्यो वा माला देहीति।क्यः कीभ्यां वा सृणिं गृहाण। क्यः
कीनां वा स्थानमिदम्। की क्योः कीषु वा महामात्रास्तिष्ठति।
वराहेणोद्दध्रे। कूशोभने स्तः। कवो व्रजस्था रम्यास्संतीति भ
वद्रूपम् ॥ कूश्चक्रेण वारिता क्वौ क्वो वा। चतुर्थ्यां क्वे पंच
क्वाः षष्ठ्यां क्वाः क्वोः कूनां वा फलं हरिभक्ते सुधा क्वा
ङौ तत्र न भयं हरिसेविनामिति। एवं केरुदयते कयौ कयो वा
श्य कया केभ्यां केभिस्तमांसि हतानि।कये केभ्यो वाऽर्घो दे
कयः काभ्यां केभ्यो वा तिमिरनाशो दृष्टः। कयः कयोः कयां
तेजो दुःसहम्।कयि केषु रोगघ्नताविस्रंभो विदुषाम्। एवं कैः शु
विप्रास्तिष्ठति कायौ कायो वा कायं कायौ कायो वाऽऽनम
काया कैभ्यां कैभिरिदं पावितम्। काये धनं देहि। कायः श
पठेत्। कायः कायोः कायां वाऽवहेलनं न कार्यम्। क

कवो वा कवं कवौ कवो वा त्यज।कवा कोभ्यां कोभिर्वा न किञ्चित्साहाय्यं कर्तुं शक्यते विनांगकाइर्यम् । कवे कोभ्यो वा स्वस्वांतं मादेहि।कवो धैर्य्यं मात्यज।कवः कवोः कवां वा स्वभाव एव धीमंदीकरणम् । कवि कोषु वा विवेकी न तिष्ठति । कौ वृष आयाति कावौ कावो वा कावं पश्य कावा कौभ्यां कौभिर्वा मही धार्य्यते । कावि कौषु नाराहेणं कार्यम् । एवं कंजलं पिवति कमी कमि वा द्वितीयायां पश्यतीति योज्यम् । कमा कंभ्यां कंभिरूष्मा ह्रियते । कमे पुष्पं देहि गच्छ । कमः कमोः कमां वोष्णतापाकरणमेव स्वभावः । कामि कंसु वा निजांगमलमाक्षिप । अकारांतत्वपक्षस्तु कुलशब्दवन्नेयः। एवं का हिंसकः कंसः भागिनेयान्मारयामास कसौ कसो वा । द्वित्ववहुत्वप्रयोगः कल्पांतरीयतदभिप्रायको वोध्यः । कसं कृष्णो जघान कसौ कसो वेति पूर्ववज्ज्ञेयम् । कसा कोभ्यां कोभिर्वा कारायां देवकी नीयते । कसे कोभ्यो वा नारदो वोधितवान् । कसो मा विभीहि मातरिति जन्मकालीनश्रीकृष्णोक्तिर्देवकीं प्रति । कसः कसोः कसां वा केशान्कृष्ण आदत्त । कसि कस्सु धर्मो नास्तीति रीतिःखादिक्षान्तेषु वर्णेषु वोध्येति। अथ द्व्यक्षरादिसंयोगवतामप्येषां सौभर्युक्तिमनुलक्षीकृत्यैव व्याख्यानं कुर्मस्तत्रादौ पुंस्त्वादिचिह्निताँल्लकाराद्याढ्यवर्णान्ककारादीन्द्वादशक्रम विनिर्मुक्तानाह । क्लः कणः क्ला धरा क्लिधीः क्लुः पुत्रः क्लूर्हुताशनः ॥ क्लौः कलापी स्मृतः क्लं तु वृत्तं साधुसमीरितम् ॥ १ ॥ क्लः सिक्तो वरुणोपि क्लः क्ला दुर्गा मातृका गिरा ॥ क्लिः सूर्यः क्लीः स्मृतो वह्निः क्लुः सूनुः सोम एव च ॥ २ ॥ क्लौर्लक्ष्मीः क्लं वरं ज्योतिः क्लः सिंहो हरिणो गजः ॥ क्लोः सखी सरमा दुर्गा क्लिः कृष्णो वरुणो

नं दुःखं क्तो दैन्यं कर्ण उत्सवः ॥ क्ता रमोमा मही भित्तिः
सूकर उरुक्रमः ॥ ५ ॥ क्रुः शिवोऽर्कोऽम्बुधिः शूद्रोऽमरः क्रूः
रात्महा ॥ क्रं श्रोत्रं करणं क्लीवं क्यं कामः कमलाहितः ॥
क्या रतिः कामपत्नी स्यात्क्यिः कामी क्यी रतीशवान् ॥ क
क्यूः स्वभूः शंखः सूकरः क्योः कजालया ॥ ७ ॥ क्यं कर्म
पलाशाग्निरर्कः क्यो रेणुरुच्यते ॥ ख्यः खरोऽग्निः खरी ख्या
द्र्यो मार्गः कमलासनः ॥ ८ ॥ ग्याऽधोनिघृस्वनो घूको घ्या
धरणी स्मृता॥च्यश्चयश्चातुरी च्या स्याच्छ्यो रागश्छ्या च
ती ॥ ९ ॥ ज्यो जयो यजमानश्च ज्या जया सिंजिनी रमा ॥
नदोग्धा नदी प्रोक्ता झ्या कुवृष्टिर्धरासुता ॥ १० ॥ ड्यो ना
नलो ड्या ड्यौड्यौं दाडिमतरुः करः ॥ ढ्या रमा नर्मदा गं
आढ्यः शिशुरुत्करः ॥ ११ ॥ ढ्या मही ण्यः स्मृतोऽ
शरण्यो ण्या नदी गिरा ॥ त्योंऽत्यजः कमलानाथो गुरुस्त्या
नदी ॥ १२ ॥ द्यो नाथः स्यात्कथा द्योऽब्धिर्द्या दया द्यौस्त्रि
पम् ॥ ध्योंऽधे ध्याने ध्यश्च क्षुधा न्योनयोऽर्णव उज्ज्वलः ॥ १
न्या नीतिर्नतिरुग्राणी प्यः पयः प्या कृपा रुचिः॥फ्यः फेनः
फणा ब्योऽर्को भ्य इभ्यो भ्योभयः पुमान्॥१४॥म्यो मयो यम ई
म्या रमा सरमा क्षमा॥य्यो जय्यो विबुधाधीशो य्या शय्या ल्यं
पद्रुतः ॥ १५ ॥ ल्याऽहल्या नलिनी ज्योतिर्वयः पक्षी च कूब
व्यो वायुर्व्याल ईशानो व्या भव्या वडवा सुधा ॥ १६ ॥
शय आशयो नारी श्या वश्या कृषिरित्यपि॥ ष्यः प्रैष्यः ष्या
शुद्धा स्यः प्रशस्योऽमराधिपः ॥ १७ ॥ स्या कृपिर्दैवतं च
हयो ह्या च तुरंगमी॥क्ष्या सर्वा जगदंबा च सर्वेशानी सुरेश्वरी॥

याज्यं स्मृतं झ्यं झषनाशनम् ॥ ट्यं स्फीतं ठ्यं स्मृतं शाठ्यं ड्यं जाड्यं ढ्यं धनं वनम्॥२०॥ण्यं नाण्यं त्यं स्मृतं नित्यं थ्यं तथ्यं द्यं सुखं चिरम् ॥ निंद्यं ध्यं त्वांध्यमित्युक्तं न्यं मान्यं नयनं वरम् ॥ २१ ॥ प्यं कुप्यं पात्रमित्युक्तं फ्यं पयो मरणं रजः ॥ ब्यं सुखं भ्यं भयं रुद्रं म्यं नाम्यं याम्यरम्यकम् ॥२२॥ य्यं कृतं न्याय्यमाधारं ल्यं प्रोक्तं निलयं बुधैः ॥ व्यं वियद्वनवस्त्रं स्याच्छ्यं स्वापे वश्य इत्यपि ॥ २३ ॥ ष्यं मुष्यं शिष्यमित्याहुः ष्यं वृष्यमृष्यमित्यपि ॥ स्यं सस्यं कांस्यमित्याहुर्ह्यं हस्तिवदनं गृहम् ॥ २४ ॥ क्ष्यं स्मरं क्षेत्रमुत्क्षारं क्ष्या पृथ्वी जगदीश्वरी ॥ क्वः कविः काव्यतातः स्यात्क्वा भूरिति निगद्यते ॥ २५ ॥ क्वं काव्यं कमलं क्वं स्याद् ग्वो गौर्गरुड उच्यते ॥ ग्वा धेनुर्ग्वं स्मृतं गुह्यं घ्वो घोषो घ्वा ऽरणिः स्मृता ॥ २६ ॥ घ्वं घुष्टं घर्षणं घासं छ्वश्छागश्छ्वा छविः स्मृता ॥ छ्वं स्वच्छपुच्छं गोमूत्रं ज्वो यवो ज्वा च चंचला ॥ २७ ॥ ज्वं जुष्टं झ्वः समुद्रः स्याज्झ्वा वसिष्ठवधूः स्मृता ॥ झ्वं दुग्धं दधि च प्रोक्तं ट्वोऽत्री रामपिता मनुः ॥ २८ ॥ ट्वा खट्वा ट्वं स्मृतं पुष्टं ठ्वो वासिष्ठोथ विह्वलः ॥ ठ्वा चित्रामधुरा ठ्वं तु पुष्करं चाक्षमुच्यते ॥ २९ ॥ ड्वोभरद्वाजपुत्रः स्याद् ड्वाघंटाड्वं महोदरम् ॥ ढ्वो ढंढो ढ्वा मनःक्षोभ्या ढ्वं पयो दधि चौदनम् ॥ ३० ॥ ण्वो नाथो जमदग्निः स्याण्ण्वा वाप्युज्जायिनी प्रभा ॥ ण्वं रूपमणु च प्रोक्तं त्वस्तुरंगो महेश्वरः ॥ ३१ ॥ त्वा स्वपत्नी च गौरी च त्वं तुल्यं मरणं तथा ॥ थ्वोद्धोंऽक्षरोऽरुणस्थ्वा स्त्री थ्वं तु मैथुनमुच्यते ॥ ३२ ॥ द्वो दावो द्वा पुरी गंगा द्वं दूरं च दरंच यत् ॥ ध्वो धवोऽग्निर्वधो ध्वाऽध्वा धरा धारा वधूत्तमा ॥ ३३ ॥ ध्वं धन्यं धू-

ध्वं धनं साधनं वनम् ॥ ३४ ॥ प्वो वायुः प्वा स्मृता धूली
ण्यं पठनं शिरः ॥ फ्वः फणी फ्वा फालिका स्यात्फ्वं
रेण चालनम् ॥ ३५ ॥ ब्वो ब्रह्मा गीष्पतिर्ब्वाऽभ्यां ब्वं वाक्
विद्विषः ॥ भ्वो भवो भरतो ब्रह्मा भ्वा गौरी भ्वं निवेशनम्।
म्वो वृक्षो म्वा धरा म्वं खं ब्रह्म पुस्तकमुच्यते ॥ य्वो यवो
यज्ञो य्वा योषिज्जवनोत्तमः ॥ ३७ ॥ यतनं यमनं य्वं तु रो
दनं जगत् ॥ र्वोऽर्वा तु पवनो र्वाऽश्वी र्वं खर्वं पर्वं चर्वणम् ॥
ल्वो लवो रामपुत्रस्तु ल्वा लव्या ल्वं तु सूदनम् ॥ व्वो व
मही प्रोक्ता व्वं बलं वनितागृहम् ॥ ३९ ॥ शल्यं श्वं शरणं
थुनं गगनं गमम् ॥ श्वं प्रोक्तं शयने श्वः स्याच्छ्वः प्रातरशनो
॥ ४० ॥ श्वा श्वा तु चंद्रमःपत्नी ष्वो बिडालोऽथ मारिषः
परिष्वंजनं स्वप्नं गमनं परिवर्तनम् ॥४१॥ मीलनं मेलनं चा
स्वर्गः सुहृदित्यपि ॥ स्वो निजो भगवान्विष्णुर्भक्तो भासुर
पि ॥४२॥स्वा स्वकीया च योषिच्च गौरी शक्तिः परेश्वरी ॥ स
धनमायुष्यं पुण्यं पाप्मा पतिः सुखम् ॥ ४३ ॥ ह्वः प्रह्वः शत
स्याद् ह्वा जिह्वा तरुणी सरित् ॥ ह्वं वाहं गमनं क्ष्वेडा क्ष्वः
क्ष्वा सरिद्वरा ॥ ४४ ॥ क्ष्वं क्षीबं क्षरणं क्षीरं पालनं तारणं
स्नः सारः स्ना प्रथा श्रेष्ठा स्नं स्नानं मधु वारणम् ॥ ४५ ॥ ध्नो
नाशको ध्नाब्धौ ध्नं जलं निबिडं च यत् ॥ म्नो मानो म्ना मरु
म्नं मनो मरणं मधु ॥ ४६ ॥ क्लः कलः क्ला कला क्लं तु कलंक
मुत्तमम् ॥ स्कः शुष्कः स्कंधशूरः स्यात्स्का स्कंदजननी सु
॥ ४७ ॥ स्कं शुक्रं शरणं वित्तं वादित्रं गदनं सुखम् ॥ श्लः
शलभः शुक्रः श्ला शलाका शिला तथा ॥ श्लं शुक्रं चूर्णमाधारं

ळं लक्ष्म ळा स्मृता गौरी ळो लोकस्तर्क इत्यपि ॥ ख्लः खलः ख्ला सरा क्षुद्रा योषित्कमललोचना ॥ ५० ॥ ग्लः शनीन्दुगुडा ग्ला वा ग्लं गलं गलनं सरित् ॥ घ्लोऽश्वो घ्ला जघनं घ्लं तु वृक्णं सारथिपातनम् ॥ ५१ ॥ छ्लश्छलः शलकृच्छ्लोर्द्धा पुरी छ्ला तु शिवालयम् ॥ प्लुः प्लवंगः प्लवः शूरः प्ला पाटी परमेश्वरी ॥ ५२ ॥ प्लं मांसं प्लवनं मध्ये पूरणं धरणीतलम् ॥ फ्लः फणीशः स्मृता फ्ला च फलिनी फलधारिणी ॥ ५३ ॥ फ्लं फलं वाणपूरं च वदनं सकलं वपुः ॥ ब्लं बलं ब्ला स्मृता रक्ता वरटी कंगुरित्यपि ॥ ५४ ॥ ब्लो बालोऽवासुरः कंसो ज्ञोऽध्वा मारो न लो यमः ॥ ब्लं माल्यं मधुरं ब्ला क्ष्मा ह्ली देवेशोऽमरावती॥५५॥ ह्लः कल्पः कमलानाथो गरुडो हंससारथिः ॥ क्रः करः शरभो व्याघ्रो नाथः क्रा सुरभिर्मही ॥ ५६ ॥ क्रं खमिंद्रियमित्युक्तं ख्रो ख्रौ रासभे खले ॥ ख्रा पूतना शूर्पणखा ताडका कैकयी क्षितिः ॥ ५७ ॥ ख्रं खड्गं दुष्टहृदयं मैथुनं मरणं तथा ॥ ग्रो गरो गुद आसारो ग्रा राज्ञी ब्रध्नयोषितोः ॥ ५८ ॥ ग्रं गृहं ग्रहचक्रं खमाधारः शुक्रमेव च ॥ घ्रो घोषो भदनश्चूतो भगो ज्ञो यामिनीपतिः ॥ ५९ ॥ घ्रा घृणा सरमापुत्री घ्रं गृहं वदनं निजम् ॥ ङ्रो नरोऽशरणः शूरो ङ्रा मारणमिति स्मृतम् ॥ ६० ॥ ङ्रं गृहं रोदनं नासा मता हानिश्च कथ्यते ॥ च्रश्चरमश्रूः स्मरः श्लोकश्चूतश्चारण इत्यपि ॥ ६१ ॥ च्रा चंचूश्च चमूश्चाटु च्रं मैथुनकमप्रजम् ॥ छ्रो द्वेषी छुरिका खड्गस्तरुरंगणमार्गणः ॥ ६२ ॥ छ्रा विष्ठा शुनकी वेश्या छ्रं नवं गमनं गृहम् ॥ ज्रो वृद्धो गमनेच्छोऽग्निर्ब्रह्मेशो रमापतिः ॥ ६३ ॥ जरायुश्च जरायुश्च जमदग्निर्जिनीपतिः ॥

मजस्रं वा रजस्वलमुखं रजः॥झ्रो नदो जरठोदरौ झ्रा जरा हर्ा
श्वरी ॥ ६५ ॥ झ्रं जुष्टं भ्रमरैर्घुष्टं पुष्टं सुष्ठु गृहं कजम् ॥ भ्रः
भ्रा स्मृता नीतिर्गतिर्भ्रं भगवन्मुखम् ॥ ६६ ॥ ट्रः पीठष्ट्रा स
पूषा ट्रं घोटकमुखं सरः॥ ठ्रो मिष्टान्नं फलरसष्ठ्रा टिट्टी भ्रमरी
॥ ६७ ॥ ठ्रं सुखं वाद्यजनितं पलितं हरितं जगत् ॥ ड्रो दंडो
रुर्दक्षो ढुरगो ढ्रः सुरोदकम् ॥ ६८॥ ड्रा टिट्टी मत्स्यगंधा र
ज्झषपत्नी महोदरी ॥ ड्रं मद्यं मधुरं पुष्पं नर्मदाजलमंबुजम्॥६
ढ्रः स्याद्धृष्टद्युम्नजातो विदुरो नर्मदाझषः ॥ ढ्रा गांधारी सती स
स्वधाज्ञा सरयूरपि ॥ ७० ॥ ढ्रं फल्गुमरणं भ्रष्टं शुभ्रास्यं
दिनीक्षमम् ॥ ण्रो नहुषोंबरं भीरुः कर्णो बीभत्सुरुद्भवः ॥ ७
ण्रा नर्मदा च गौर्गोदा गंगा द्रुपदजांबुजा ॥ ण्रं नाम ससुधं
वाक्यं नारदभाषितम् ॥ ७२ ॥ त्रस्त्रिनेत्रोऽब्जजः पाता गरु
न्मघवानपि ॥ त्रा गौरी नर्मदा पात्री तारणी सरमा तरी ॥ ७
त्रं स्मृतं त्रुटितं घुष्टं जुष्टं पुष्टं परं पदम् ॥ गांधारीवदनं कर्ण
द्रौपदीरितम् ॥ ७४ ॥ थ्रस्तीर्थवासकृत्पूतो जारः पुष्टोऽ
त्मजः ॥ थ्रा स्थिताथ रमा राज्ञी रजनी रजकात्मजा ॥ ७५
तीर्थं सुखमायुक्तं मरणं मध्वरैर्सुखम्॥द्रो द्रोणो द्रोणसूनुः स्यात्व
काकसमो नरः ॥ ७६ ॥ भयकृद्भरतो राजा रंतिदेवो रमापत
द्रा दरी सरमा क्षुद्रा द्रोणसूर्विदुरात्मजा ॥ ७७ ॥ द्रं भयं ग
क्षुद्रं क्षोदनं सरमा सुखम् ॥ सुतोढं सुखदं साम स्मरणं शरणं
॥ ७८ ॥ ध्रो भूर्ध्रो धारकः साक्षी धृष्टद्युम्नो धरात्मजः ॥ वृको
गदापाणिर्गणात्मा भ्रातृवत्सलः ॥ ७९ ॥ ध्री धरा कुध्रजाकूलम
गा पथिकांबुगा ॥ ध्रं ध्रुवं धरणं धारा धरस्थानं च

दाह्वदः ॥ त्रं गृहं नारकं गारं गरुडांगं गरोद्भवम्॥८२॥प्रा प्रकृष्टामहादेवी महालक्ष्मी रजोद्भवा ॥ मधुरा मर्मसारो वा क्ष्मा क्षमा क्षामनासिका ॥ ८३ ॥ प्रः प्रकृष्टोऽधकारातिर्मुराराातिः कजोद्भवः ॥ कामारातिर्ध्रुवोगस्त्योऽरुणोऽरुणपितामहः ॥ ८४ ॥ प्रं ब्रह्मगमने भूरि भ्रमरांगं धरातलम् ॥ गंगातीरं पयःपेयं पाथः परसरं सरः॥८५॥ फ्रू फूत्कारः स्वनः फेनः स्फुरन्स्प्रष्टांबरेचरः ॥ फ्रा वीरपत्नी कमला खरी क्षारनदी सुरा ॥ ८६ ॥ फ्रं स्फुरद्रसनं जुष्टं पलं स्फुटनमुद्धतम् ॥ प्राकृतं गमनं ध्वस्तं धृतं धरणमुच्यते ॥ ८७ ॥ ब्रो बृहस्पतिराचार्य्यो बटुर्वृद्धो वरावृतः ॥ बाष्कलो बहुदो वाजी बहुव्रीहिश्च बुद्बुदः ॥८८॥ बालो बाणोऽबलो बद्धोऽबष्टोऽब्दो बधिरः स्मृतः॥ब्रा बाला बधिराऽबष्टा बह्निबद्धाऽबरेश्वरी ॥ ८९ ॥ ब्रं ब्रह्मबलमुच्छ्रेष्ठं बधिरांगं तथा वरम्॥बहुलं बहुसारं च बधिरास्यं बटोर्मुखम्॥९०॥ भ्रो ब्रह्मा प्रकटो भारो भ्रमरो धूसरो धरः ॥ भ्रामको भासुरो भ्रष्टो भीमसेनोऽभयः स्मृतः ॥ ९१ ॥ भ्रं भासुरं तथाऽभ्रं तु भ्रामकं भरणं भयम् ॥ भ्रा भ्रष्टा ब्राह्मणी भावा हिडंबा धरिणी तथा॥९२॥ म्रो मरो मृत्युकृन्मर्त्यो मैथुनी माधवी बलः ॥ भ्रमरी भानवी मारमानिनी यामिनी शुनी॥ ९३ ॥ म्रं मैथुनं मृतांगं च मरणं मस्तकं मधु ॥ य्रो यादवोऽर्जुनो जारो य्रा जराज्वरवाञ्जरा ॥ ९४ ॥ य्रं जुष्टं भोजनभ्राजं जायमानं नरोद्भवम् ॥य्रिः कामिनी प्रिया जुष्टा परमा पारगांबुधेः ॥ ९५ ॥ रकारद्वययोगाभावः शास्त्राद्दृष्टेः ॥ ल्रो लंडो लालितोऽल्पांगो ल्रा साजा लालितांबुजा ॥ ९६ ॥ लालितं प्लावितं ल्रं खं लालितं ललनासुखम्॥ व्रो वाराहो वरो वास्त्रो वाडवो वासरोंऽबुधिः ॥९७॥ व्रा श्रेष्ठा गिरिजा लक्ष्मी रत्नाकरगता तथा॥

व्रं व्रजगोपाल श्रीतं आरं शे...

लया ॥ ९९ ॥ श्रं शरण्यं सतूणञ्च तारुण्यं तादृशं शि
सुरेशो दितीशोऽर्कोऽरुणोऽर्णव उरुक्रमः॥१००॥श्रा गौरी
नी पारणा परमामरी॥श्रं प्रकृष्टारुणं काष्ठं कोमलेतरमुज्ज्व
स्रः सरः सरमाभर्त्ता भक्तो भासुरभासुरः ॥ स्रा शिव
च भक्ता ब्रह्मसुता तथा ॥ २ ॥ स्रं श्रेष्ठं सारदं वस्तु वच
सनम् ॥ ह्रो हरो हरिणो हारो हरिर्हाहा हुहूर्हयः ॥ ३
सोऽहरुद्धर्षो हासो हस्ती च नाहुषः ॥ ह्रा गौरी करिणं
स्तयुक्ता च हंसिनी ॥ ४ ॥ देवयानी च शर्मिष्ठा ह्रं तु
गरम्॥क्षुः क्षरः क्षरणः क्षारा क्षामा क्ष्रा च क्षराऽक्षरा॥५॥क्ष्म
क्ष्रं क्षयि क्षारं क्षोदनं क्षरणं वरम् ॥ स्तः पुनः स्तिः र
सुता सारसयोषिता ॥ ६ ॥ स्ता प्रशस्ता शंदा पक्षिपत्नी
स्मृता ॥ स्तुः सारः स्तूरथाचार्यो लक्ष्यस्तूणोरणः स्मृत
स्तं शस्त्रं शरणं राजगृहं गगनमुद्धतम् । ष्ट्रो भ्रष्टः शक
विप्रो वरुण आसवः ॥८॥ ष्टुः सुष्ठु शरणं स्वेष्टं भास्वरं भ
ष्टिर्येष्टिर्विष्टिराविष्टिरावृत्तिर्वरुणांगना ॥ ९ ॥ ष्टी यष्टी सर
भ्रामिका भ्रमिरासुरी ॥ ष्टा दुष्टा गृहिणी गाली सूर्यपत्नी
या ॥ ११० ॥ ष्टं श्रेष्ठमरणं साधुगदनं मदनं मधु ॥ ष्टः
खरोऽगारोऽथासुरोऽसुरसत्तमः ॥ ११ ॥ गोविंदो गरुडो गं
गः संगरोऽमरः ॥ ष्टचः संघातस्तथास्त्यश्च क्ष्मो विष्णुः
रमा॥१२॥क्ष्या हानिः क्ष्यो हरो विष्णुः ष्णः कृष्णः ष्णा क
ष्णयो दाता ष्ण्या रमा ष्ण्यं च गृहं तारापतिर्मुखम्॥१३॥
ध्यो धराधीशः क्ल्यः कल्यो ध्यो धनी हरिः ॥१४॥ पूर्वो
योगे द्वित्रिवेदेषु रूपके ॥ पूर्वोक्तेनैव विधिना कल्प्योर्थो

तन्नाम विज्ञेयमित्येतत्सौभरेर्मतम् ॥ १६ ॥ यथा प्रशस्तमिति नामनि त्रयः प्रादयो वर्णाः संति तैर्नामकल्पना च ॥ प्रं प्रशस्तं शं प्रशस्तं स्तं प्रशस्तमितीरितम् ॥ एवं सर्वत्र बोद्धव्यमिति सौभरिणोदितम् ॥ १७ ॥ इत्येवं ग्रथिता मालाक्षरी सौभरिणा पुरा ॥यः पठेच्छृणुयाच्चेमां स शब्दार्णवपारगः ॥ ११८ ॥ यां चकार महर्षीशः सौभरिर्ज्ञानतोयाधिः ॥ अंगिरास्तत आश्रुत्य तां चकार त्रिलोकगाम् ॥ १९ ॥ वंशीधरो गुरूणां च सौभर्य्यंगिरसोस्तथा ॥ मोदाय विदुषां राधाकृष्णानुग्रहतोलिखत् ॥ १२० ॥ अस्य पाठाच्छ्रुतेश्चाथ सर्वशास्त्रश्रुतेः फलम् । एतन्मयं यतः सर्वं प्राप्नुयान्नात्र संशयः ॥ २१ ॥ यो नित्यं मातृकामालां कंठस्थां कुरुते द्विजः ॥ तस्य कंठगता देवी सरस्वती वसेत्सदा ॥ १२२ ॥ अथ चैतस्माद्यथा श्रीभगवतो वर्णसमाम्नायाद्वेदाविर्भावो ब्रह्मादिद्वाराऽभूत्तं वर्णयामः । वेदाविर्भावस्तु पूर्वं श्रीमद्भागवतीयतृतीयैकादशद्वादशस्कंधोक्तरीत्या वर्णितोऽपि पुनरपि तं स्वरूपलक्षणतः स्मारयामः॥ तथाहि । 'यो वै ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै ' इत्यादिश्रुतेर्नित्यासिद्धानेव वेदांस्तस्मै प्राहिणोत्प्रेषयामास स्वांतःस्थितान्वेदान्परमात्मा निजाचिन्त्यशक्त्या ब्रह्ममनसि प्रणवमातृकारूपेण सूक्ष्मानपि तन्मुखेभ्य ऋगादिस्थूलरूपेणैवोच्चारयामासेति । अतएवोक्तम् 'अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा । आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः' इति स्मृतेः। 'वाचा विरूपनित्यया' इति श्रुतेश्च वेदस्य नित्यत्वम् । यच्चोक्तम् 'ऋचः सामानि जज्ञिरे ' इति।तत्राप्याविर्भाव एव बोध्यो जनेः प्रादुर्भावार्थकत्वात् । ननु'शास्त्रयोनित्वात्' इति सूत्रस्य का गतिरि-

तस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेद'इत्यादिश्रुति
दस्योत्पत्तिं निराकरोति श्वासप्रश्वासादिवल्लीलयाविर्भावित
ति।ननु लीलयाविर्भावकर्तृत्वेऽपि ब्रह्मोपादानता तस्य जातैव
त्वे तस्य पौरुषेयत्वं कथं न भविष्याति। न च ब्रह्मकार्यत्वेऽपि
पौरुषेयत्वं पुरुषमात्रजन्यत्वेऽपि पौरुषेयत्वे वर्णानां नित्य
नुपूर्वीविशेषस्य पुरुषजन्यत्वान्मीमांसकंमन्यस्यापि वेदाप्रा
प्रसंगः । वर्णनित्यत्वमात्रेणैवापौरुषेयत्वव्यवस्थापने लौकि
क्यस्यापि तत्प्रसंगः । तस्मान्मानांतरेणार्थमुपलभ्य रचित
रुषेयत्वं सापेक्षत्वलक्षणाप्रामाण्यप्रयोजकं । तच्च न वेदे वेद
मानांतरागोचरत्वात् । इदमेव श्रुत्या निःश्वासदृष्टांतेन
तम् । तथाहि निःश्वासः पुरुषाज्जायमानोऽपि न पुरुषीच
जन्यस्सुषुप्तावपि तद्दर्शनात्। एवं वेदो ब्रह्मणो जायमानोऽपि
ह्मचिकीर्षाजन्यो वेदार्थस्य वेदातिरिक्तमानाविषयत्वादित्य
अस्यार्थस्य जन्माद्यस्येत्याद्यश्रीभागवतीयपद्यव्याख्याने
प्रपञ्चितत्वात् । अथाक्षरसमाम्नायत एव सर्वा आन्वीक्षिक्या
ष्टादश विद्या आपि ब्रह्मद्वारा संभूतास्तदधस्ताद्विदुरं प्राति
क्तरीत्या सूचिता अप्यधुना विशदीकुर्मः । तत्रर्ग्यजुःसामाथ
वेदाश्चत्वारः । शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां ग
छंदसां लक्षणं चैव षडंगो वेद उच्यते इति । षट् पुराणानि
मीमांसाधर्मशास्त्राणि चेति चत्वार्युपांगानि । अत्रैवोपपुराण
तर्भावः । वैशेषिकस्य न्यायनये वेदान्तस्य मीमांसायां महाभ
रामायणयोः सांख्यपातंजलपाशुपतवैष्णवादीनाञ्च धर्मशास्त्रे
लित्वा चतुर्दश विद्याः । तथोक्तं 'पुराणन्यायमीमांसाधर्मश

धनुर्वेदो गांधर्ववेदोर्थशास्त्रं च सर्वेषामास्तिकानामेतावन्ति हि धर्मप्रस्थानानि अन्येषामप्येकदेशिनामेष्वेवांतर्भावात् । ननु नास्तिकानामपि प्रस्थानानि संति तान्येष्वनंतर्भावात्पृथग्गणयितुमुचितानि । तथाहि शून्यवादेनैकं प्रस्थानं माध्यमिकानां, क्षणिकविज्ञानवादेनापरं योगाचाराणां, ज्ञानाकारानुमेयक्षणिकबाह्यार्थवादेनापरं सौत्रांतिकानां, प्रत्यक्षक्षणिकबाह्यार्थवादेनापरं वैभाषिकाणामिति, सौगतानां प्रस्थानचतुष्टयम् । तथा देहात्मवादेनैकं प्रस्थानं चार्वाकाणामेवं देहातिरिक्तदेहप्रमाणात्मवादेन द्वितीयं प्रस्थानं दिगंबराणामेवं मिलित्वा षट् प्रस्थानानि कस्मान्नोच्यंते । सत्यं वेदबाह्यत्वात्तेषां म्लेच्छादिप्रस्थानवत्परंपरयापि पुरुषार्थानुपयोगादुपेक्षणीयत्वमेव । इह च साक्षात्परंपरया वा । परमार्थोपयोगिनां वेदोपकरणानामेव प्रस्थानानां भेदो दर्शितः । अथ संक्षेपेणैषां प्रस्थानानां स्वरूपभेदहेतुः प्रयोजनभेद उच्यते बालानां व्युत्पत्तये । तत्र धर्मप्रतिपादकमपौरुषेयं वाक्यं वेदः सच मंत्रब्राह्मणात्मकः । 'मंत्रब्राह्मणयोर्वेद नामधेयम्' इति तत्स्वरूपस्यान्यत्रोक्तेः । तत्र मंत्रा अनुष्ठानकारकभूतद्रव्यदेवताप्रकाशकास्तेपि त्रिविधा ऋग्यजुःसामभेदेन । तत्र पादबद्धगायत्र्यादिच्छंदोविशिष्टा ऋचः 'अग्निमीळे पुरोहितम्' इत्यादिकास्ता एव गीतिविशिष्टाः सामानि । तदुभयविलक्षणानि यजूंषि अग्निदाग्नीन्विहरंत्वित्यादिसंबोधनरूपाणि । निगदमंत्रा अपि यजुरंतर्गता एव तदेवं निरूपिता मंत्राः । मंत्रव्याख्यानरूपं ब्राह्मणम् । ब्राह्मणमपि त्रिविधं विधिरूपमर्थवादरूपं तदुभयविलक्षणं च । तत्र शाब्दी भावना विधिरिति भाट्टाः । नियोगो विधिरिति प्राभाकराः । इष्टसाधनता विधिरिति ता[illegible]काः । विधिरपि चतुर्विध [illegible]

ष्टाकपालो भवति' इत्यादिः।सेतिकर्त्तव्यताकस्य करणस्य य
फलसंबंधबोधको विधिरधिकारविधिः 'दर्शपौर्णमासाभ्यां स्व
मो यजेत्' इत्यादिः।अंगसंबंधबोधको विधिर्विनियोगविधिः '
भिर्यजेत् समिधो यजति ' इत्यादिः । सांगप्रधानकर्मप्रयो
बोधकः पूर्वोक्तविधित्रयमेलनरूपः प्रयोगविधिः स च श्रौत
के, कल्प इत्यपरे। कर्मस्वरूपञ्च द्विविधं गुणकर्मार्थकर्मभेद
तत्र क्रतुकारकाण्याश्रित्य विहितं गुणकर्म।तदपि चतुर्विधम्
त्याप्तिविकृतिसंस्कृतिभेदात् । तत्र वसंते ' ब्राह्मणोऽग्नीनाद
यूपं तक्षति ' इत्यादावाधानतक्षणादिना संस्कारविशेषविशिष्ट
यूपादेरुत्पत्तिः।'स्वाध्यायोध्येतव्यः, गां पयो दोग्धि'इत्यादाव
नदोहादिना विद्यमानस्यैव स्वाध्यायपयःप्रभृतेः प्राप्तिः। 'सो
भिषुणोति'व्रीहीनवहंति,आज्यं विलापयति'इत्यादावभिषवाव
विलापनैः सोमादीनां विकारः।' व्रीहीन्प्रोक्षति, प्रत्यवेक्षते' इत्
प्रोक्षणावेक्षणादिभिर्व्रीह्यादिद्रव्याणां संस्कार एव । एतच्चतु
चांगमेव। तथा क्रतुकारकाण्यनाश्रित्य विहितमर्थकर्म। तच्च द्वि
धमंगं प्रधानं च । तत्रान्यार्थमंगमनन्यार्थं प्रधानम् । अंग
द्विविधं सन्निपत्योपकारकमाराडुपकारकंच। तत्र प्रधानस्व
निर्वाहकं प्रथमं फलोपकारकं द्वितीयमेवं संपूर्णांगसंपादकोवि
प्रकृतिर्विकलाङ्गसंपादको विधिर्विकृतिस्तदुभयविधाविलक्ष
विधिर्दर्वीहोमः एवमन्यदप्यूह्यम्। अत्रबहुवक्तव्यमस्ति ग्रंथविस्
भियोपरम्यते । तदेवंनिरूपितो विधिभागः प्राशस्त्यनिंदान्यत
लक्षणया विधिशेषभूतं वाक्यमर्थवादः स च त्रिविधो गुणवा
ऽनुवादो भूतार्थवादश्च । तत्र प्रमाणांतरविरुद्धार्थबोधको गुणवा

भूतार्थवादः 'इंद्रो वृत्राय वज्रमुदयच्छत' इत्यादिः। तदुक्तं 'विरोधे गुणवादः स्यादनुवादोऽवधारिते। भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः' इति। तत्र त्रिविधानामर्थवादानां विधिस्तुतिपरत्वे समानेऽपि भूतार्थवादानां स्वार्थेऽपि प्रमाण्यम् देवताधिकरणन्यायात्।अबाधिताज्ञातज्ञापकत्वं हि प्रामाण्यम्। तच्च बाधितविषयत्वात् ज्ञातज्ञापकत्वाच्च नगुणवादानुवादयोः। भूतार्थवादस्य तु स्वार्थतात्पर्यरहितस्याप्यौत्सर्गिकं प्रामाण्यं न विहन्यते। तदेवं निरूपितोऽर्थवादभागः। विध्यर्थवादोभयविलक्षणं तु वेदांतवाक्यम्। तच्चाज्ञातज्ञापकत्वेऽप्यनुष्ठानाप्रतिपादकत्वान्न विधिः स्वतः पुरुषार्थपरमानंदज्ञानात्मके ब्रह्मणि स्वार्थे चोपक्रमोपसंहारादिषड्विधतात्पर्यलिंगवत्तया स्वतःप्रमाणभूतं सर्वानपि विधीनंतःकरणशुद्धिद्वारा स्वशेषतामापादयन्परशेषत्वाभावाच्च नार्थवादस्तस्मादुभयविलक्षणमेव वेदांतवाक्यम्। तच्च क्वचिदज्ञातज्ञापकत्वेन विधिरिति व्यपदिश्यते। विधिपदरहितप्रमाणवाक्यत्वे क्वचिद्भूतार्थवाद इति व्यवह्रियते इति न दोषः। षड्विधलिंगानि च 'उपक्रमोपसंहारावभ्यासोऽ पूर्वताफलम्। अर्थवादोपपत्ती च लिंगं तात्पर्यनिर्णये' इति।उपक्रमोपसंहारावेकंलिंगम्। अद्वितीयात्मप्रतिपादकत्वात्। सृष्टेः पूर्वं नामरूपरहितं सत्तामात्रमिदं जगदिति छांदोग्ये षष्ठे प्रपाठके 'सदेव सौम्येदमग्र आसीत्' इति श्रुत्या प्रतिपादनमुपक्रमः। प्रतीयमानं सर्वं जगदिदं पूर्वोक्तसत्स्वरूपमेव नान्यदिति। 'ऐतदात्मामिदं सर्वम्' इति श्रुत्यांते प्रतिपादनमुपसंहारः॥ १॥ प्रकरणप्रतिपाद्यस्य पुनःपुनः प्रतिपादनमभ्यासः।यथा तत्रैव तत्त्वमसीति नवकृत्वोऽभ्यासः। प्रकरणप्रतिपाद्यस्य

पनिषत्प्रमाणेन गम्य आत्मा नेतरेणेति विवेकोऽपूर्वता ॥
प्रारब्धक्षयपर्यंतं देहेंद्रियादौ मिथ्याप्रतीतिः । प्रारब्धस्य नि
नाशे प्राप्ते तदप्रतीतिपूर्वकमद्वितीयात्मस्वरूपेणावस्थानस्य
चार्यवान्पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येथ संप
इत्यादिश्रुत्या प्रतिपादनं फलम् ॥ ४ ॥ प्रकरणप्रतिपाद्यस्य
तमादेशमप्राक्ष्मो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं वि
म्' इत्यादिश्रुत्या प्रशंसनमर्थवादः स्वार्थे तात्पर्याभावात् ॥
यथा मृज्जन्यघटशरावादीनांमृदभिन्नत्वं स्वर्णजन्यकटककुं
दीनां स्वर्णभिन्नत्वं तथा कारणजन्यजगतः कारणाभिन्नत्व
'वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' इत्यादि
प्रतिपादिता युक्तिरुपपत्तिरिति ॥ ६॥ निरूपितं त्रिविधं ब्राह्म
यत्तु'मंत्रास्त्वनेकधा संति ब्राह्मणं त्वष्टधा मतम्' इति तस
विधस्यापि यथाकथंचित्रिष्वेवैष्वंतर्भावो ध्येयः। अष्टधा ब्र
तु बृहदारण्यकश्रुत्योक्तम् 'इतिहासः पुराणं विद्या उपनि
श्लोकाः सूत्राणि व्याख्यानान्यनुव्याख्यानान्यस्यैव निःश्वसित
इति। कथाप्रतिपादक इतिहासः'। विश्वस्य पूर्वावस्थानिरू
पुराणम्। उपासनात्मविद्याप्रतिपादका विद्याः । या चोप
देवरहस्यप्रतिपादका सोपनिषत् । ये मंत्राः श्लोकवत्पठ्यं
श्लोकाः । संक्षिप्तार्थप्रतिपादकं सूत्रम् । विस्तृतार्थप्रतिप
व्याख्यानम्।व्याख्यानस्यापि स्फुटतापादकमनुव्याख्यानम्।
न्यष्टब्राह्मणानि। शिक्षाकल्परहस्यादीनां च वेदसांगतापादक
मंत्रब्राह्मणयोर्व्याख्येयव्याख्यानताभावोऽस्ति तच्च 'मांत्रवर्णिव
इति सूत्रव्याख्याने प्रतिपादितं वृत्तिकारैः । अथप्रकृतमनुसरा

प्रयोग ऋग्वेदेनाध्वर्यवप्रयोगो यजुर्वेदेनौद्गात्रप्रयोगः सामवेदेन ब्रह्मयजमानप्रयोगौ तत्रांतर्भूतौ । अथर्ववेदस्तु यज्ञानुपयुक्तश्शान्तिकपौष्टिकाभिचारिकादिकर्मप्रतिपादकत्वेनात्यंतविलक्षण एव । प्रवचनभेदात्प्रतिवेदं भिन्ना भूयस्यः शाखाः संति । तज्ज्ञानं चरणव्यूहवैदिकग्रंथाद्भवाति । एवं च कर्मकांडे व्यापारभेदे ऽपि सर्वासां वेदशाखानामेकरूपत्वमेव ब्रह्मकांड इत्यादिश्चतुर्णां वेदानां प्रयोगभेदेन प्रयोजनभेद उक्तः ॥ अथांगानामुच्यते । तत्र शिक्षाया उदात्तानुदात्तस्वरितह्रस्वदीर्घप्लुतादिविशिष्टस्वरव्यंजनात्मकवर्णोच्चारणविशेषज्ञानं प्रयोजनं तदभावे मंत्राणामनर्थफलत्वात् । तथा चोक्तं' मंत्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह। स वाग्वज्रो यजमानं हिनस्ति यथेंद्रशत्रुस्स्वरतोऽ पराधात् ॥' इति।तत्र सर्ववेदसाधारणी शिक्षा।'अथ शिक्षां प्रवक्ष्यामि' इति पंचखंडात्मिका प्रकाशिता । प्रतिवेदशाखं भिन्नाः प्रातिशाख्यसंज्ञिका अन्यैरेव मुनिभिः प्रदर्शिताः । एवंवैदिकपदसाधुत्वज्ञानेनाहादिकं व्याकरणप्रयोजनं । तच्च 'वृद्धिरादैच्'इत्याद्यष्टाध्याय्यात्मकं महेश्वरप्रसादेन पाणिनिनैव प्रकाशितम् । तच्च कात्यायनेन मुनिना पाणिनीयसूत्रेषु वार्तिकं विराचितम ।तद्वार्तिकोपरि च भगवता पतंजलिना महाभाष्यमारचितम् । तदेतत्रिमुनिव्याकरणं वेदांगं माहेश्वरमित्याख्यायते । कौमारादिव्याकरणानि तु न वेदांगानि । किन्तु लौकिकप्रयोगमात्रार्थानीत्यवगंतव्यम् । एवं शिक्षाव्याकरणाभ्यां वर्णोच्चारणे पदसाधुत्वे च ज्ञाते मंत्रपदार्थज्ञानापेक्षायां तदर्थं भगवता यास्केन 'समाम्नायः समाम्नातो व्याख्यातव्य ' इत्यादित्रयोदशाध्यायात्मकं निरुक्तमारचितम । तत्र च नामाख्यातनिपातोपसर्गभेदेन चतुर्विधं पदजातं [illegible]

वाक्यार्थज्ञानस्य मंत्रस्थपदार्थज्ञानाय निरुक्तमप्यपेक्षणीयम
थानुष्ठानासंभवात्सूल्पेन 'जर्जरीजुर्फरीदूना' इत्यादीनां दुरूहत
त्प्रकारांतरेणार्थज्ञानस्यासंभावनीयत्वाच्च । एवं निघंटुको
वैदिकद्रव्यदेवतात्मकपदार्थपर्यायशब्दात्मका निरुक्तांतर्भ
एव । तत्रापि निघंटुसंज्ञकः पञ्चाध्यायात्मको ग्रंथो भगव
यास्केनैव कृतः । अन्येप्यमरहेमचन्द्रादिप्रणीताः को
निघंटुरूपत्वेन निरुक्तांतर्भूता एव द्रष्टव्याः । एवमृङ्मं
णां पादबद्धानुष्टुप्छन्दोविशेषविशिष्टत्वात् । तदज्ञानेच निंदाः
णे छंदोविशिष्टानुष्ठानविशेषविधानाच्च।छंदोज्ञानाकांक्षायां तत्प्रक
शनाय'धीश्रीस्त्रीम्' इत्याद्यध्यायाष्टकात्मिका छंदोविचितिर्भगव
पिंगलेनैव रचिता।तत्राप्यलौकिकामित्यंतेनाध्यायत्रयेण गायत्र्युष्णि
गनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगतीछंदांसि सत्तावांतरभेदानि निरूपित
नि।अथ लौकिकमित्यारभ्याध्यायपंचकेन पुराणेतिहासादावुपयो
नि लौकिकानि छंदांसि निरूपितानि।व्याकरणे लौकिकपदनिरूप
वत्।एवं वैदिककर्मदर्शादिकालज्ञानाय ज्यौतिषं भगवतादित्येन ग
र्गादिभिश्च प्रणीतं बहुविधं गणितहोरासंहितादिरूपस्कंधत्रयात्मक
मिति।तत्र गणितं च मूलबीजरेखापाट्यादिभेदतोनेकविधम्।होराश
स्त्रं तु जन्मपत्रप्रकाशकम्।होराशब्दस्तु पूर्वापरवर्णलोपेनाहोरात्रश
ब्दान्निष्पन्नः पृषोदरादित्वा दित्युक्तं बृहज्जातके।तेन कालोपलक्षणा-
न्मुहूर्तबोधकवर्षबोधकप्रश्नबोधकशास्त्रमप्यत्रैवांतर्भूतंज्ञेयम्।संहिता
शास्त्रं सर्वप्रकाशकत्वात्सर्वमयमेव।गणितबोधकाः सूर्यसिद्धांतादयो
ऽष्टादश संति।होराबोधकाःशुकजातकयवनजातकादयो मुहूर्तमार्त्त-

हारेणवैदिकानुष्ठानक्रमविशेषविज्ञापनाय कल्पसूत्राणि। तानिच प्रयो
गत्रयभेदात्रिविधानि। तत्र हौत्रप्रयोगप्रतिपादकान्याश्वलायनसांख्या
यनादिप्रणातानि । आध्वर्यवप्रयोगप्रतिपादकानि बौधायनापस्तंब-
कात्यायनादिप्रणीतानि। औद्गात्रप्रयोगप्रतिपादकानि शाड्यायनत्र-
य्यारुण्यादिप्रणीतानि। एवं निरूपितः षण्णामंगानां प्रयोजनभेदः ॥
चतुर्णामुपांगानामधुनोच्यते । तत्र सर्गप्रतिसर्गमन्वंतरवंशवंशानुच-
रितप्रतिपादकानि भगवता बादरायणेन निरूपितानि। पुराणानि ता-
निच ब्राह्मं पाद्मं वैष्णवं शैवं भागवतं नारदीयं मार्कण्डेयमाग्नेयं भवि-
ष्यं ब्रह्मवैवर्त्तं लैंगं वाराहं स्कांदं वामनं कौर्मं मात्स्यं गारुडं ब्रह्मांडं
चेत्यष्टादश। एवमुपपुराणान्यपि गणेशकालिकासांबपराशरादीन्य-
नेकानि द्रष्टव्यानि। न्याय आन्वीक्षिकी पञ्चाध्यायी गौतमेन प्रणीतम्
प्रमाणप्रमेयसंशयप्रयोजनदृष्टांतसिद्धांतावयवतर्कविपर्ययवादजल्प
वितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानांषोडशपदार्थानामुद्दे-
शलक्षणपरीक्षाभिस्तत्त्वज्ञानं तस्याः प्रयोजनमेवं दशाध्यायं वैशेषि-
कं शास्त्रं कणादेन प्रणीतम्। द्रव्यगुणकर्मसामान्यसमवायानां षण्णां
भावपदार्थानामभावसप्तमानां साधर्म्यवैधर्म्याभ्यां व्युत्पादनं तस्य
प्रयोजनं तदपि न्यायपदेनोक्तम्। एवं मीमांसाऽपि द्विविधा धर्ममीमां-
सा शारीरिकमीमांसा च । तत्र द्वादशाध्यायी धर्ममीमांसा 'अथातो
धर्मजिज्ञासा' इत्यारभ्य 'अन्वाहार्य्ये च दर्शनात्' इत्यंता भगवता
जैमिनिना प्रणीता। तत्र धर्मप्रमाणं धर्मभेदः शेषशेषिभावश्च क्रत्वर्थ-
पुरुषार्थभेदेन प्रयुक्तिविशेषः श्रुत्यर्थपठनादिभेदः क्रमभेदोऽधिकार-
विशेषः सामान्यातिदेशो विशेषातिदेश ऊहो बाधस्तंत्रप्रसंगश्चेति
क्रमेण द्वादशानामध्यायानामर्थः । तथा संकर्षणकांडमध्यायचतु-

शारीरिकमीमांसा 'अथातो ब्रह्मजिज्ञासा' इत्यादिः 'अनावृत्तिः
त्' इत्यंता जीवब्रह्मैकत्वसाक्षात्कारहेतुश्रवणाख्यविचारप्र
कान्न्यायानुपदर्शयंती भगवता बादरायणेन कृता । तत्र सर्वे
वेदांतवाक्यानां साक्षात्परंपरया वा प्रत्यगभिन्नाद्वितीये
तात्पर्यमिति समन्वयः प्रथमाध्यायेन दर्शितः । तत्र प्रथ
स्पष्टब्रह्मलिंगयुक्तानि वाक्यानि विचारितानि। द्वितीयपादे
ष्टब्रह्मलिंगयुक्तान्युपास्यब्रह्मविषयाणि । तृतीयपादे स्पष्टब्र
गानि ज्ञेयब्रह्मविषयाणि । एवं पादत्रयेण वाक्यविचारः समा
चतुर्थपादे तु प्रधानविषयत्वेन संदिह्यमानान्यव्यक्तादि
चिंतितानि । एवं वेदांतानामद्वये ब्रह्मणि सिद्धे समन्वये तत्र
वितस्मृतितर्कादिविरोधमाशंक्य तत्परिहारः क्रियते इति ।
रोधो द्वितीयाध्यायेन दर्शितः । तत्राद्यपादे सांख्ययोगकणा
तिभिः सांख्यादिप्रयुक्तैश्च तर्कैर्विरोधो वेदांतसमन्वयस्य
हृतः । द्वितीयपादे सांख्यादिमतानां दुष्टत्वं प्रतिपादि
स्वपक्षस्थापनपरपक्षनिराकरणरूपपर्वद्वयात्मकत्वाद्विचारस्य
तीयपादे महाभूतसृष्ट्यादिश्रुतीनां परस्परविरोधः पूर्व
परिहृत उत्तरभागेन तु जीवविषयाणाम् । चतुर्थपादेनेंद्रियवि
तीनां विरोधपरिहारः ॥ तृतीयाध्याये साधननिरूपणम्
प्रथमपादे जीवस्य परलोकगमनागमनेन वैराग्यं निरूपितम्।
यपादे पूर्वभागेन त्वंपदार्थो निरूपित उत्तरभागेन तत्पद
तृतीये पादे निर्गुणे ब्रह्मणि नानाशाखापठित एव गुणोप
कृतः । प्रसंगात्सगुणविद्यासु शाखांतरीयगुणोपसंहारो निरू

निर्गुणं ब्रह्म उपासनावृत्त्या सगुणं वा ब्रह्म साक्षात्कृत्य जीवतः पुण्यपापालेपलक्षणा जीवन्मुक्तिरभिहिता । द्वितीयपादे म्रियमाणस्योत्क्रांतिप्रकारश्चिंतितः । तृतीयपादेसगुणब्रह्मविदो मृतस्योत्तरमार्गोऽभिहितः । चतुर्थपादे पूर्वभागेन निर्गुणब्रह्मविदो विदेहकैवल्यप्राप्तिरुक्ता । उत्तरभागेन सगुणब्रह्मविदो ब्रह्मलोकगमनास्थितिरुक्ता । इदमेव सर्वशास्त्राणां मूर्द्धन्यं शास्त्रांतरं सर्वमस्यैव शेषभूतमिति।इदमेव मुमुक्षुभिरादरणीयं श्रीशंकरमध्वादिमुनिदर्शितमार्गेण यथारुचीति रहस्यम्॥एवं धर्मशास्त्राणि मनुयाज्ञवल्क्यविष्णुयमांगिरोवसिष्ठदक्षशातातपपराशरगोतमशंखलिखित हारीतापस्तंबोशनोव्यासकात्यायनबृहस्पतिदेवलनारदपैठीनासिप्रभृतिभिः कृतानि वर्णाश्रमधर्मविशेषाणां विभागेन प्रतिपादकानि। एवं व्यासकृतं महाभारतं वाल्मीकिकृतं रामायणं च धर्मशास्त्र एवांतर्भूतमितिहासत्वेन प्रसिद्धम् । एवं सर्वदेवसाधारणमंत्रशास्त्रं श्रीमहादेवब्रह्मगौतमादिप्रणीतं धर्मशास्त्र एवान्तर्भूतत्वेऽपीह स्वशब्देनैवोपादानात्पृथगेव संगतिर्वाच्या ॥ अथ वेदचतुष्टयस्य क्रमेण चत्वार उपवेदाः।तत्रायुर्वेदस्याष्टौ स्थानानि भवंति । सूत्रं शारीरमैंद्रियं चिकित्सा निदानं विमानं कल्पं प्रसिद्धिश्च । 'कायबालग्रहोर्द्धांगशल्यदंष्ट्राजरावृषान् । अष्टावंगानि तस्याहुश्चिकित्सा येषु संश्रिताः' इति । तस्यायुर्वेदस्य कायचिकित्सा, बालचिकित्सा, ग्रहो भूतप्रेतादिः, ऊर्द्धांगं शिरोनेत्रादि, शल्यं शस्त्रघातादि, दंष्ट्रा स्थावरजंगमात्मकं विषं तेषां चिकित्सा, जरा रसायनादिना जराया दूरीकरणं, वृषो वाजीकरणतंत्रमित्यष्टांगानीति ।ब्रह्मप्रजापत्यश्विधन्वंतरींद्रभारद्वाजात्रेयाग्निवेशादिभिरुपदिष्टश्चरकेन संक्षिप्तश्च । तत्रैव

न वाजीकरणाख्यकामशास्त्राभिधानात् । तत्र वात्स्यायनेन प
ध्यायात्मकं कामशास्त्रं प्रणीतम् । तस्य विषयवैराग्यमेव प्रयो
शास्त्रोद्दीपितमार्गेणापि विषयभोगे दुःखपर्यवसानात् । चिकि
शास्त्रस्य च रोगतत्साधनरोगनिवृत्तितत्साधनज्ञानं प्रयोजनम् ।
मोक्षसाधनीभूतशरीरारोग्यसंपादकत्वेन मोक्षोपयोग्येव । एवं ध
र्वेदः पादचतुष्टयात्मको विश्वामित्रप्रणीतः । तत्र प्रथमपादो दी
त्मको द्वितीयः संग्रहपादस्तृतीयस्सिद्धपादश्चतुर्थः प्रयोगपादः
प्रथमे पादे धनुर्लक्षणमधिकारिनिरूपणञ्च कृतम् । तत्र धनुःशब्दः
पे निरूढोऽपि चतुर्विधेष्वायुधेषु वर्त्तते । यथा चक्रशब्दोऽरौ नि
ढोऽपिगदायामपि वर्त्तते 'जुगोप कुक्षिं गत आत्तचक्र' इत्यत्र तथाद
नादन्यथा अस्त्रतेजः स्वगदया विधमन्तमित्युक्तिव्याकोपः स्या
ति । तच्चतुर्विधमायुधं मुक्तममुक्तं मुक्तामुक्तं मंत्रमुक्तं च । तत्र मुक्तं
क्रादि, अमुक्तं खड्गादि, मुक्तामुक्तं शल्यावांतरभेदादि, मंत्रमुक्तं श
दि । तत्र मुक्तमस्त्रमुच्यते तदमुक्तं शस्त्रमित्युच्यते । तदपि ब्राह्म
ष्णवप्राजापत्याग्नेयादिभेदादनेकविधम् । एतद्भेदज्ञापनाय किं
द्वक्ष्यामोऽग्रे । एवं साधिदैवतेषु समंत्रेषु चतुर्विधायुधेषु येषाम
कारः क्षत्रियकुमाराणां तदनुयायिनां च ते सर्वे चतुर्विधाः प
तिरथतुरगगजारूढा इति दीक्षाभिषेकसन्नाहनमंगलकरणादिक
सर्वमपि प्रथमे पादे निश्चितम् । सर्वेषां शस्त्रविशेषाणामाचार्य
च लक्षणपूर्वकसंग्रहप्रकारो दर्शितो द्वितीयपादे । गुरुसंप्रदाया
द्धानां शस्त्रविशेषाणां पुनः पुनरभ्यासो मंत्रदेवतासिद्धिकरणम
निरूपितं तृतीयपादे । एवं देवतार्चनाभ्यासादिभिस्सिद्धानाम

पि यत्र नगरे प्रसिद्धः स्याद्धनुर्द्धरः ॥ ततो यान्त्यरयो दूरान्मृगाः सिंहगृहादिव ॥ १ ॥ अथ धनुर्दानविधिः । आचार्येण धनुर्देयं ब्राह्मणे सुपरीक्षिते ॥ लुब्धे धूर्ते कृतघ्ने च मंदबुद्धौ न दापयेत् ॥ २ ॥ ब्राह्मणाय धनुर्देयं खड्गं वै क्षत्रियाय च ॥ वैश्याय दापयेत्कुन्तं गदां शूद्राय दापयेत् ॥ ३ ॥ धनुश्चक्रश्च कुन्तश्च खड्गं च क्षुरिका गदा ॥ सप्तमं बाहुयुद्धं स्यादेवं युद्धानि सप्तधा ॥ ४ ॥ अथाचार्यलक्षणम् । आचार्यः सप्तयुद्धः स्याच्चतुर्भिर्भार्गवः स्मृतः॥ द्वाभ्याञ्चैव भवेद्योध एकेन गणको भवेत् ॥ ५ ॥ हस्तः पुनर्वसुः पुष्यो रोहिणी चोत्तरात्रयम् ॥ अनुराधाश्विनी चैव रेवती दशमी तथा ॥ ६॥ जन्मस्थे च तृतीये च षष्ठे वै सप्तमे तथा ॥ दशमैकादशे चंद्रे सर्वकार्याणि कारयेत् ॥ ७ ॥ तृतीया पंचमी चैव सप्तमी दशमी तथा ॥ त्रयोदशी द्वादशी च तिथयस्तु शुभा मताः ॥ ८ ॥ रविवारः शुक्रवारो गुरुवारस्तथैवच ॥ एतद्वारत्रयं धन्यं प्रारंभे शस्त्रकर्मणाम् ॥ ९ ॥ एभिर्दिनैस्तु शिष्याय गुरुः शस्त्राणि दापयेत् ॥ संतर्प्य दानहोमाभ्यां सुरान्स्वाहाविधानतः ॥१०॥ ब्राह्मणान्भोजयेत्तत्र कुमारीश्चाप्यनेकशः ॥ तापसानर्चयेद्भक्त्या ये चान्ये शिवयोगिनः ॥ ११ ॥ अन्नपानादिभिश्चैव वस्त्रालंकारभूषणैः ॥ गंधमाल्यैर्विचित्रैश्च गुरुं तत्र प्रपूजयेत्॥१२॥कृतोपवासः शिष्यस्तु धृताजिनपरिग्रहः ॥ बद्धांजलिपुटस्तत्र याचयेद्गुरुतो धनुः ॥१३॥ अंगन्यासं ततः कार्यं शिवोक्तं सिद्धिमिच्छता ॥ आचार्य्येण च शिष्यस्य पापघ्नं विघ्ननाशनम् ॥ १४ ॥ शिखास्थानेन्यसेदीशं बाहुयुग्मे च केशवम् ॥ ब्रह्माणं नाभिमध्येतु जंघयोश्च गणाधिपम् ॥ १५ ॥ प्रातमंत्रम् । ओं ह्रौं शिखास्थाने शंकराय

न श्रेयो भविष्यति॥अन्येऽपि दुष्टमंत्रेण न हिंसंति कदाचन
शिष्याय मानुषं चापं धनुर्मंत्राभिमंत्रितम् ॥ काण्डात्काण्ड
त्रेण दद्याद्वेदविधानतः ॥ १७ ॥ प्रथमं पुष्पवेधश्च फलही
त्रिणा ॥ ततः फलयुतेनैव मत्स्यवेधं च कारयेत् ॥ १८ ।
वेधं ततः कुर्य्यादेवं वेधो भवेत्त्रिधा ॥ एतैर्वैधैः कृतैः पुंसां
स्युः सर्वसाधकाः ॥ १९ ॥ वेधने चैव मांसस्य शरपातो य
वेत् ॥ पूर्वदिग्भागमाश्रित्य तदा स्याद्विजयी सुखी ॥ २
क्षिणे कलहो घोरो विदेशगमनं पुनः ॥ पश्चिमे धनधान्यं
चैवोत्तरे शुभम् ॥ २१ ॥ ऐशान्यां पवनं दुष्टं विदिशो
शोभनाः ॥ हर्षपुष्टिकराश्चैव सिद्धिदाः सर्वकर्मणि ॥ २२
वेधत्रयं कुर्य्याच्छंखदुंदुभिनिस्वनैः । ततः प्रणम्य गुरवे
णान्निवेदयेत् ॥ २३ ॥ इति धनुर्दानविधिः ॥ अथ
प्रमाणम् । प्रथमं यौगिकं चापं युद्धचापं द्वितीयकम् ॥ i
हुबलोन्मानात्किञ्चिदूनं शुभं धनुः ॥ २४ ॥ वरं प्राणाधिकं
न तु प्राणाधिकं धनुः ॥ धनुषा पीड्यमानस्तु धन्वी ल
पश्यति ॥ २५ ॥ अतो निजबलोन्मानं चापं स्याच्छुभकार
देवानामुत्तमं चापं ततो न्यूनश्च मानवम् ॥ २६ ॥ अर्द्धपञ्च
न्तु श्रेष्ठं चापं प्रकीर्त्तितम् ॥ तद्विज्ञेयं धनुर्दिव्यं शंकरे
पुरा ॥ २७॥ तस्मात्परशुरामेण ततो द्रोणेन धारितम् ॥ द्र
हीतं पार्थेन ततः सात्यकिना धृतम् ॥२८ ॥ कृते युगे महा
तायां चापि राघवः॥द्वापरे द्रोणविप्रश्च दैवं चापमधारयत्
चतुर्विंशांगुलो हस्तश्चतुर्हस्तं धनुः स्मृतम् ॥ तद्भवेन्मानवं
सर्वलक्षणसंयुतम् ॥३०॥ त्रिपर्वं पञ्चपर्वं वा सप्तपर्वं प्रकीर्त्ति

तम् ॥ ३२ ॥ अतिजीर्णमपक्वञ्च ज्ञातिघृष्टं तथैव च ॥ दग्धं छिद्रं न कर्तव्यं बाह्याभ्यंतरहस्तकम् ॥३३॥ गुणहीनं गुणाक्रांतं कांडदोषसमन्वितम् ॥ गलग्रंथिं न कर्त्तव्यं तलमध्ये तथैव च ॥ ३४ ॥ अपक्वं भंगमायाति ह्यतिजीर्णं तु कर्कशम् ॥ ज्ञातिघृष्टं तु सोद्वेगं कलहो बांधवैः सह ॥ ३५ ॥ दग्धेन दह्यते वेश्म छिद्रं युद्धाविनाशनम् ॥ बाह्ये लक्ष्यं न लभ्येत तथैवाभ्यंतरेऽपि च ॥ ३६ ॥ हीने तु संधिते बाणे संग्रामे भंगकारकम् ॥ आक्रांते तु पुनः क्वापि लक्ष्यं न प्राप्यते दृढम् ॥ ३७ ॥ गलग्रंथि तलग्रंथि धनहानिकरं धनुः ॥ एभिर्दोषैर्विनिर्मुक्तं सर्वकार्य्यकरं स्मृतम् ॥ ३८ ॥ शार्ङ्गं पुनर्धनुर्दिव्यं विष्णोः परममायुधम् ॥ वितस्तिसप्तमं मानं निर्मितं विश्वकर्मणा ॥३९॥ न स्वर्गे न च पाताले न भूमौ कस्यचित्करे ॥ तद्धनुर्वशमायाति मुक्त्वैकं पुरुषोत्तमम् ॥ ४० ॥ पौरुषेयं तु यच्छार्ङ्गं बहुवत्सरशोभितम् ॥ वितस्तिभिः सार्द्धषड्भिर्निर्मितं चार्थसाधनम् ॥४१॥ प्रायो योज्यं धनुश्शार्ङ्गं गजारोहाश्वसादिनाम् ॥ रथिनां च पदातीनां वांशं चापं प्रकीर्तितम् ॥४२॥ अथ गुणलक्षणानि ॥ गुणानां लक्षणं वक्ष्ये यादृशं कारयेद्गुणम् ॥ पट्टसूत्रो गुणः कार्य्यः कनिष्ठामानसंमितः ॥ ४३ ॥ धनुःप्रमाणो निःसन्धिः शुद्धैस्त्रिगुणतंतुभिः ॥ वर्तितः स्याद्गुणः श्लक्ष्णः सर्वकर्मसहो युधि ॥ ४४ ॥ अभावे पट्टसूत्रस्य हरिणीस्नायुरिष्यते ॥ गुणार्थमपि च ग्राह्याः स्नायवो माहिषीभवाः ॥४५॥ तत्कालहतगोकर्णचर्मणा छागलेनवा ॥ निर्लोमतंतुसूत्रेण कुर्य्याद्वा गुणमुत्तमम् ॥ ४६ ॥ पक्ववंशत्वचः कार्यो गुणस्तु स्थावरो दृढः ॥ पट्टसूत्रेण सन्नद्धः सर्वकर्मसहो युधि

हस्तास्त्वष्टादश स्मृताः ॥ तद्वृत्तं त्रिगुणं कार्य्यं प्रमा
स्मृतः ॥ ४९ ॥ अथ शरलक्षणानि । अतःपरं प्रवक्ष्यामि
लक्षणं शुभम् ॥ स्थूलं न चातिसूक्ष्मं च न पक्कं न कु
॥ ५० ॥ हीनग्रंथिं विदीर्णं च वर्जयेदीदृशं शरम् ॥
सुपक्कं च पांडुरं समयाहृतम् ॥ ५१ ॥ कठिनं वर्तुलं
गृह्णीयात्सुप्रदेशजम् ॥ द्वौ च हस्तौ मुष्टिहीनौ दैर्घ्ये स्थौल
ष्टिका॥५२॥विधेया शरमानेषु यंत्रेष्वाकर्षयेत्ततः ॥ काक
दानां मत्स्यादक्रौंचकेकिनाम्॥५३॥गृध्राणां कुरराणाञ्च प
शोभनाः॥५४॥एकैकस्य शरस्यैव चतुष्पक्षान्नियोजयेत् ।
लप्रमाणेन पक्षच्छेदं च कारयेत् ॥ ५५ ॥ दशांगुलि
शार्ङ्गचापस्य मार्गणे ॥ योज्या दृढाश्चतुः संख्याः सन्नद्धाः
भिः ॥ ५६ ॥ शराश्च त्रिविधा ज्ञेयास्त्री पुमांश्च नपुंसकः
स्थूला भवेन्नारी पश्चात्स्थूलो भवेत्पुमान् ॥ ५७ ॥ समं
ज्ञेयं तल्लक्ष्यार्थं नियोजयेत् ॥ दूरं पातं युवत्या च पुरुषो
ढम् ॥ ५८ ॥ अथ फललक्षणम् । फलं तु शुद्धलोहस्य
तीक्ष्णमक्षतम् ॥ योजयेद्वज्रलेपेन शरे पक्षानुमानतः ॥ ५९
रामुखं क्षुरप्रञ्च गोपुच्छं चार्द्धचंद्रकम् ॥ सूचीमुखञ्च
वत्सदन्तं द्विभल्लकम् ॥ ६० ॥ कर्णिकं काकतुण्डं च तथा
प्यनेकशः ॥ फलानि देशदेशेषु भवंति बहुरूपतः ॥
आरामुखेन वै चर्म क्षुरप्रेण च कार्मुकम् ॥ सूचं
कवचं ह्यर्द्धचंद्रेण मस्तकम् ॥ ६२ ॥ भल्लेन हृदयं
द्विभल्लेन गुणः शराः ॥ लौहश्च काकतुण्डेन लक्ष्य
पुच्छेन च ॥ ६३ ॥ [illegible]

घवर्माणि भेदयेत्तरुपर्णवत् ॥ ६५ ॥ पिप्पलीसैंधवं कुष्ठं गोमूत्रे तु सुपेषयेत् । अनेन लेपयेच्छस्त्रं लिप्तञ्चाग्नौ प्रतापयेत् ॥ ६६ ॥ शिखिग्रीवानुवर्णाभं तप्तपीतं तथौषधम् ॥ ततस्तु विमलं तोयं पाययेच्छस्त्रमुत्तमम् ॥६७॥ अथ नाराचनालीकौ ॥ सर्वलोहास्तु ये बाणा नाराचास्ते प्रकीर्त्तिताः ॥ पञ्चभिः पृथुलैः पक्षैर्युक्ताः सिध्यन्ति कस्यचित् ॥६८॥नालीका लघवो बाणा नलयंत्रेण नोदिताः॥अत्यु-च्चदूरपातेषु दुर्गयुद्धेषु ते मताः ॥ ६९ ॥ अथ स्थानमुष्टयाक र्षणलक्षणानि । स्थानान्यष्टौ विधेयानि योजने भिन्नकर्मणाम्॥मु-ष्टयः पञ्च समाख्याता व्यायाः पञ्च प्रकीर्त्तिताः ॥ ७० ॥ अग्रतो वामपादञ्च दक्षिणं चानुकुंचितम् ॥ आलीढं तु प्रकर्त्तव्यं हस्तद्वय-सविस्तरम् ॥ ७१ ॥ प्रत्यालीढे तु कर्त्तव्यं सव्यञ्चैवानुकुञ्चितम्॥ दक्षिणं तु पुरस्ताद्वा दूरपाते विशिष्यते ॥ ७२ ॥ पादौ सविस्तरौ कार्य्यौ समौ हस्तप्रमाणतः ॥ विशाखस्थानकं ज्ञेयं कूटलक्ष्यस्य वेधने ॥ ७३ ॥ समपादे समौ पादौ निष्कम्पौ च सुसंगतौ ॥ असमे च पुरो वामे हस्तमात्रे नतं वपुः ॥ ७४ ॥ आकुंचितोरू द्वौ यत्र जानुभ्यां धरणीं गतौ ॥ दर्दुरक्रममित्याहुः स्थानकं दृढभेद-ने ॥ ७५ ॥ सव्यं जानुगतं भूमौ दक्षिणञ्च सकुञ्चितम् ॥ अग्रतो यत्र दातव्यं तं विद्याद्गरुडक्रमम् ॥ ७६ ॥ पद्मासनं प्रसिद्धं तु ह्युपविश्य यथाक्रमम्॥धन्विना तत्तु विज्ञेयं स्थानकं शुभलक्षणम् ॥ ७७ ॥ इति स्थानानि ॥ अथ गुणमुष्टयः ॥ पताका वज्रमुष्टिश्च सिंहकर्णस्तथैव च ॥ मत्सरी काकतुण्डी च योजनीया यथाक्रमम् ॥ ७८ ॥ दीर्घा तु तर्ज्जनी यत्र ह्याश्रितांगुष्ठमूलकम् ॥ पताका सा च विज्ञेया नालिका दूरमोक्षणे ॥ ७९ ॥ तर्ज्जनीम[illegible]ध्यमांगुष्ठो

यो दृढलक्ष्यस्य वेधने ॥ ८१ ॥ अंगुष्ठनखमूले तु तर्जन्य
संस्थितम् ॥ मत्सरी सा च विज्ञेया चित्रलक्ष्यस्य वेधने ॥ ८
अंगुष्ठाग्रे तु तर्जन्या मुखं यत्र निवेशितम् ॥ काकतुंडी च सा
सूक्ष्मलक्ष्येषु योजिता ॥८३॥अथ धनुर्मुष्टिसंधानम्॥संधानं त्रि
प्रोक्तमध ऊर्ध्वं समं सदा ॥ योजयेत्त्रिप्रकारं हि कार्य्येष्वपि
क्रमम् ॥ ८४ ॥ अधश्च दूरपातित्वे समे लक्ष्ये सुनिश्चले ॥
स्फोटं प्रकुर्वीत ऊर्ध्वं संधानयोगतः ॥ ८५ ॥ अथ व्यायाः । वै
कः केशमूले वै शरः शृंगे च सात्विकः ॥श्रवणे वत्सकर्णश्च ग्री
भरतो भवेत् ॥ ८६॥ अंसके स्कंधनामा च व्यायाः पञ्च प्र
ताः॥ कैशिकाश्चित्रयुद्धेषु ह्यधों लक्ष्येषु सात्विकः॥८७॥वत्स
सदा ज्ञेयो भरतो दृढभेदने॥दृढभेदे च दूरे च स्कंधनामानमुि
॥८८॥ अथ लक्ष्यम् ॥ लक्ष्यं चतुर्विधं ज्ञेयं स्थिरं चैव चलं
चलाचलं द्वयचलं वेधनीयं क्रमेण तु ॥ ८९ ॥ आत्मानं सु
कृत्वा लक्ष्यश्चैव स्थिरं बुधः ॥ वेधयेत्त्रिप्रकारं तु स्थिरवे
उच्यते ॥ ९० ॥ चलं तु वेधयेद्यस्तु आत्मस्थाने सुसंस्थि
चलं लक्ष्यं तु तत्प्रोक्तमाचार्य्येण सुधीमता ॥ ९१ ॥ धन्व
चलते यत्र स्थिरलक्ष्ये समाहितः ॥ चलाचलं भवेत्तच्च ह्यप्रे
चिंतितम् ॥ ९२ ॥ उभावेव चलौ यत्र लक्ष्यं चापि धनुर्द्ध
तद्विज्ञेयं द्वयचलं श्रमेण बहु साध्यते ॥९३॥ श्रमेणास्खलितं
दूरं च बहुभेदनम् ॥ श्रमेणास्खलिताकृष्टिः शीघ्रसंधानमाप्य
॥ ९४ ॥ श्रमेण चित्रयोधित्वं श्रमेण प्राप्यते जयः ॥ तस्माद्गु
मक्षं हि श्रमः कार्य्योविजानता ॥ ९५ ॥ प्रथमं वामहस्ते
श्रमं कुर्वते ... ॥ ...

करे ॥ विशाखेनासमेनैव रथी व्याये च कैशिके ॥ ९८ ॥ उदिते भास्करे लक्ष्यं पश्चिमायां निवेशयेत् ॥ अपराह्णे च कर्त्तव्यं लक्ष्यं पूर्वदिगाश्रितम् ॥ ९९ ॥ उत्तरेण सदा कार्यमवश्यमवरोधिकम् ॥ संग्रामेण विना कार्यं न लक्ष्यं दक्षिणामुखम् ॥१००॥ षष्टिधन्वंतरे लक्ष्यं ज्येष्ठं लक्ष्यं प्रकीर्त्तितम् ॥ चत्वारिंशन्मध्यमं च विंशतिश्च कनिष्ठकम् ॥१॥शराणां कथितं ह्येतन्नाराचानामथोच्यते॥चत्वारिंशच्च त्रिंशच्च षोडशैव भवेत्ततः ॥ २॥ चतुःशतैश्च कांडानां यो हि लक्ष्यं विसर्जयेत् ॥ सूर्योदये चास्तमने स ज्येष्ठो धन्विनां भवेत्॥ ॥ ३ ॥ त्रिशतैर्मध्यमश्चैव द्विशताभ्यां कनिष्ठकः ॥ लक्ष्यं च पुरुषोन्मानं कुर्य्याच्चंद्रकसंयुतम् ॥ ४ ॥ ऊर्ध्ववेधी भवेज्ज्येष्ठो नाभिवेधी च मध्यमः ॥पादवेधी तु लक्ष्यस्य स कनिष्ठो मतो बुधैः॥५॥ अथानध्यायाः॥ अष्टमी च ह्यमावास्या वर्जनीया चतुर्दशी ॥ पूर्णिमार्द्धदिनं यावन्निषिद्धं सर्वकर्मसु ॥ ६ ॥ अकाले गर्जिते देवे दुर्दिनं चाथवा भवेत् ॥ पूर्वकांडहतं लक्ष्यमनध्यायं प्रचक्षते ॥ ७ ॥ अनुराधर्क्षमारभ्य षोडशर्क्षे दिवाकरः ॥ यावच्चरति तं कालमकालं हि प्रचक्षते ॥ ८ ॥ यद्वा । अरुणोदयवेलायां वारिदो यदि गर्जति ॥ तद्दिने स्यादनध्यायस्तमकालं प्रचक्षते ॥ ९ ॥ श्रमं च कुर्वतस्तत्र भुजंगो दृश्यते यदि ॥ अथवा भज्यते चापं यदैव श्रमकर्मणि ॥ ११० ॥ त्रुट्यते वा गुणो यत्र प्रथमे बाणमोक्षणे ॥ श्रमं न तत्र न कुर्वीत शस्त्रे मतिमतां वरः॥११॥ अथ श्रमक्रिया ॥ क्रियाकलापान्वक्ष्यामि श्रमसाध्याञ्छुचिष्मताम् ॥ येषां विज्ञानमात्रेण सिद्धिर्भवति नान्यथा ॥ १२ ॥ प्रथमं चापमारोप्य चूलिकां बंधयेत् ॥ [illegible] ॥ १३ ॥

ततः ॥ [illegible] न ततः कृत्वा बाणोपरि [illegible]

येत् ॥ नमस्कुर्याच्छिवं विघ्नराजं गुरुधनुःशरान् ॥ १५ ॥ या
तव्या गुरोराज्ञा बाणस्याकर्षणं प्रति ॥ प्राणवायुं प्रयत्नेन प्रा
सह पूरयेत् ॥ १६ ॥ कुंभकेन स्थिरं कृत्वा हुंकारेण विर्जये
इत्याभ्यासक्रिया कार्या धन्विना सिद्धिमिच्छता ॥१७॥ षण्मा
त्सिध्यते मुष्टिः शराः संवत्सरेण तु ॥ नाराचास्तस्य सिद्ध्यंति य
तुष्टो महेश्वरः ॥१८॥ पुष्पवद्धारयेद्बाणं सर्पवत्पीडयेद्धनुः ॥ ध
चिंतयेल्लक्ष्यं यदीच्छेत्सिद्धिमात्मनः॥१९॥क्रियामिच्छन्ति चाच
दूरमिच्छन्ति भार्गवाः ॥ राजानो दृढमिच्छन्ति लक्ष्यमिच्छन्ति
तराः॥१२०॥जनानां रंजनं येन लक्ष्यपातात्प्रजायते॥हीनेनापी
तस्मात्प्रशस्तं लक्ष्यवेधनम्॥२१॥अथ लक्ष्यास्खलनविधिः॥वि
खस्थानकं हित्वा समसंधानमाचरेत् ॥ गोपुच्छमुखवामेन
कर्णेन मुष्टिना ॥२२॥ आकर्षेत्कौशिकव्याये न शिखाश्चालयेत्त
पूर्वापरौ समं कार्यौ समांसौ निश्चलौ करौ ॥ २३ ॥ चक्षुषी
दयेन्नैव दृष्टिं लक्ष्ये नियोजयेत्॥मुष्टिनाऽऽच्छादितं लक्ष्यं शरस
ग्रे नियोजयेत् ॥२४॥ मनोदृष्टिगतं ज्ञात्वा ततः कांडं विसर्जये
स्खलत्येव कदाचिन्न लक्ष्ये योधो जितश्रमः ॥ २५ ॥
शीघ्रसंधानम् ॥ आदानं चैव तूणीरात्संधानं कर्षणं तथा ॥ क्षेपण
त्वरायुक्तो बाणस्य कुरुते तु यः ॥२६॥नित्याभ्यासवशात्तस्य
घ्रसंधानता भवेत् ॥ अथ दूरपातित्वम् ॥ मुष्ट्या पताकया
ह्रीचिह्नं दूरपातनम् ॥२७॥ अथ दृढभेदिता॥प्रत्यालीढे कृते स्थ
ह्यधःसंधानमाचरेत्॥दर्दुरस्थानमास्थाय ह्यूर्द्ध्वं धारणमाचरेत्॥२
स्कंधव्यायेन वज्रस्य मुष्ट्या पुंमार्गणेन च ॥ अत्यंतसौष्ठवा
ह्येर्जायते दृढभेदिता॥२९॥अथ हीनगतयः । सूचीमुखा मीनपुच्छ

कितं यस्य ह्यथवा हीनपत्रकम्॥३१॥ कर्करोतं तु चापेन यः कृष्टो हीनमुष्टिना॥मत्स्यपुच्छा गतिस्तस्य सायकस्य प्रकीर्त्तिता॥३२॥ भ्रमरी कथिता ह्येषा सद्भिस्तु श्रमकर्मणि॥ ऋजुत्वेन विना याति क्षेप्यमाणस्तु सायकः॥ ३३॥ अथ बाणानां लक्ष्यस्खलनगतयः॥ वामगा दक्षिणा चैव ऊर्द्धगाऽधोगमा तथा॥चतस्रो गतयः प्रोक्ता बाणस्खलनहेतवः॥ ३४॥ कंपते गुणमुष्टिस्तु मार्गणस्य तु पृष्ठतः॥ संमुखी स्याद्धनुर्मुष्टिस्तदा वामे गतिर्भवेत्॥३५॥ ग्रहणं शिथिलं यस्य ऋजुत्वेन विवर्जितम्॥ पार्श्वे तु दक्षिणं याति सायकस्य न संशयः॥३६॥ऊर्द्धं भवेच्चापमुष्टिर्गुणमुष्टिरधो भवेत्॥ स मुक्तो मार्गणो लक्ष्यादूर्द्धं याति न संशयः॥३७॥ मोक्षणे चैव बाणस्य चापमुष्टिरधो भवेत्॥गुणमुष्टिर्भवेदूर्द्धं तदाऽधोगामिनी गतिः॥३८॥ अथ शुद्धगतयः। लक्ष्यबाणाग्रदृष्टीनां संगतिस्तु यदा भवेत्॥तदानीं मुंचितो बाणो लक्ष्यान्न स्खलति ध्रुवम्॥ ३९॥ निर्दोषः शब्दहीनश्च सममुष्टिद्वयोज्झितः॥ भिनत्ति दृढवेध्यानि सायको नास्ति संशयः॥१४०॥स्वाकृष्टस्तेजितो यश्च सुशुद्धो गाढमुष्टितः॥ नरनागाश्वकायेषु न तिष्ठाति स मार्गणः॥ ४१॥ यस्य तृणसमा बाणा यस्येंधनसमं धनुः॥ यस्य प्राणसमा मौर्वी स धन्वी धन्विनां वरः॥ ४२॥ अथ दृढचतुष्कम्॥ अयश्चर्म घटश्चैव मृत्पिंडश्च चतुष्टयम्॥ यो भिनत्ति न तस्येषुर्वज्रेणाऽपि विदार्य्यते॥ ४३॥ सार्द्धांगुलप्रमाणेन लोहपत्राणि कारयेत्॥ तानि भित्त्वैकबाणेन दृढघाती भवेन्नरः॥४४॥चतुर्विंशतिचर्माणि यो भिनत्तीषुणा नरः॥तस्य बाणो गजेंद्रस्य कायं निर्भिद्य गच्छति॥४५॥भ्राम्यज्जले घटो वेध्यश्चक्रे मृत्पिण्डकं तथा॥भ्रमंतं वेधयेद्यो हि दृढभेदी स उच्यते॥४६॥

काष्ठच्छेदनमेव च ॥ बिन्दुकं गोलकयुगं यो वेत्ति स जयी भ
॥ ४८ ॥ लक्ष्यस्थाने धृतं काण्डं संमुखं छेदयेत्ततः ॥ कि
न्मुष्टिं विधाय स्वां तिर्य्यग्द्विफलकेषुणा ॥ ४९ ॥ संमुखं बाण
यांतं तिर्यग्बाणं न संचरेत् ॥ शरं शरेण यश्छिद्याद्बाणच्छेदी
जायते ॥ ५० ॥ काष्ठेऽश्वकेशं संयम्य तत्र बद्धा वराटिकाम्
हस्तेन भ्राम्यमाणां च यो हंति स धनुर्द्धरः ॥ ५१ ॥ लक्ष्यस्थ
न्यसेत्काष्ठं सार्द्रं गोपुच्छसंनिभम् ॥ यश्छिन्द्यात्तत्क्षुरप्रे
काष्ठच्छेदी स जायते ॥ ५२ ॥ लक्ष्ये बिंदुं न्यसेच्छुभ्रं शुभ्रबंधू
पुष्पवत् ॥ हन्ति तं बिंदुकं यस्तु चित्रयोधी स उच्यते ॥ ५३
काष्ठगोलयुगं क्षिप्तं दूरमूर्द्धं पुरास्थितैः ॥ असंप्राप्तं शरं पृष्ठे तद्गो
च्छमुखेन ह्रि ॥ ५४ ॥ यो हंति शरयुग्मेन शीघ्रसंधानयोगतः ॥
स्याद्धनुर्भृतां श्रेष्ठः पूजितः सर्वपार्थिवैः ॥ ५५ ॥ अथ धावल्लक्ष्यम
रथस्थेन गजस्थेन हयस्थेन च पत्तिना ॥ धावता
श्रमः कार्यो लक्ष्यं हंतु सुनिश्चितम् ॥ ५६ ॥ अथ शब्दवेधित्वम
लक्ष्यस्थाने न्यसेत्कांस्यपात्रं हस्तद्वयांतरे ॥ ताडयेच्छर्करा
स्तच्छब्दः संजायते यदा॥५७॥यत्र चैवोद्यते शब्दस्तं सम्यक् त
चिंतयेत् ॥ कर्णेंद्रियमनोयोगाल्लक्ष्यं निश्चयतां नयेत् ॥ ५८
पुनः शर्करया तच्च ताडयेच्छब्दहेतवे ॥ पुनर्निश्चयतां नेयं शब्द
स्थानानुसारतः॥५९॥ततः किञ्चित्कृतं दूरे नित्यं नित्यं विधानतः
लक्ष्यं समभ्यसेद्धांते शब्दवेधनहेतवे॥६०॥ततो बाणेन हन्यात्तदव
धानेन तीक्ष्णधीः ॥ एतच्च दुष्करं कर्म भाग्ये कस्यापि सिध्यति
॥ ६१ ॥ अथास्त्रविधिः॥एवं श्रमविधिं कुर्याद्यावत्सिद्धिः प्रजायते ।
श्रमे सिद्धे च वर्षासु नैव ग्राह्यं धनुष्करे ॥ ६२ ॥ पूर्वाभ्यासस्

चंडीं गुरुं शस्त्राणि वाजिनः ॥ ६४ ॥ विप्रेभ्यो दक्षिणां दत्त्वा कुमारीं भोजयेत्ततः॥देव्यै पशुबलिं दद्याद्धृष्टो वादित्रमंगलैः ॥६५॥ ततस्तु साधयेन्मंत्रान्वेदोक्तान्वागमोदितान्॥ अस्त्राणां कर्मसिद्ध्यर्थं जपहोमविधानतः॥६६॥ब्राह्मं नारायणं शैवमैंद्रं वायव्यवारुणे ॥ आग्नेयश्चापरास्त्राणि गुरुदत्तानि साधयेत् ॥ ६७ ॥ मनोवाक्कर्मभिर्भाव्यं लब्धास्त्रेण शुचिष्मता ॥ अपात्रमसमर्थं च दहन्त्यस्त्राणि पूरुषम् ॥ ६८ ॥ प्रयोगं चोपसंहारं यो वेत्ति स धनुर्द्धरः ॥ सामान्ये कर्मणि प्राज्ञो नैवास्त्राणि प्रयोजयेत् ॥ ६९ ॥ अथ स्कांदोक्तकतिचिदस्त्रस्वरूपमप्युच्यते॥अथास्त्राणि प्रवक्ष्यामि सावधानोऽवधारय॥ब्रह्मास्त्रं प्रथमं प्रोक्तं द्वितीयं ब्रह्मदण्डकम् १७०॥ ब्रह्मशिरस्तृतीयं च तुर्यं पाशुपतं मतम्॥वायव्यं पंचमं प्रोक्तमाग्नेयं षष्ठकं स्मृतम् ॥ ७१ ॥ नारसिंहं सप्तमं च तेषां भेदा ह्यनंतकाः ॥ ससंहारं सविज्ञेयं शृणु द्रोण यथातथम् ॥ ७२ ॥ वेदमात्रा सर्वशस्त्रं गृह्यते दीप्यतेऽथवा ॥ तत्प्रयोगं शृणु प्राज्ञ ब्रह्मास्त्रं प्रथमं शृणु ॥ ७३ ॥ दादिदन्ताश्च सावित्रीं विपरीतां जपेत्सुधीः॥ जप्त्वा पूर्वां निखर्वं चाभिमंत्र्य विधिवच्छरम् ॥ ७४ ॥ क्षिपेच्छत्रुषु सहसा नश्यंति सर्वजातयः ॥ बाला वृद्धाश्च गर्भस्था ये च योद्धुं समागताः ॥ ७५ ॥ सर्वे ते नाशमायांति मम चैव प्रसादतः॥यथाक्रमं दादिदंतं जपेत्संहारसिद्धये ॥ ७६ ॥ तस्य स्वरूपम् ॥ ॐ द्‍यादचोप्रनोयोयोधिहिमधीस्यवदेगोंभण्यरेर्वतुविसतद्‌स्वोवर्भुभूरोम् ॥ इति प्रयोगः ॥ अथसंहारः॥ॐ भूर्भुवःस्वः तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि धियोयोनःप्रचोदयात्॥इति संहारः॥ब्रह्मदंडं प्रवक्ष्यामि प्रणवं पूर्वमुच्चरेत् ॥ ततः प्रचोदयाज्ज्ञेयं ततो नो यो धियः क्रमात्

द्विलक्षकम् ॥ अभिमंत्र्य शरं तद्वत्प्रक्षिपेच्छत्रुषु स्फुटम् ॥८१
श्यंति शत्रवः सर्वे यमतुल्या अपि ध्रुवम् ॥ एतदेव विपर्यस्तं
त्संहारसिद्धये ॥ ८२ ॥ ब्रह्मशिरः प्रवक्ष्यामि प्रणवं पूर्वमुच्च
धियो यो नः प्रचोदयाद्भर्गो देवस्य धीमहि ॥ ८३ ॥ तत्सवि
णियं शत्रून्मे हनहनेति च ॥ हुंफट् चैव प्रयोक्तव्यं क्षिपेद्ब्रह्मशि
तः ॥ ८४ ॥ पुरश्चर्यां पुरः कृत्वा त्रिलक्षं नियतः शुचिः ॥
ति सर्वे रिपवः सर्वे देवासुरा अपि ॥ ८५ ॥ इदमेव विपर्यस्तं
क्तव्यं विकर्षणे॥अतः परं प्रवक्ष्यामि शस्त्रं पाशुपतं मम॥८६॥
विज्ञानमात्रेण नश्यंति सर्वशत्रवः॥ दादिदन्ताश्च सावित्रीं
प्रणवमेव च ॥ ८७ ॥ श्लींपशुहुंफट् अमुकशत्रून् हनहन हुं
जप्त्वा पूर्वं द्विलक्षञ्च ततः पाशुपतं क्षिपेत् ॥ ८८॥ पुनस्तदे
स्तं स्यात्संहारे तां नि योजयेत् ॥ एतत्पाशुपतं शस्त्रं सर्वशत्रुनि
णम् ॥८९॥ वच्मि वायव्यमस्त्रं ते येन नश्यंति शत्रवः॥ ॐ वा
यावायव्ययाणयौवायययावातथा ॥ १९० ॥ अमुकशत्रून्हनहन हुं
चैव प्रकीर्त्तयेत् ॥ पूर्वमेव तथा जप्त्वा नियुतद्वितयं तथा॥९१॥
संहाररूपेण संहारं च प्रकल्पयेत् ॥ अस्त्रं वायव्यकं नाम देव
मपि वारणम् ॥ ९२ ॥ आग्नेयं संप्रवक्ष्यामि यतः परभयं दहे
ओमग्निस्त्यताह्दुभूं च शिवं वनाश्वाविणिच॥९३॥ह्गादुतिद
पनः सदवेति ततः क्रमात् ॥ हादतितोयतिरामतथा मसोहिवा
॥९४ ॥ सुसेदवेदया च वदेत् ॥ अमुकादींस्ततो वदेत् ॥ पूर्वोक्त
पुरश्चर्यां कृत्वा शस्त्रेऽभियोजयेत् ॥ इमं मंत्रं पुनर्व्यस्तं संहारे
योजयेत्॥९५॥ ॐवज्रनखवज्रदंष्ट्रायुधाय महासिंहाय हुंफट् ॥
जप्त्वा च लक्षं द्वि नारसिंहं च योजयेत् ॥९६ ॥

स्त्वेषां धनुर्वेदे ह्यनंताः परिकीर्त्तिताः ॥ ९८ ॥ इति केदारखंडे श्रीशिवेन द्रोणं प्रति प्रोक्तम् ॥ अथ शस्त्रवारणम्। हस्तार्के लांगलीकन्दो गृहीतस्तस्य लेपतः ॥ शूरस्य चरणे पुंसो दर्पं हरति कातरः ॥ ९९ ॥ गृहीत्वा योगनक्षत्रैरपामार्गस्य मूलकम् ॥ लेपमात्रेण वाराणां सर्वशस्त्रनिवारणम् ॥ २०० ॥ अधःपुष्पी शंखपुष्पी लज्जालुर्गिरिकार्णिका ॥ नलिनी सहदेवी च पुत्रमार्जारिका तथा ॥ १ ॥ विष्णुक्रांता च सर्वासां जटा ग्राह्या रवेर्दिने ॥ बद्धा भुजे विलेपाद्वा काये शस्त्रापवारकाः ॥ २ ॥ सर्पव्याघ्रादिसत्वानां भूतादीनां न जायते ॥ भीतिस्तस्य स्थिता यस्य मातरोऽष्टौ शरीरके ॥३॥ गृहीतं हस्तनक्षत्रे चूर्णं छुच्छुंदरीभवम् ॥ तत्प्रभावाद्गजः पुंसः संमुखं नैति निश्चितम् ॥४॥ च्छुछुंदरीश्रीफलपुष्पचूर्णैरालिप्तगात्रस्य नरस्य दूरात् ॥ आघ्राय गंधं द्विरदोऽतिमत्तो मदं त्यजेत्केसरिणो यथोग्रम् ॥५॥ श्वेताद्रिकर्णिकामूलं पाणिस्थं वारयेद्गजम् ॥ श्वेतकंटारिकामूलं व्याघ्रादीनां भयं हरेत् ॥ ६ ॥ पुष्यार्कोत्पाटिते मूले पाठाया मुखसंस्थिते ॥ देहं स्फुटति नो तीक्ष्णमंडलाग्रै रणे नृणाम् ॥ ७ ॥ गंधार्य्या उत्तरं मूलं मुखस्थं संमुखागतम् ॥ शस्त्रौघं वारयेत्तत्र पुष्यार्के विधिनोद्धृतम् ॥ ८ ॥ विधिरुपवासः ॥ शुभ्रायाः शरपुंखाया जटा नीलीजटाऽथवा ॥ भुजे शिरसि वक्त्रे वा स्थिता शस्त्रनिवारिका ॥ भूपाहिचोरभीतिघ्नी गृहीता पुष्यभास्करे ॥९॥ अथ संग्रामविधिः। प्रथमं क्रियते स्नानं शुक्लवस्त्रावृतो भवेत् ॥ मंगलगीतसंयुक्तो देवविप्रांश्च पूजयेत् ॥ २१० ॥ क्षेत्रपालस्य नाम्ना च बलिं दद्याद्दिशो दश ॥ शस्त्राणि चापि संपूज्य रक्षामंत्रं स्मरेत्ततः ॥ ११ ॥ मंत्रश्च ॥ ओं मूलेन पाहि नो देवि पाहि खड्गेन चांबिके ॥

श्वरि ॥१३॥ सौम्यानि यानि रूपाणि त्रैलोक्ये विचरंति ते ॥
चात्यंतघोराणि तै रक्षास्मांस्तथा भुवम् ॥१४॥ खड्गशूलगदा
यानि चास्त्राणि तेऽम्बिके॥करपल्लवसंगीनि तैरस्मात्रक्ष सर्वतः॥
इतिरक्षामंत्रः ॥ दिव्यौषधीनां लेपश्च रक्षाबंधं च कारये
किञ्चिद्भुक्त्वा च पीत्वा च ततः सन्नाहमाचरेत् ॥ १६ ॥ सेन
गजारोहांस्तांस्तांश्च सुभटांस्तथा ॥ मुख्यानन्यानपि धनैर्व
परितोषयेत् ॥ १७ ॥ पूर्वं सारथिमारोप्य रथे सज्जे ततः स्वय
योजयेद्वाजिनः शुद्धान्सुसंतुष्टाञ्जितश्रमान् ॥ १८ ॥ रथे
धारयेद्भद्रं कार्मुकाणां चतुष्टयम् ॥ चतुःशतानि बाणानां तू
राणि प्रपूरयेत् ॥ १९ ॥ खड्गं चर्म गदां शक्तिं परिघं मुद्गरं त
नाराचान्परशुं कुंतं पट्टिशादींश्च धारयेत् ॥ २२० ॥ न रथ
गजा यस्य सोऽश्वमेव समारुहेत् ॥ कटिबद्धैकतूणीरः खड्गश
धनुर्युतः ॥ २१ ॥ ततोऽर्जुनस्य नामानि विष्णुस्मरण
कम् ॥ जपेत्ततः प्रतिष्ठेत चतुरंगबलैर्युतः ॥ २२ ॥ लाभस्
जयस्तेषां कुतस्तेषां पराजयः ॥ येषां हृदिस्थो भगवान्मंगल
तनं हरिः ॥ २३ ॥ अर्जुनः फाल्गुनः पार्थः किरीटी श्वेतवाहनः
बीभत्सुर्विजयः कृष्णः सव्यसाची धनंजयः ॥ २४ ॥ इन्द्र
कर्णहंता शिवशिष्यः कपिध्वजः ॥ नामान्येतानि युद्ध
स्मृत्वा विजयमश्नुते ॥ २५ ॥ अथाक्षौहिणीसंख्या ॥ ख
स्वरवास्विन्दुनेत्रैरक्षौहिणी मता ॥ २१८७०० ॥ अक्षौहि
प्रदिष्टानां रथानां वर्मधारिणाम् ॥ २६ ॥ संख्या गणित
तत्त्वज्ञैः सहस्राण्येकविंशतिः ॥ उपर्यष्टौ शतान्याहुस्तथा भू
सप्ततिः २१८७० ॥ २७ ॥ गजानां तु परीमाणमेतदेव प्र

तथाश्वानां शतानि च॥२९॥दशोत्तराणि षट् प्राहुः संख्यातत्त्वविदो जनाः॥३०॥अथ महाक्षौहिणी ॥ खद्वयं निधिवेदाक्षिचंद्राक्ष्यग्निहिमांशुभिः ॥ १३'२१'२४'९'०० ॥ महाक्षौहिणिका प्रोक्ता संख्यागणितकोविदैः ॥ ३१ ॥ कोटचस्त्रयोदश प्रोक्ता लक्षाणामेकाविंशतिः ॥ चतुर्विंशसहस्राणि तथा नव शतानिच ॥ ३२ ॥ महाक्षौहिणिकां प्राहुस्संख्यातत्त्वविदो जनाः ॥ ३३ ॥ महाक्षौहिणिकायां तु रथाःकोटिमिताः स्मृताः ॥ अश्वाश्चतुःकोटिमिता लक्षाण्येकादशैव च ॥ ३४ ॥ प्रोक्तानि नवतिस्तद्वदेवमेव गजा मताः ॥ गजाश्चतुःकोटिमिता लक्षाण्येकादशैव च॥३५॥ सप्तविंशसहस्राणि तथा नव शतानि च॥कोचित्तु। महाक्षौहिणिकां प्राहुरिमां तत्त्वविदो जनाः ॥ ३६ ॥ महाक्षौहिणिकायां तु रथाः कोटिमिताः स्मृताः ॥ सप्तत्रिंशच्च लक्षाणि गीयंते तत्त्ववेदिभिः ॥३७॥ द्वादशैव सहस्राणि चत्वार्येव शतानि च ॥ प्रोक्तानि नवतिस्तद्वदेवमेव गजाः स्मृताः॥ ॥३८॥अश्वाश्चतुष्कोटिमिता लक्षाण्येकादशैव च॥सप्तत्रिंशत्सहस्राणि तथा शतचतुष्टयम् ॥ ३९ ॥ सप्ततिश्चैव संख्याताः प्रोच्यंते पत्तयस्ततः॥षट्कोट्योशीतिलक्षाणि पंचाधिकमितानि च॥४०॥ द्विषष्टिश्च सहस्राणिं तथा शतचतुष्टयम् ॥ पंचाशदिति संख्याता महाक्षौहिणिका बुधैः ॥ ४१ ॥ अथ व्यूहविधिः ॥ मुखे रथा गजाः पृष्ठे तत्पृष्ठे च पदातयः ॥ पार्श्वयोश्च हयाः कार्या व्यूहस्यायं विधिः स्मृतः ॥४२॥ अर्द्धचंद्रश्च चक्रश्च शकटं मकरं तथा ॥ कमलश्रेणिका गुल्मं व्यूहान्येवं प्रकल्पयेत ॥ ४३ ॥ अथ युद्धविधिः ॥ ये राजपुत्राः सामन्ता आप्ताः सेवकजातयः ॥ तान्सर्वानात्मनः पार्श्वे रक्षार्थे स्थापयेन्नृपः ॥४४॥ यस्मिन्कुले यः

ज्ञमनुरागि चेत् ॥ अपि स्वल्पं श्रिये सैन्यं वृथेयं मुंडम
॥ ४६ ॥ अपि पञ्चशताः शूरा मृद्नंति महतीं चमूम् ॥ अथ
यंच षट् सप्त विजयंतेऽ निवर्तिनः ॥ ४७ ॥ धनुःसंगतिसंशुद्ध
जिनो मुखदुर्बलाः॥आकर्णपतिता योधाः संग्रामे जयनादिनः॥
परस्परानुरक्ता ये योधाः शार्ङ्गधनुर्द्धराः ॥ युद्धज्ञास्तुरगारू
जयंति रणे रिपून् ॥ ४९ ॥ एकः कापुरुषो दीर्णो दारयेन्म
चमूम् ॥ तद्दीर्णमनुदीर्यन्ते योधाः शूरतमा अपि ॥ २५० ॥
वारतरा चैव प्रभग्ना महती चमूः ॥ अपामिव महावेगस्त्रस्ता मृ
णा इव ॥ ५१ ॥ यस्तु भग्नेषु सैन्येषु विद्रुतेषु निवर्त्तते ॥
पदेऽश्वमेधस्य लभते फलमव्ययम् ॥ ५२ ॥ द्वाविमौ पुरुषौ
सूर्यमंडलभेदिनौ॥परिव्राड्योगयुक्तश्च रणे चाभिमुखो हतः॥
यत्रयत्र हतः शूरः शत्रुभिः परिवेष्टितः ॥ अक्षयं लभते लोकं
क्लीबं न भाषते ॥ ५४ ॥ मूर्च्छितं नैव विकलं नाशस्त्रं नान्ययं
नम् ॥ पलायमानं शरणं गतं चैव न हिंसयेत् ॥ ५५ ॥
पलायमानोऽपि नान्वेष्टव्यो बलीयसा ॥ कदाचिच्छूरतां या
रणे कृतनिश्चयः ॥ ५६ ॥ संभृत्य संहतीं सेनां चतुरंगां महीपा
व्यूहयित्वाऽग्रतः शूरान्स्थापयेज्जयलिप्सया॥५७॥अल्पायां व
हत्यां वा सेनायामिति निश्चयः ॥ सर्वयोद्धृगणस्यैको जयल
उच्यते ॥ ५८ ॥ पृष्ठेन वायवो वांति पृष्ठे भानुर्वयांसि च ॥ अ
प्लुवन्ते मेघाश्च यस्य तस्य रणे जयः ॥५९॥ अपूर्णेनैव मर्त्तव्यं
र्णेनैव जीवनम् ॥ तस्माद्धैर्य्यं विधातव्यं हंतव्या परवाहिनी॥२६
जिते लक्ष्मीर्मृते स्वर्गः कीर्त्तिश्च धरणीतले ॥ तस्माद्धैर्यं विधात
हंतव्या परवाहिनी ॥ ६१ ॥ इति धनुर्वेदोद्धृतधनुर्वेदसारः ॥

वेदस्य प्रयोजनम् । गीतं गानशिक्षागीतनिर्माणम्।स्वरजातिरागभे-
दास्तालमात्रादिरचनाप्रकाराः । साधकबाधकस्वरादिमेलनपरि-
ज्ञानञ्च 'स्वरगं पदगं चैव तथा लयगमेव चाचेतोवधानगं चैव गेयं
ब्रूयुश्चतुर्विधम् ॥' स्वरादिभेदा अनंता रागाश्च भैरवश्रीरागादिभे-
देन षोढाऽप्यवांतरभेदैरनन्ता एव । तालश्च क्रियामानं क्रिययाऽऽ
वापनिष्क्रमादिकया मानं परिच्छेदः। लयश्च गीतवाद्यपादादिन्या-
सानां क्रियाकालयोः साम्यम् । वाद्यं घनं तथानद्धं ततं सुषिरमेव
च। कांस्यपुष्करतंत्रीभिर्वेणुना च यथाक्रमम् ॥ एतदेवामरेणाप्यु-
क्तं 'ततं वीणादिकं वाद्यमानद्धं मुरजादिकम् । वंशादिकं तु सुषिरं
कांस्यतालादिकं घनम् ॥ चतुर्विधमिदं वाद्यम्'इति।तत्र 'नृत्यं कृ-
तानुकरणं नाट्यं तु नर्तकाश्रयम् । करणान्यंगहाराश्च विभावो भा-
व एव च॥अनुभावो रसाश्चेति संक्षेपान्नृत्यसंग्रहः॥'इति । करणानि
साधनानि ॥ अंगहारोऽगविक्षेपः । विशेषेण भावयंत्युत्पादयंति रस-
मिति विभावाः । स्त्रीवसंतोद्यानादयः रसकारणानि । अनुभूयते ल-
क्ष्यरस एभिरित्यनुभावाः।कंपस्वेदादीनि रसकार्याणि भावाः सात्वि-
काःस्तंभादयो व्यभिचारिणश्च धृतिस्मृत्यादय एतैरुत्कर्षमारोप्य-
माणोऽत्र व्यंजितः स्थायीभावो रत्यादिः शृंगाररसरूपो भवतीति
तत्त्वम् ॥ अथ च किञ्चिद्गांधर्ववेदप्रक्रियामपि ब्रूमः । प्रणम्य
सर्वदेवेशं शिवं ब्रह्मादिकांस्ततः ॥ गांधर्वशास्त्रसंक्षेपः सारतो-
ऽयं मयोच्यते ॥ १ ॥ यदुक्तं ब्रह्मणः स्थानं ब्रह्मग्रंथिश्च
यो मतः ॥ तन्मध्ये संस्थितः प्राणः प्राणाद्वह्निसमुद्भवः ॥ २ ॥
वह्निमारुतसंयोगान्नादः समुपजायते ॥ न नादेन विना गीतं न
नादेन विना स्वरः ॥ ३ ॥ न नादेन विना नृत्यं नाट्यं नादं विना

स रागो जनरंजकः ॥ ५ ॥ पदस्थस्वरसंघातस्तालेनानुमितस्त
प्रयुक्तश्चावधानेन गांधर्वमभिधीयते ॥ ६ ॥ तदेतन्नारदादिभ्यो
मादौ स्वयंभुवा ॥ विधिवन्नारदेनादः पृथिव्यामवधारितम्॥७॥
वेत्ति शिशुर्वेत्ति वेत्ति गीतरसं फणी॥यत्ते गीते विलीनाः स्युः स
चित्तवृत्तिभिः ॥ ८ ॥ अपि ब्रह्मपदानंदादिदमेवाधिकं ध्रुव
जहार नारदादीनां चेतांस्यन्यस्य का कथा ॥९॥ इति गीतप्रशं
अथ सुगीतलक्षणम् ॥ सुस्वरं सरसं चैव सरागं मधुराक्षरम्
सालंकारप्रमाणञ्च षड्विधं गीतलक्षणम् ॥ १० ॥ स्वरेण पदसं
छंदसा च सुसंयुतम् ॥ सुमारुतं सुतालं च सुगीतं तेन भ
॥११॥ इति सुगीतम् ॥ वाङ्मातुरुच्यते गेयं धातुरित्यभिधी
वाचा च गेयं कुरुते यः स वाग्गुपकारकः ॥ १२ ॥ शब्दानु
नज्ञानमभिधानप्रवीणता ॥ गणच्छंदोरुवेदित्वमलंकारेषु व
लम् ॥ १३ ॥ तौर्यत्रितयचातुर्य्यं हव्यशारीरपालितम् ॥ ल
लकलाज्ञानं विवेकोनेककाकुषु ॥ १४ ॥ देशीरागेषु वि
वाक्पटुत्वं सभाजयः ॥ इति वाग्गुपकारस्य गुणाः प्रतिनिरू
॥१५॥अधमो मातुकारश्च धातुकारश्च मध्यमः॥धातुमातुक्रिया
उत्तमः परिकीर्तितः ॥ १६ ॥ अधमो लक्षणेन स्यान्मध
लक्ष्यमाचरन् ॥ स लक्षणेन संयुक्त उत्तमः परिकीर्तितः ॥
इति वाग्गुपकारलक्षणानि ॥ अथ शिष्यकारः ॥ त्वरितः शि
यस्तु सकंठो मधुरस्वरः ॥ रागतालसमोपेतः शिष्यकारः स उ
ते ॥ १८ ॥ अथ गायनलक्षणम् ॥ प्रबंधमात्रनिष्णातो विवि
लापकारकः ॥ रागरागांगभाषांगक्रियागेयांगकोविदः ॥ गा
गीतशास्त्रज्ञैर्भण्यते सर्वसंमतः ॥ १९ ॥ अथ गायनदोषाः ॥ कं

न्याकुलं तालहीनञ्च गातुर्दोषाश्चतुर्दश ॥२१॥ अथ सालगसूढः ॥
हिमवत्कन्यकाप्रीत्यै देवदेवेन शंभुना ॥ शुद्धरागाद्विनिष्पीड्य
सरसं सालगं कृतम् ॥ २२ ॥ शुद्धरागसमुत्पन्नं छायालगमनोहरम्॥
अबलाबालगोपालक्षितिपालैः सगीयते ॥ २३ ॥ आद्यो ध्रुवस्ततो
मंठः प्रतिमंठो निशारुकः ॥ अड्डतालस्ततो रास एकताली च
संमता ॥ २४ ॥ अथैषु ध्रुवकलक्षणम् ॥ न विवेकं विना ज्ञानं
ध्यानं नात्मरसं विना ॥ श्रद्धया न विना दानं गानं न ध्रुवकं
विना ॥ २५ ॥ उत्तमः षट्पदैः प्रोक्तो मध्यमः पंचभिस्तथा ॥
कनिष्ठस्तु चतुर्भिः स्यादेवं स्युर्ध्रुवकास्त्रिधा ॥ २६ ॥
एकधातुर्द्विखंडः स्याच्छत्रोद्ग्राहस्ततः परम् ॥ तृतीयं किञ्चिदुच्चं
स्यात्खंडं गमकशोभनम् ॥२७॥ ततो द्विखंड आभोगस्तृतीयं त-
स्य खंडकम् ॥ उच्चं गमकयुक्तं वा नवा स्वाम्यंकितं च तत्॥२८॥
उद्ग्राहस्याद्यखंडे च न्यासः स ध्रुवको मतः॥एवं हि षट्पदः प्रोक्त
उत्तमो ध्रुवको बुधैः ॥ २९ ॥ पंचपादस्य तूद्ग्राहे पदयुग्मं प्रशस्य-
ते ॥ तृतीयं चोच्चखंडं स्याद्द्विरभ्यस्तमिदं त्रयम् ॥३०॥ आभोग-
श्चैकखंडः स्याद्द्वितीयं चोच्चखंडकम् ॥ तुल्यनामांकितं चैतादिति
मध्यमलक्षणम् ॥३१॥ चतुष्पादस्य तूद्ग्राहे पदैकं स्यात्ततः परम्॥
किंचिदुच्चं द्वितीयं स्याद्द्विरभ्यस्तमिदं द्वयम्॥३२॥आभोगे च तथै-
कं स्यात्किंचिदुच्चं द्वितीयकम्॥अभुनामांकितं चैतत्कनिष्ठस्येति ल
क्षणम्॥३३॥षण्णां पदानां वा वर्णनियमो वा द्वयोर्भवेत्॥पदयोर्व-
र्णनियमो ध्रुवाणां हि द्विधा गतिः ॥ ३४ ॥ पदद्वये यदा वर्णनि-
यमः क्रियते बुधैः ॥ तदा पदा[illegible] चास्यानि भवंति नियमं विना
॥ ३५ ॥ एकादशाक्षरात्पादादेकैकाक्षरवर्द्धितैः ॥ खंडैर्ध्रुवाः षोड-

षोडशध्रुवाणां नामानि ॥ जयन्तः शेखरोत्साहौ ततो म
लौ ॥ कुंतलः कमलाचारो नंदनश्चंद्रशेखरः ॥ ३८ ॥
विजयाक्षश्च कंदर्पजयमंगलौ ॥ तिलको ललितश्चैव ध्रुवाः
कीर्त्तिताः॥३९॥आदितालो जयन्तः स्याच्छृंगाररससंयुतः
संख्याक्षरपदैरायुर्वृद्धिकरः परः ॥ ४० ॥ एक एव लघुर्यस्मि
तालः स कथ्यते ॥ सयथा(।ऽऽऽऽऽऽऽऽऽऽऽऽ) इति ॥ द्वादशाक्ष
न्यो भागैकफलकृत्प्रभोः ॥ ४१ ॥ हंसके च रसे वीरे गी
खराह्वयः ॥ लघुर्गुरुर्लघुर्यत्र स तालो हंसकः स्मृतः ॥ ४
यथा (।ऽ।) इति॥उत्साहः स्याद्रसे साम्ये ताले कंदुकसंज्ञके
भिवृद्धिकृत्पादस्त्रयोदशमिताक्षरः ॥४३॥ लघुद्वयं विरामा
कंदुकसंज्ञके॥स यथा (।।) गार्ग्यतालेन गीयेत कारुण्ये मधु
॥ ४४ ॥ अंघ्रिर्द्विसप्तभिर्वर्णैरानंदफलदः सदा ॥ चतुर्द्रुतो
तस्तालोऽयं गार्ग्यसंज्ञकः॥४५॥स यथा(०००) क्रीडाताले
स्यात्तिथिवर्णांघ्रिनिर्मलः ॥ शृंगाररससंयुक्तः श्रोतुस्तेजो
॥ ४६ ॥ एक एव द्रुतो यस्मिन् क्रीडातालः स कथ्य
यथा(०)वर्णैः षोडशभिः पादः कुंतलो लघुशेखरे ॥ ४७ ॥
दः शौर्यदः स्याद्द्भुताख्यरसान्वितः॥लघुर्गुरुर्भवेद्यत्र स भवे
खरः॥४८॥स यथा (।ऽ) वर्णैश्च सप्तदशकैरंघ्रिः शृंगारके रसे।
मलयाख्ये वै स्वायुर्वृद्धिकरः परः॥४९॥मलयाख्ये भवेत्ताले
घुरतो गुरुः ॥स यथा (ऽ।ऽ) चारोष्टादशवर्णांघ्रिर्यशोहर्षप्रदो
फणिभाषायुतो वीरे रसे कंदुकतालके॥५०॥लघुद्वयं विरामां
कंदुकसंज्ञके॥स यथा(ऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽ।।) नंदद्वयेन्दुवर्णां
सर्वसिद्धिदः॥५१॥पूर्णशृंगारवीराभ्यां कंदुके च विधीयते ॥

धीयते॥५३॥द्रुतद्वयं लघुद्वंद्वं ताले त्रिपुटसंज्ञके॥स यथा(००॥)एक-विंशतिवर्णाङ्घ्रिर्भवेच्छृंगारके रसे॥५४॥कामदोभीष्टदः पुंसां तालके तुरलीलके॥द्रुतद्वयं लघु चांते तालःस्यात्तालकेतुकः॥स यथा (००।) विजयाक्षो ध्रुवः स स्याद्द्वाविंशत्यक्षरांघ्रिकः ॥ ५५ ॥ सन्निपातेन संयुक्तः शृंगारेऽभीष्टदो रसे ॥ एक एव गुरुर्यत्र सन्निपातः स कथ्यते॥५६॥स यथा (ऽ) त्रयोविंशतिवर्णांघ्रिर्ध्रुवः कंदर्पसंज्ञकः॥ वीरे वा करुणे वा स्यात्खंडताले विधीयते ॥५७॥ द्रुतमेकं भवेद्यत्र तालोऽयं खंडसंज्ञकः॥ स यथा (०) द्विघ्नद्वादशवर्णांघ्रिस्तालो वा खंडके भवेत् ॥ ५८ ॥ वीरशृंगाररसयोर्जयकृज्जयमंगलः ॥ द्रुतद्वयं विरामांतं लघुनैकेन रूपकः ॥५९॥ स यथा (००) पंचविंशाक्षरैः पादो यस्यासौ ललिताह्वयः ॥ ताले वाचपुटे गेयो वीरेवाप्यद्भुते-ऽपि वा ॥ ६० ॥ तालं वाचपुटं ज्ञेयं गुरुर्लघुयुगं गुरुः ॥ स यथा (ऽ॥ ऽ) यः षड्विंशतिवर्णांघ्रिः स स्यात्सर्वार्थसिद्धिदः ॥ ६१ ॥ ललितश्चपुटाख्ये च ताले शृंगारपोषकः ॥ ताले च चपुटे ज्ञेयं गुरुद्वंद्वं लघुस्ततः ॥ ६२ ॥ स यथा (ऽऽ।) इति षोडश ध्रुवाः ॥ अथ मंठकलक्षणम् ॥ उद्ग्राहो ध्रुपदश्च स्यादाभो-गस्तदनंतरम् ॥ नियमास्त्रिविधो ज्ञेयो मंठकस्य विचक्षणैः ॥ ६३ ॥ जयप्रियः कलापश्च कमलस्सुंदरस्तथा ॥ वल्लभो मंगलश्चेति षडे-ते मंठका मताः ॥ ६४ ॥ लघुर्गुरुर्लघुर्यत्र स तालो हंसकः स्मृतः॥ तालश्चायं रसे वीरे कर्तव्यो जयमंठके ॥ ६५ ॥ हंसतालः (।ऽ।) रंगताले तु विज्ञेयो लघुश्चैको गुरुद्वयम् ॥ कलापो मंठकस्तेन रसे रौद्राभिधानके ॥६६॥ रंगतालः (।ऽऽ) लघुद्वयं गुरुश्चैकस्तालोऽ-यं दर्पणः स्मृतः ॥ आस्मिस्ताले रसे शांते कमलो मंठको भवेत

मलयाह्वे भवेत्ताले गुरुर्लघुरतो गुरुः ॥ वल्लभो मंठको गे
स्मिन्करुणे रसे ॥६९॥ मलयतालः (ऽ।ऽ) गुरुर्लघुद्वयं
तालः स कथ्यते ॥ मंगलो मंठको ज्ञेयो रसे चाद्भुतसंज्ञके
भृंगतालः (ऽ।।) इति षण्मंठकाः ॥ अथ प्रतिमंठकल
तालश्चाप्यमरश्चैव विचारः कुंदसंज्ञकः ॥ चत्वारः का
प्रतिमंठास्तु शंभुना ॥ ७१ ॥ विरामांतं द्रुतद्वंद्वं गुरुश्चै
परम् ॥ सुरंगताले गातव्यस्तालश्च प्रतिमंठकः ॥ ७२ ॥ सु
(००ऽ) गुरुरेको भवेद्यत्र सन्निपातः स कथ्यते ॥ अमरप्र
सौ विद्वद्भिस्तेन गीयते ॥ ७३ ॥ सन्निपातः (ऽ) लघुद्व
मांते ताले कंदुकसंज्ञके ॥विरागो गीयते तेन विलंबश्च ल
॥ ७४ ॥ कंदुकतालः (००) द्रुतमेकंभवेद्यत्र स ताल
ज्ञकः ॥ द्रुतंलयेन गातव्यः कुंदश्च प्रतिमंठकः ॥ ७५ ॥
(०) अथ निःसारुकलक्षणम् ॥ कांतारः स
वैकुंठो वांच्छितस्तथा ॥ विशालश्च तथानंदः
निःसारुको भवेत् ॥ ७६ ॥ लघुद्वयं विरामांते ताले कंदु
द्रुतं लयेन गातव्यः कांतारो भवति स्फुटः॥७७॥कंदुकः
द्वयं विरामांते ताले कंदुकनामनि॥समरो गीयते तेन मध्य
यो भवेत् ॥७८॥ द्रुतद्वंद्वं गुरुद्वंद्वं भवेत्ताले मुकुंदके ॥ अ
वैकुंठो ह्ययो निःसारुकः सदा॥७९॥मुकुंदः(००ऽऽ)लघुत्र
ताले सरभलीलके॥अयं निःसारुको ज्ञेयो वांछितो वांछितप्र
विशालोप्येतादृश एव॥द्रुतमेकं भवेद्यत्र क्रीडातालः स व
अनेन गीयते नंदो नित्यं निस्सारुकोत्तमः ॥ ८१ ॥ क्री
अथ पटतालक्षणम्॥शकः कीलश्च विजयश्चारो निःशंक

लघुशेखरः (।ऽ) द्रुतद्वयं विरामांतं लघुनैकेन संयुतम् ॥ जयतालो भवेत्तेन गेयः शांते बुधोत्तमैः ॥ ८४ ॥ विजयतालः (० ० ।) उमातिलकताले तु द्रुतौ लघुगुरू स्मृतौ ॥ चाराख्यस्त्वङ्तालः स्याद्विद्वद्भिस्तेन गीयते ॥ ८५ ॥ चाराख्याड्तालः (० ० ।ऽ) प्लुतमेकं द्रुतौ द्वौ च वनमालिनि तालके ॥ निःसंगस्त्वड्तालः स्याद्बुधैस्तेनैव गीयते ॥८६॥ वनमाली (ऽ० ०) राजतालाभिधाने तु लघुदुतौ लघुः स्मृतः ॥ अनेन तु समायुक्तो मकरंदस्त्वड्तालकः ॥८७॥ राजतालः (।०।) अथ रासकलक्षणानि ॥ चतुर्द्धा रासकाः प्रोक्ता गीतवाद्यविशारदैः ॥ विनोदो वरदो नंदः कंबुजश्चेति कीर्त्तितः ॥ ८८ ॥ एक एव लघुर्यत्र ह्यादितालः स कथ्यते ॥ विनोदो रासकस्तेन गातृश्रोतृसुखावहः ॥ ८९ ॥ आदितालः (।) लघुद्रुतौ गुरुर्यत्र तालोयं गजलीलकः ॥ वरदो रासको गेयः श्रोतॄणां च सुखावहः ॥९०॥ गजलीलकः (।०ऽ) प्लुतश्च गुरुरेकत्र तालो विद्याधरः स्मृतः ॥ यत्रासौ रासको नंदो गीयतेऽभ्युदये शुभः ॥ ९१ ॥ विद्याधरः (ऽऽ) राजविनोदे ताले स्याद्गुरुद्वंद्वमथ प्लुतः ॥ रासकः कंबुजस्तेन गीयते गीतिकोविदैः॥९२॥ राजविनोदः (ऽऽऽ) अथैकतालीलक्षणम् ॥ एकताली त्रिधा प्रोक्ता गीतवाद्यविशारदैः॥रामा च चंद्रिका तद्वद्विपुलेत्यथ लक्षणम्॥९३॥ द्रुतमेकं भवेद्यत्र तालोऽयं खंडसंज्ञितः ॥ रामा तनैकताले तु गीयते गायकोत्तमैः॥ ९४ ॥ खंडतालः (०) गुरुद्वयं भवेद्यत्र तालो ललितसंज्ञितः॥चंद्रिका चैकताली स्यात्तेन सौभाग्यदायिनी॥९५॥ ललितः (ऽऽ) कोकिलाप्रियताले वै द्रुतत्रयमुदाहृतम् ॥ विपुला चैकताली स्यात्तेन गीतज्ञसंमता॥९६॥ कोकिलाप्रियः (० ० ०) ॥

ग्याः सदा बुधैः ॥९८॥ इति तालगरुडः ॥ अथ शुद्धसूढनाम
एलाकरणडेकीभिर्वर्त्तिन्याद्ध्रुमडेनच ॥ लंभरासेकतालीभिः शु
ढोष्टभिः स्मृतः ॥ ९९ ॥ शुद्धसूढोन्यदेशेषु गीयते विरलैः ब
त् । अतो न विस्तरो लोके दक्षिणेषु च गीयते ॥१००॥ अथ
कम् ॥ उद्ग्राहश्चान्यधातुः स्याद्ध्रुवकश्चान्यधातुकः ॥ मेलापकं
धातुः स्यादाभोगश्चान्यधातुकः ॥ चतुर्द्धातुकमेतद्धि रूपकं
र्त्यते बुधैः ॥ १ ॥ अथगमकम् ॥ स्फुरितं कंपितं लीनं स्तिमि
दोलितावपि ॥ आहतं त्रिकभिन्नं च गमकं सप्तधा स्मृतम् ॥
अथ प्रत्यंतरम् ॥ उद्दिष्टं वस्तुरागादौ किञ्चिदाधिक्यचिंतित
तद्धातुमातुनिष्पन्नं प्रत्यंतरमितीरितम् ॥ ३ ॥ पूर्वरूपकसं
छायासंस्कृतरूपकम् ॥ तत्स्थानं प्रोच्चनीचं च खलोत्तारं प्रकं
तम् ॥ ४ ॥ अथ स्वरादिकथनम् ॥ सामवेदात्स्वरा ज
स्वरेभ्यो ग्रामसंभवः ॥ ग्रामेभ्यो जातयो जाता जाति
रागसंभवः ॥ ५ ॥ देशीरागाः स्वरा वैते विख्याता देशर
तः ॥ ग्रामरागोद्भवा भाषा भाषाभ्यश्च विभाषिकाः ॥ ६ ॥ वि
षाभ्योऽपि संजातास्तथैवांतरभाषिकाः ॥ सप्त स्वरास्त्रयो ग्र
मूर्च्छनाश्चैकविंशतिः ॥ ७ ॥ द्वाविंशतिश्च श्रुतय एतेभ्यो रा
भवः ॥ षड्जर्षभकगांधारमध्यपञ्चमधैवताः ॥ निषादश्चेत्यमी
तंत्रीकंठोत्थिताः स्वराः ॥ ८ ॥ षड्जादयः स्वराः सप्त ग्र
च षड्जमध्यमौ ॥ केचिद्गांधारमप्याहुस्स तु नेहास्ति भूतले ॥
चतुर्दशैव श्रुतयस्तावन्मानाश्च मूर्च्छनाः ॥ गीयन्ते मानवैर्भूम
न्यास्तु त्रिदशालये ॥११०॥ स्वयंयो राजते नादः स स्वरः प
कीर्त्तितः॥स्वरैश्च निखिलं व्याप्तं तद्विज्ञेयं पृथक्पृथक् ॥११॥

अजा वदति गांधारं क्रौंचो वदति मध्यमम् ॥ १३ ॥ पुष्पसाधारणे काले कोकिलः पञ्चमं वदेत् ॥ दर्दुरो धैवतं चैव निषादश्च वदेद्गजः ॥ १४ ॥ हास्यशृंगारयोः कार्य्यौ स्वरौ पंचममध्यमौ ॥ षड्जर्षभौ तथा ज्ञेयौ वीररौद्राद्भुते रसे॥१५॥गांधारश्च निषादश्च कर्त्तव्यौ करुणारसे ॥ धैवतश्चैव कर्त्तव्यो बीभत्से च भयानके॥१६॥ चतुःश्रुतिस्त्रिश्रुतिश्च द्विश्रुतिश्च चतुःश्रुतिः ॥ चतुःश्रुतिस्त्रिश्रुतिश्च द्विश्रुतिश्चेति ते स्वराः ॥ १७ ॥ अथ षट्त्रिंशत्प्रवर्त्तकरागी-उच्यते ॥ भैरवः पञ्चमो नाटो मल्लारो गौडमालवः ॥ देशाषश्चेति षड् रागाः प्रोच्यंते लोकविश्रुताः ॥ १८ ॥ वंगपालो गुणकारी मध्यमादिर्वसंतकः ॥ धन्याश्रीश्चेति पंचैते रागा भैरवसंश्रिताः॥१९॥ललिता गुर्जरी देशी विराटी रामकृत्तथा॥मता रागार्णवे रागाः पंचैते पंचमाश्रयाः ॥ १२० ॥ नटनारायणः पूर्वं गांधारः सालगस्तथा ॥ तथा कर्णाटकेदारौ पञ्चैते नाटसंश्रयाः॥२१॥ मेघमल्लारिका मालकौशिकः प्रतिमंजरी ॥ आसावरी च पंचैते रागा मल्लारसंश्रयाः ॥ २२ ॥ हिंदोलस्त्रिगुणा धाली गौडी कोलाहलास्तथा ॥ पंचैते गौडनामानं रागमाश्रित्य संस्थिताः ॥२३॥ भूपाली हरिपालश्च कामोदी धोरणिस्तथा ॥ वेलावली च पंचैते रागा देशाषसंस्थिताः ॥ २४ ॥ अन्येऽपि बहवो रागा जाता देशविशेषतः॥मारुप्रभृतयो लोके ते च भद्रेशिकाः स्मृताः॥२५॥ श्रीआदिपुराणेतु । भैरवो मुख्यरागश्च द्वितीयो मालकौशिकः ॥ हिंदोलकस्तृतीयस्तु चतुर्थो दीपकः स्मृतः ॥ २६ ॥ पंचमो मेघनादश्च श्रीरागः षष्ठ उच्यते॥एतेषां पंच पंच स्युः पत्न्यः षण्णां सुशोभनाः ॥२७॥ पूर्वं भैरवपत्न्यस्तु पंचैताः शृणु नारद॥

णु ॥ विचित्रा भाविनी चैव तथा मारवणी मता ॥ २९ ॥ रामा
गुर्जरी च हिंदोलस्याथ वल्लभाः॥वैरावली पराटोडी देशाख्या च
वारिका ॥ १३० ॥ माधवी पंचमी प्रोक्ता दीपकस्यापराः स्त्रिय
धनासिरी वसंता च कर्णाटी तृतीया मता ॥ ३१ ॥ वैराटी
चतुर्थी स्यात्तथा मधुकरी स्फुटम् ॥ मेघनादस्त्रियः पञ्च त
नामानि मे शृणु ॥ ३२ ॥ कलाटिका तथा गौरी ककुभा च वि
वरी ॥ वंगाली पंचमी प्रोक्ता श्रीरागस्य स्त्रियः स्मृताः ॥ ३३
माघफाल्गुनयोर्गेयो दीपकाख्योऽतिशोभनः ॥ मेघनादः परो गे
मधुमाधवयोरपि ॥ ३४॥ ज्येष्ठाषाढकयोर्गेयः श्रीरागः सर्वसंमत
मालकौशिकरागश्च वर्षर्त्ताविव संमतः ॥ ३५ ॥ भैरवश्चापरो गे
शारदर्तौ निरन्तरम् ॥ हिंदोलगानकालश्च मासयोर्मार्गपौष
॥ ३६ ॥ अथैषामेव रूपाणि वर्णनीयानि वर्णये ॥ नीलांवरो गौ
तनुः सपुष्पो भैरवः शुभः ॥ ३७ ॥ तत्पत्नीनाम् ॥ सरोवरस्थस्
टिकस्य मंडपे सरोरुहैः श्रीहरिमर्चयंती ॥ तालप्रयोगैः प्रतिवद्ध
ता गौरी मृदुर्नारद भैरवीयम् ॥ ३८ ॥ तुरंगमस्कन्धनिवद्धरा
स्वर्णप्रभा शोणितशोणगात्रा ॥ संग्रामभूमौ चरति धृतास्त्री नं
यमुक्ता किल कश्यपेन ॥३९॥ नीलं निचोलं वपुषा वहन्ती विप्र
क्रमार्गा कृतभक्तिरेषा॥तमालनीले तिमिरं वहन्ती प्रियानुगा मार
सिरी प्रदिष्टा ॥ १४० ॥ वियोगिनी कांतविशीर्णपुष्पसंघं वहन्
वपुषातिशुष्कम् ॥ आश्वास्यमाना प्रियया च सख्या विधूसरां
पटमञ्जरीयम् ॥ ४१ ॥ स्वकांतसंगाभिनिवेशतश्च समुत्थिता पङ्क
जकेसरारुणे ॥ नेत्रे दधाना पटुकंठमण्डिता प्रातः प्रयुक्ता लि
ताभिधेया॥४२॥ अनन्तशृङ्गारपरा विनोदिनी सुहारचामीकरगाः

लांगो मदनापहारी॥विचित्रमुख्या वनिताप्रियोऽसौ विराजते मालसुकौशिकश्च ॥ ४४ ॥ सानंदमालंबितपुष्पचापा प्रियाङ्गसङ्गामृतसाधुतृप्ता ॥ पर्यंकमध्ये सुकृतोपवेशा विभाति निद्राऽस्थितचित्रंगौरा ॥ ४५ ॥ वासोवसाना शरदभ्रशुभ्रं विरिञ्चिदेवोपमकर्मशक्ता ॥ कुन्दावदाता चतुराननस्य संभावनी लब्धसमृद्धसेवा ॥ ४६ ॥ अनेकलावण्यनिदानशाला प्रियांकमध्ये नितरां वसंती॥ चाटूक्तिरम्यैर्वचनैर्हसन्ती विलज्जिता मारवणी प्रदिष्टा ॥ ४७ ॥ स्वर्णप्रभा भासुरभूषणा च नीलं निचोलं सुतनौ वहन्ती ॥ कान्ते पदोपान्तमधिश्रितेऽपि मानोन्नता रामगिरी प्रदिष्टा ॥ ४८॥ श्यामा सुकेशी मलयद्रुमाणां मृदूल्लसत्पल्लवतल्पयाता ॥ श्रुतीः स्वराणां दधती विभागं तंत्रीमुखादाक्षिणगुर्जरीयम् ॥४९॥ शंखावदातं पलितं दधाना प्रलंबकर्णा कुसुमेन्दुवर्णा ॥ विचित्रवासाः स्वविहारचारिणी मल्लारिकेयं शुचिशांतमूर्त्तिः॥ ५०॥अथ हिन्दोलः ॥ नितम्बिनीमंद तरंगितासु हेलासु दोषासु कला दधानः॥शुकैः कपोतद्युतिकर्बुराङ्गो हिंदोलरागः कथितो मुनीन्द्रैः ॥ ५१ ॥ संकेतशय्यां दयितस्य दत्वा वितन्वती मण्डनमंगयष्ट्याम् ॥ हृदा स्मरंती स्मरमिष्टदेवं वैरावली नीलसरोजकांतिः ॥ ५२ ॥ उन्निद्रपंकेरुहचारुवक्त्रा कुरङ्गमातंगकृतांबरेण ॥ संभावयंती विपिनोपकंठे टोडीमुखेंदीवरदामरम्या ॥ ५३ ॥ आस्फोटनाविष्कृतरोमहर्षानियुद्धसंयुक्तविशालबाहुः ॥ प्रांशुप्रचंडद्युतिरिन्दुगौरा देशाख्यरागिण्यथ मल्लराज्ञी ॥५४॥ अनेकवस्त्राभरणाकुलांगी पद्माग्रहस्ता नयनांजनेन॥मनो हरंती मदनांगयष्टिर्गांधाररागिण्यथ वामचेष्टा ॥ ५५ ॥ विस्पष्टकृष्णाजिनमध्यवर्ती कांता पवित्रा स्थविरा विशुद्धा॥संगायती नार-

र्वितगौरदेहा मनोभवस्याथ शिलीमुखानि॥मुञ्चंती विश्वस्य
नाय सौभाग्यसंज्ञेति विशालनेत्रा ॥ ५७ ॥ अथ दीपकः
शालनेत्रो नयनाभिरामः कलाविदग्धः कलकंठगीतः॥ मा
श्वातिविमोहनोऽसौ स्त्रीणां पटुर्दीपकरागराजः ॥ ५८ ॥ दू
श्यामतनुर्मनोज्ञा कांतं लिखंती स्वकरेण पीठे॥बालाचला
गूढभावैर्धनासिरी नाम मुने प्रदिष्टा ॥५९॥ अनेकपुष्पाक
ल्ली विमोहरूपामदनाधिभूषा ॥ वसंतरागिण्यथ क
ता मनो हरंती विपिने निविष्टा ॥ ६० ॥ पाठांतरम्॥शिखं
च्छ्रयबद्धचूडा पुष्णंत्यापि प्रांतलतांतराणि ॥ भ्रमंत्यथावा
गमूर्तिर्मतात्वनंगस्य वसंतसंज्ञा ॥ ६१ ॥ अतिप्रमत्ता बल
क्ता गौरांगयष्टिः कनकांगभूषा ॥ वीणांदधानातिसुकंठगा
च कर्णाटिककाप्रसिद्धा ॥ ६२ ॥ विराटदेशे सुभगा सुगौ
नेकगानाकलिताकुलांगी ॥ मृदंगहस्ता नवयौवनाढ्या
टिकेयं चमराभियुक्ता ॥ ६३ ॥ पाठांतरम् ॥ विनोदयंती
च गौरी स्वलंकृता चामरचालनेन ॥ करे दधाना सुरवृक्षपुष्पं
नेयं कथिता विराटी॥६४॥मुखादनंतं मधु चास्नुवंती स्वकां
प्रचुरं प्रयाता ॥ उच्चैःस्वरेणातिजगौ पदानि मानोन्नता मा
प्रसिद्धा ॥ ६५ ॥ दीनानना मंगलयानकाले लाजांज
दधती गलदश्रुधारा ॥ हेमद्युतिर्दंतनखांशुमुद्रा श्रीसोरठी
ताप्रसिद्धा ॥ ६६ ॥ अथ मेघनादः ॥ तमालनीलांगमनो
विचित्रवाचा परिवक्ति भार्याम् ॥ आताम्रनेत्रांतविलास
श्रीमेघनादः कथितोमुनींद्रैः ॥ ६७ ॥ आकर्णनेत्रा तु मनो
शुचिस्मिताऽसौ कलगानकृत्या ॥ आशृण्वतां पद्मदलाग्र

सालस्यगात्रा विदिता च गौडी ॥ ६९ ॥ नीलं वसाना वसनं सुवेषा वने रुदंती पिकनाददूती ॥ विलोकयंती ककुभोऽथ भीता मूर्तिः प्रदिष्टा ककुभः श्रयेयम् ॥७०॥ प्रातः समुत्थाय प्रियांकमध्ये तत्केलिचिह्नाकलितानिमित्ता ॥ सालस्यनेत्रा प्रतिबोधयंती खगान्द्रुमस्थांश्च विभासनाम्नी ॥ ७१ ॥ मनोज्ञमौंजीगुणगुंफितांगा त्वचं दधाना धरणीरुहस्य ॥ चंडा कुमारी कमनीयमूर्त्तिर्बंगालिका गायनकेषु मुख्या ॥ ७२ ॥ सदारंगारातिरभसकांतवदना मदोन्मत्ता पतिपदालिंगितकरा ॥ वरालापप्रेमपूरप्रसक्ता भक्तादेवी देवमोहातिसक्ता ॥ ७३ ॥ अथ श्रीरागः ॥ किरीटवान् रागसमाजमध्ये संगीतशालीयमदांगयष्टिः ॥ आतालमानाधिकृतौ विवेकी श्रीरागराजो वनिताभिकांतः ॥ ७४॥ शृंगारसंभारसमूहनांगा ह्यनंगलेखेव निजांगकांत्या ॥ प्रतप्तचामीकरचारुवर्णा श्रीमेघशाली मदनाभिमत्ता ॥ ७५ ॥ अब्जमालां करे धृत्वा वसाना रौरवीं त्वचम् । जपंती जाह्नवीतीरे मोदकातियशस्विनी ॥ ७६ ॥ नीलांशुकालंवितदेहपीठा बिभ्रत्प्रभासाधरपद्मवक्त्रा ॥ श्यामा सुवेषा दयितेन सार्द्धं केदारिकाब्जं दधती करेसा॥७७॥आसावरी मन्मथचर्यहारिणी वक्रद्दशाभ्रुकुटिशोभितसुस्मितास्या ॥ मानोन्नता कान्तकराभिमर्शप्रमोदभारा विगता सदैव ॥७८॥ कामोदकी कामलका विदग्धा शश्वत्तनौ हाटकतुल्यवर्णा ॥ कर्णांतनेत्रा मदनांगयष्टिर्नीलोत्पलं सा दधती मनोज्ञा ॥ ७९ ॥ मारुर्मनोत्साहविभासयंती कंदर्पसंपीडितदेहयष्टिः ॥ प्रियप्रवासातिवियोगिनी सा महावियोगेन सुतप्यमाना ॥८०॥ एवमन्यत्रान्यथापि वर्णिता रागास्ते च सर्वे एव योग्या एव ॥ तन्मुख्यान रागाणां न तालानामंतः कुत्रा-

गायनकोविदम्॥८२॥श्रीभगवताप्युक्तम्।नाहं वसामि वैकुंठे यो
हृदये नवै ॥ मद्भक्ता यत्र गायंति तत्र तिष्ठामि नारदेति
दौ॥८३॥अथ गणाः॥म्यरस्तजभ्नगैर्लांतैरेभिर्दशभिरक्षरैः ॥ र
वाङ्मयैर्व्याप्तं त्रैलोक्यमिव विष्णुना ॥ ८४ ॥ सानुस्वारो वि
तो दीर्घो युक्तपरश्च यः ॥ वा पादांतस्त्वसौ ग्वक्रो ज्ञेयोऽन्यो
को ऋजुः ॥ ८५ ॥ मस्त्रिगुरुस्त्रिलघुश्च नकारो भादिगुरुः पु
दिलघुर्यः ॥ जो गुरुमध्यगतो रलमध्यः सोंऽतगुरुः कथितोंऽत
स्तः ॥८६॥ मो भूमिः श्रियमातनोति य जलं वृद्धिं र वह्निर्मृ
वायुः परदेशदूरगमनं तव्योम शून्यं फलम्॥जः सूर्यो रुजमाद
विपुलां भेन्दुर्यशो निर्मलं नो नाकश्चिरमायुरष्टकमिदं प्राहुर्ग
फलम् ॥ ८७ ॥ अथवर्णप्रस्तारः ॥ पादे सर्वगुरावाद्याल्लघुं न
गुरोरधः ॥ यथोपरिं तथा शेषं भूयः कुर्यादमुं विधिम् ॥ ८
ऊने दद्याद्गुरूनेव यावत्सर्वलघुर्भवेत् ॥ प्रस्तारोऽयं समा
तश्छंदोविचितिवेदिभिः ॥ ८९ ॥ अथ गुरुलघुप्लुतद्रुतलक्षणा
लघुः शुद्धो गुरुर्वक्र उभाभ्यां च प्लुतो भवेत् ॥ द्रु
बिंदुरूपः स्यादिति सर्वत्र निश्चयः ॥ ९० ॥ एकमात्रो
प्रोक्तो द्विमात्रश्च गुरुर्भवेत् ॥ प्लुतस्त्रिमात्रको ज्ञेयो द्रुतः स्या
मात्रकः ॥ ९१ ॥ लघोर्गुरोः प्लुतस्याऽपि भवेत्तालः पृथक्पृथ
मिलितानामपि भवेत्प्रस्तारस्तस्य कथ्यते॥९२॥अथ तालप्रस्त
ताले पादस्थिते मात्रां गणयेल्लघुरूपिकाः ॥ तावतीभिस्तु मात्रा
प्रस्तारो निखिलो भवेत् ॥ ९३ ॥ तच्च मध्याह्वयो ज्ञेयस्तत
चेदथोपरि ॥ मध्यमिष्टाश्रितैः सार्द्धं मात्राभिर्गणयेदधः ॥ ९६
मध्यस्याग्रे च विलिखेन्मात्राः प्रगणनेऽग्रे ॥

भवेत् ॥ ९६ ॥ किंच । गीते वाद्ये च नृत्ये च शक्तिः साधारणो गुणः ॥ सा चेदेतत्किमन्येन दूषणेन गुणेन च ॥ ९७ ॥ अथौषधानि ॥ गुडूच्यपामार्गविडंगशंखिनीवचाभयाकुष्ठशतावरीसमा ॥ घृतेन लीढा प्रकरोति पुंसां त्रिभिर्दिनैर्गीतसहस्रधारणम् ॥ ९८ ॥ देवदारुदलोद्भूतरसो मधुघृतान्वितः ॥ पीतः पथ्याशिनः कुर्याद्गीते मुखरतां भृशम् ॥ ९९ ॥ वासा ब्राह्मी वचा कुष्ठं पिप्पली मधुसंयुता ॥ सप्तरात्रप्रयोगेण किन्नरैः सह गीयते ॥ २०० ॥ वृद्धदारुकमूलं हि यो लिह्यान्मधुसर्पिषा ॥ सप्ताहक्षीरयूषाशी किन्नरैः सह गीयते ॥ १ ॥ बीजपूरफलं जातीपत्रं जंबीरजं तथा ॥ एनीधान्य कलायाश्च पिप्पल्या सह चूर्णयेत्॥२॥मधुना चावलीढं तु कंठं सुस्वरतां नयेत्॥इति गांधर्ववेदोद्धृतसारः॥ ॥ अथ रसशास्त्रं च बहुविधं भरतेनैव प्रणीतम् । तच्च रसरीतिशब्दालंकारार्थालंकारनायकनायिकादिवर्णनरूपम् ॥ तथा हि । साधुपाकेप्यनास्वाद्यं भोज्यं निर्लवणं तथा ॥ तथैव नीरसं काव्यं न स्याद्रसिकतुष्टये इति ॥ तत्र रसत्वमंगांगिभावापन्नसकलविभावादिसाक्षात्कारकत्वम् ॥ विशेषणं विभावानुभावसंचारिभावस्थायीभावा इत्येवमाकारकसमूहालम्बनवारणाय। रसत्वं च जातिरिति ॥ केचित्तु-कारणेनाथ कार्येण सहकारिभिरेव च ॥ व्यक्तत्वं नीयमानस्तु स्थायीभावो रसः स्मृतः ॥ कारणमङ्गनानवयौवनादि ॥ कार्याणि । स्तंभः स्वेदोऽथ रोमांचः स्वरभंगोऽथ वेपथुः ॥ वैवर्ण्यमश्रुप्रलपावित्यष्टौ सात्विका मताः॥सहकारिणः उद्यानादयः ग्लान्यादयश्च ॥ यदा[illegible] विभावैरनुभावैश्च सात्विकैर्व्यभिचारिभिः ॥ आरोप्यमाण[illegible]

क्षणे इष्टप्राप्तौ रतिरिव संभोगः ॥ तदुक्तम् । अनुरक्तौ निषेवेतां
न्योन्यं विलासिनौ ॥ दर्शनस्पर्शनादीनि संभोगोऽयमुदाहृ
तत्र नायिकाश्रयसंभोगो यथा । शून्यं वासगृहं विलोक्य श
दुत्थाय किञ्चिच्छनैर्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य प
खम् ॥ विस्रब्धं परिचुंब्य जातपुलकामालोक्य गंडस्थलीं ल
म्रमुखी प्रियेण सहसा बालाचिरं चुंबिता ॥ आलोक्य नम्रमु
योज्यम् ॥ नायिका चतुर्द्धा ॥ अनूढा च स्वकीया च परकीया वरां
त्रिवर्णिनः स्वकीया स्यादन्या केवलकामिनः ॥ तत्रानुरक्ताऽनु
स्वयं या स्वीकृता भवेत् ॥ साऽनूढेति यथा राज्ञो दुष्य
शकुंतला ॥ देवतागुरुसाक्ष्येण स्वीकृता स्वीयनायिका ॥ प
याऽप्यनूढैव विशेषस्तु स्फुटस्तयोः ॥ सामान्यवनिता वेश्या
त्कपटपंडिता । नहि कश्चित्प्रियस्तस्या दातारं नायकं वि
अस्याः प्रकाशोऽन्यासां प्रच्छन्नो रस इति विशेषः ॥ ताश्चाष्टधा ॥
तोत्कंठिता प्रोष्यत्पतिका चाभिसारिका ॥ कलहांतरिता वासा
ज्जाविप्रलब्धिका ॥ स्वाधीनभर्तृका चान्या चतस्रोऽप्यष्टधा मताः
क्षणान्यासां सोदाहरणानि रसमंजर्यादिभ्योऽवसेयानीहविस्तरा
नोक्तानि ॥ नायकाश्रयो यथा । त्वं मुग्धाक्षि विनैव कंचुलिकया
मनोहारिणीं लक्ष्मीमित्यभिधायिनि प्रियतमे तद्वीटिकां संस्पृ
शय्योपान्तनिविष्टसस्मितनवसखीनेत्रोत्सवानंदिनो निर्यातः शन
ीकवचनोपन्यासमाली जनः ॥ रूपयौवनसंपन्नः कुलीनः कुश
वा ॥ अनुकूलः शठो धृष्टो नायकः प्रोच्यते बुधैः ॥ अयं बहुप्रकारो
संक्षेपेण चतुर्विधः ॥ अनुकूलो दक्षिणश्च शठो धृष्टश्च ते यथा ॥

रतिर्नाम प्रकर्षमधिगच्छाति ॥ नाभिगच्छति चाभीष्टं विप्रलंभः स उच्यते॥अभीष्टं स्त्रीपुंसलक्षणमेवास च।पूर्वानुरागो मानात्मा प्रवासः करुणात्मकः ॥ विप्रलंभश्चतुर्द्धा स्यात्पूर्वपूर्वो ह्ययं गुरुः ॥ तत्र-स्त्रीपुंसयोर्नवालोकादेवोल्लसितरागयोः ॥ ज्ञेयः पूर्वानुरागोऽयमलाभादतिकामयोः ॥ यथा । प्रेमार्द्राः प्रणयस्पृशः परिचयादुद्गाढ-रागोदयास्तास्ता मुग्धदृशो निसर्गमधुराश्चेष्टा भवेयुर्मयि ॥ यास्वं-तःकरणस्य बाह्यकरणव्यापाररोधी क्षणादाशंसापरिकलिपतास्वपि भवत्यानंदसांद्रोलयः ॥ अथान्यावनितासक्तमवगम्यस्ववल्लभम् ॥ ईर्ष्यावशेन वैमुख्यमेष मान उदाहृतः ॥ यथा । सा पत्युः प्रणया-पराधसमये सख्योपदेशं विना नो जानाति सविभ्रमांगवलनावक्रो-क्तिसंसूचनम्॥स्वच्छैरच्छकपोलमूलगलितैःपर्यस्तनेत्रोत्पला बाला केवलमेव रोदिति लुठल्लोलालकैरश्रुभिः॥प्रवासः परदेशस्थे द्विती-यो विरहोद्भवः ॥ यथा । त्वामालिख्य प्रणयकुपितां धातुरागैः शिलायामात्मानं ते चरणपतितं यावदिच्छामि कर्तुम् ॥ अस्रैस्ता-वन्मुहुरुपचितैर्दृष्टिरालुप्यते मे क्रूरस्तास्मिन्नापि न सहते संगमं नौ कृतान्त इति ॥ स्यादेकतरपंचत्वे दंपत्योरनुरक्तयोः ॥ शृंगारः करुणाख्योऽयमजस्येव रतेरिव ॥ १ ॥ ननु शृंगारस्य रतिप्रकृति-त्वात्तस्याश्च सुखसंवेदनरूपत्वात्तस्य च विप्रलंभेऽभावात्स कथं शृंगारभेद इति चेन्न।धन्योहमस्याः कृते दशामिमामनुभवामि इति। तत्रापि तदभिधानात् । श्रीपादस्तु । रतिर्भवति देवादौ मुनौ पुत्रे नृपे गुरौ ॥ शृंगारस्तु भवेत्सैव पाकांतविषया रतिः ॥ तत्र देवे यथा।कंठकोणविनिविष्टमीशते कालकूटमपि मे महामृतम् ॥ अप्यु-पात्तममृतं भवद्वपुर्भेदवृत्ति यदि मे न रोचते । मुनौ यथा। हरत्यघं

एह्येहि वत्स रघुनंदन पूर्णचंद्र चुंबामि मूर्ध्नि सुचिरं च प
त्वाम् ॥ आरोप्य वा हृदि दिवानिशमुद्वहामि वंदेऽथ वा
पुष्करकद्वयं ते॥नृपे यथा। ते कौपीनधनास्त एव हि परं धा
भुंजते तेषां द्वारि नदंतिवाक्षिनिवहास्तैरेव लब्धा क्षितिः ॥ तै
कलं कृतं निजकुलं किम्वावहुब्रूमहे ये दृष्टाः परमेश्वरेण भवत
रुष्टेन वा॥गुरौ यथा।हा तात विश्वजनवत्सल मामकीन जीवौ
मणिवंशवतंसभूत॥स्यां चेद्भवत्कुलजसद्मनि चेटकः स्यां य
च्चरणपंकजरेणुरेव ॥इति॥१॥हासमूलः समाख्यातो हास्यना
बुधैः । चेष्टांगवेषवैकृत्याद्वाच्यो हासस्य संभवः ॥ कपोला
ल्लासो भिन्नोष्ठः स महात्मनाम् । विदीर्णास्यश्च मध्यानाम
सशब्दकः ॥ यथा । नपुंसकमिति ज्ञात्वा प्रियायै प्रेषितं
तच्च तत्रैव रमते हताः पाणिनिना वयम्॥२॥शोकोत्थः करुणं
स्तत्र भूयस्त्वरोदनम् । वैवर्ण्यमोहनिर्वेदप्रलयाश्रूणि वर्णयेत्।
मदेकपुत्रा जननी जरातुरा नवप्रसूतिर्वरटा तपस्विनी । ग
योरेष जनस्तमर्दयन्नहो विधे त्वां करुणा रुणद्धि नो॥ इति॥३
धात्मको भवेद्रौद्रः क्रोधः प्रौढ्या च वैरिणः । भीष्मवृत्तिरसा
भवेदुग्रक्रियाश्रयः॥स्वांसघातस्वयंशस्त्रोत्क्षेपभ्रुकुटयस्तथा।
रातिजनाक्षेपो दलनं चोपवर्ण्यते ॥ यथा । कृतमनुमतं द
यैरिदं गुरुपातकं मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः । नर
पुणा सार्द्धं तेषां सभीमकिरीटिनामयमहमसृङ्मेदोमांसैः क
दिशां वालिम्॥४॥उत्साहात्मा भवेद्वीरो वलशस्त्राश्रयश्च सः ।
कोऽत्र भवेत्सर्वैः श्लाघ्यैरभिमतो गुणैः ॥ तथा । क्षुद्राः संत्रास
विजहत हरयो भिन्नशक्रेभकुंभा युष्मद्देहेषु लज्जां दधाति पर

यानको भवेद्भीतिप्रकृतिर्घोरवस्तुनः॥सच प्रायेण वनितानीचबालेषु दृश्यते ॥ दिगालोकास्यशोषांगकंपगद्गदसंभ्रमाः ॥ स्तंभवैवर्ण्यमोहाश्च वर्ण्यंते विबुधैरिह ॥ यथा ॥ ग्रीवाभंगाभिरामं मुहुरनुपतति स्यंदने दत्तदृष्टिः पश्चार्द्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायम्॥ शष्पैरर्द्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा यस्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति॥६॥बीभत्सः स्याज्जुगुप्सातः सोऽहृद्यश्रवणेक्षणात् ॥ निष्ठीवनास्यभंगादि स्यादत्र सहतां न च ॥ यथा। उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूत्सेधभूयांसि मांसान्यंसस्फिक्पृष्ठपिंडाद्यवयवसुलभान्युग्रगंधीनि जग्ध्वा ॥अत्तिः पर्यस्तनेत्रः प्रकटितदशनः प्रेतरंकः करंकादंकस्थादस्थिसंस्थापुटकगतमपि क्रव्यमव्यग्रमत्ति ॥७॥विस्मयात्माद्भुतो ज्ञेयः स चासंभाव्यवस्तुनः ॥ दर्शनाच्छ्रवणाद्वापि प्राणिनामुपजायते ॥ तत्र। नेत्रनेत्रविकारः स्यात्पुलकः स्वेद एव च ॥ निष्पन्दनेत्रता साधुसाधुवादास्तथामताः ॥ चित्रं कनकलतायां शरदिन्दुस्तत्र खञ्जनद्वितयम्॥तत्र च मनोजधनुषी तदुपरि गाढान्धकाराणि॥८॥सम्यग्ज्ञानसमुत्थानः शांतो निस्स्पृहनायकः॥रागद्वेषपरित्यागे सम्यग्ज्ञानस्य चोद्भवः ॥ पश्चात्तापः शरीरादियावद्वस्तुविडंबनम् ॥ विवेकाचित्तस्थैर्यादियोगाद्यास्तस्य लक्षणम् ॥ यथा। अहौ वा हारे वा कुसुमशयने वा दृषदि वा मणौ वा लोष्टे वा बलवति रिपौ वा सुहृदि वा॥ तृणे वा स्त्रैणे वा मम समदृशो यांतु दिवसाः क्वचित्पुण्यारण्ये शिवशिवशिवेति प्रलपतः ॥९॥ स्त्रैणं स्त्रीसमूहः। अत्राहिरिव हारो हेयो न तु हारवदहिरप्युपादेय इति बोद्धव्यम्॥अत्र सर्वत्र तत्तद्रसत्वमात्रे उदाहरणमिति स्मर्तव्यम्॥अथ रसानां विरोधाविरोधावाह॥

चाद्भुतः ॥ शृंगारे शांतकरुणौ हासस्य करुणो रिपुः ॥ अत्र क
बीभत्सयोर्मैत्री विशेषाभिप्रायेण स्मर्त्तव्या ॥ स्थायी भाव
मत इत्युक्तमत आह । रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं त
जुगुप्सा विस्मयो भावा निर्वेदः स्थायिनो नव ॥ स्थायिनो
नवेत्यर्थः ॥ ननु निर्वेदस्य कथं शांतरसस्थायिता व्यभिचारि
दिति चेन्न । अधिकरणभेदेनोभयाविरोधादित्यन्यत्र विस्त
स्थायिलक्षणं तु । विरुद्धैरविरुद्धैर्वा भावैर्विच्छिद्यते न यः ॥ स्व
भावं नयत्यन्यान्स्थायी भावस्स उच्यते॥ यथा लवणाकरो वि
जुगुप्सादिभिरविरुद्धैरत्यादिभिर्यो न विच्छिद्यत इत्यर्थः॥ विशे
क्षणं तु मनोनुकूलविषयसुखात्मकं संवेदनं रतिः।अंगक्रीडादि
तोविकारो हासः । इष्टनाशादिजनितचित्तवैक्लव्यं शोकः।प्रति
तैक्ष्ण्यप्ररोहः क्रोधः । कार्यारंभे स्थिरसंरंभ उत्साहः । व्या
दर्शनादिजनितं मनःक्लैव्यं भयम्। दोषदर्शनात्पदार्थगर्हणं जुगु
लोकसीमातिक्रांतपदार्थविषयश्चित्तविकारो विस्मयः । तत्त्वज्ञ
दीर्ष्यादिभिः स्वावमाननं निर्वेदः ॥ एते च सर्वभावेषु मुख
यथाह । यथा नराणां नृपतिः शिष्याणां च यथा गुरुः ॥ तथा
भावेषु स्थायिभावः स्मृतो महान् ॥ विभावो द्विविधः । उद्दी
लंबनभेदात् । तत्र कोकिलवसंतादिरुद्दीपनो नायकादिरालंब
योगादपि रसत्वादिकमनुभावत्वादिकमस्मन्मते जातिरेव
वैशेषिकादिवदस्माकं प्रक्रियेत्यालंकारिकाः ॥ अनुभावलक्षणं
अनुभावो विकारस्तु भावसंसूचनात्मकः । तत्र । हेलाविच्छि
व्वोककिलकिञ्चितिपविभ्रमाः ॥ लीलाविलासो हविश्च विपक्षे
कृतो मदः । मोदायितं कुट्टमितं मौग्ध्यश्च तपनं तथा ॥ ललि

णाभितः काये स्थायिनं भावयंति ये ॥ अनुभूतादिहेतूंस्तान्वदंति व्यभिचारिणः ॥ आदिपदात्स्वेदादिपरिग्रहः ॥ ते च । निर्वेदग्लानिशंकाख्यास्तथासूयामदश्रमाः॥आलस्यश्चैव दैन्यश्च चिन्ता मोहः स्मृतिर्धृतिः ॥ व्रीडा चपलता हर्षश्चावेगो जडता तथा ॥ गर्वो विषाद औत्सुक्यं निद्राऽपस्मार एव च । सुप्तं विरोधोमर्षश्चाप्यवहित्थमथोग्रता । मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ॥ त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः ॥ अमी च प्रत्येकं भाव्यंते क्वचित्सर्वभावतापि ॥ यथा । क्वाकार्यं शशलक्ष्मण इत्यादौ क्वाकार्यमिति वितर्कः ॥ भूयोपि दृश्येत सत्यौत्सुक्यं दोषाणामिति मतिः । कोपेपीति स्मृतिः । किंवक्ष्यंतीतिशंका।स्वप्नेपि सा दुर्लभेति दैन्यम् । चेतः स्वास्थ्यमुपैहीति धृतिः । कः खल्वित्यादौश्चिंतेतीत्यत्र बहुवक्तव्यमस्तीह तु रेखामात्रमेव दर्शितमिति । तत्र रीतीराह । तत्तद्रसोपकारिण्यस्तत्तद्देशसमुद्भवाः॥पद्येषु रीतयो गौडी वैदर्भी मागधी तथा ॥ गौडी समासभूयस्त्वाद्वैदर्भी च तदल्पतः ॥ अनयोः संकरो यस्तु मागधी सातिविस्तरा॥गौडीयैः प्रथमा मध्या वैदर्भैर्मैथिलैस्तथा ॥ अन्यैस्तु चरमा रीतिः स्वभावादेव सेव्यते ॥ तत्र गौडी यथा । उन्मीलन्मधुगंधलुब्धमधुपव्याधूतचूतांकुरक्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः ॥ नीयंते पथिकैः कथं कथमपि ध्यानावधानक्षणप्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः ॥ वैदर्भीयथा । मनीषिताः संति गृहेषु देवतास्तपः क्व वत्से क्व च तावकं वपुः ॥ पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्रिणः ॥ मागधी यथा।पाणौ पद्मधिया मधूककुसुमभ्रांत्या पुनर्गंडयोर्नीलेंदीवरशंकया नयनयोर्बंधूकबुद्ध्याधरे ॥ लीयंते क-

या च यथारसम् ॥ वैदर्भी च यथासंख्यं चतस्रो रीतयः स्म
त्याह।तत्र पंचषट्सप्तपदैः पञ्चाली अष्टादिपदैर्लाटीया समास
गौडीया सर्वथा समासाभावे वैदर्भीति साहि रसानुकूला व
यथा॥शृंगारे वैदर्भी रौद्रवीरयोर्गौडीयाऽन्यत्र पांचाली लाटीया
र्थः ॥ तथा पञ्च वृत्तयोपि तेनैवोक्ता मधुराप्रौढापरुषाललित
भेदात् । मधुरायां समाक्रान्ता वर्गस्थाः पञ्चमैर्निजैः ॥ लका
संयुक्तो ह्रस्वव्यवहितौ रणौ ॥ १ ॥ निजैः पञ्चमैर्यथाकाद्याश्च
ङकारेण चाद्या भकारेण टाद्या णकारेण ताद्या नकारेण सम
निजपञ्चमयुक्तशिरसः संति । लश्च लकारेण युक्तस्तथा
रकारणकारौ ह्रस्वेन व्यवहितौ च स्यातां मधुरायां वृत्ताविति
प्रौढामाह॥रेफाक्रान्ता वर्ग्ययणाष्टवर्गात्पञ्चमादृते॥कयाक्रां
र्गःस्यात्प्रौढायां तः कमूर्द्धजः ॥ २ ॥ कादयो वर्गवर्णा यका
रौ च रेफाक्रान्ताः संति तत्र वर्गे षट्वर्गः पञ्चमो ङकारादिर्न
क्रांतः टवर्गस्य णकारवर्जस्य निषेधो णकारस्य यणावित्युक्त
देयत्वात् । तवर्गः ककारपकाराभ्यामाक्रांतः स्यात । तदर्ध
तकारश्च ककारस्य मूर्द्धनि स्यात्प्रौढायामित्यर्थः ॥ परुषाम
सर्वैरूर्द्धैः सकारस्य सर्वे रेफस्य सर्वथा ॥ रहोर्द्वेधा तु सं
परुषायां शषौ स्वतः ॥ ३ ॥ सकारस्योपरि ककारादयः
सर्वेषामुपर्यधश्च रेफः रहो रकारहकारयोर्द्वेधा द्विधा तु पुन
योगः उपर्यधश्चैकत्रोभयत्र च संयोगस्तथा शकारषकारौ के
संयुक्तौ च कार्याविति ॥ स्वतः स्वतंत्राविर्त्यथः । परुषायां
विति ॥ ३ ॥ अथ ललिताभद्रे चाह । लकारोऽन्यैरसंयुक्तो ल
धभघारसाः ॥४॥ अन्यैर्लकारेतरैरसंयुक्तः कार्यः।धकारभकार

क्रमेणोदाहरणम् । अङ्गभङ्गोल्लसल्लीला तरुणी स्मरतोरणम् ॥ तर्कचातुर्यपूर्णोक्तिप्राप्तोत्कर्षधियां वृथा ॥ वीप्सोत्सर्पन्मुखाग्रार्द्धं बर्हीं जह्रे कृशस्तृषम् ॥ ललना रभसं धत्ते घनाटोपे विहायसि ॥ २ ॥ तर्कशास्त्रस्य चातुर्येण कौशलेन पूर्णा या उक्तयस्ताभिः प्राप्तोत्कर्षा धीर्येषां तेषां स्मरस्य कामस्य तोरणं भूषणम् धोरणमिति पाठे वाहनमपि वृथा नानंदाय किन्तु परिशीलितसाहित्यानामेव सोपयुज्यत इति भावः । किंभूता । अंगानां भंगैरचनादिभिरुल्लसन्ती लीला यस्यास्सा तथा । हावादिनिपुणेत्यर्थः ॥ वीप्सया मुहुर्मुहुरुत्सर्पद्यन्मुखाग्रं तस्यार्द्धं यथा स्यात्तथा । बर्हीं मयूरः कृश आतुरः तृषं तृष्णां जह्रेऽपाचक्रे । तथा ललना स्त्री रभसं पतिसंगेच्छावेगं धत्तोक्र सति । घनानां मेघानामाटोपस्संभ्रमो यस्मिंस्तादृशि विहायस्याकाशे सतीत्यर्थः । तोरणमित्यंतं मधुरा । वृथेत्यंतं प्रौढा । षमित्यंतं परुषा । घनेत्यंतं ललिता । शेषा भद्रेति ध्येयं मनीषिभिरिति वृत्तयः ॥ अथालंकाराः । तत्र चमत्कारविशेषकारित्वमलंकारत्वमिति सामान्यलक्षणम् ॥ शब्दार्थनिष्ठत्वे सति चमत्कारकारित्वमिति विशेषलक्षणम् । परंपरया रसोपकारित्वमलंकारत्वमित्यन्ये। ते च शब्दालंकारभेदेन द्विधा । तत्र प्रथमानाह । चित्रवक्रोक्त्यनुप्रासगूढश्लेषप्रहेलिकाः ॥ प्रश्नोत्तरश्च यमकमष्टालंकृतयो ध्वनौ ॥ तत्र कौतुकविशेषकारित्वं चित्रत्वम् । तच्च खड्गचक्रपद्मादिभेदेनानन्तम् । यदाह । सर्वतोभद्रधेन्वादि गोमूत्रीमुरजादि च ॥ गतप्रत्यागताद्याहुश्चित्रकाव्यं मनीषिणः॥ किञ्चातश्चित्रं यत्र वर्णानां खड्गाद्याकृतिहेतुतेति॥

खङ्गबंधाकारमाह द्वाभ्याम् ॥ मारारिशक्ररामेभमुखैरासार-
सारारब्धस्तवानित्यंतदार्त्तिहरणक्षमा ॥२॥ मातानतानांसंघ-
बाधितसंभ्रमा ॥ मान्याथ सीमा रामाणां शं मे दिश्यादुमा-
॥ २ ॥ व्याख्या । माराररिःशिवः शक्र इंद्रः रामो भार्गवः
गणेशः तैरासाराः धारासंपातास्तद्वद्रंहसा वेगेन सारः श्रेष्ठ
स्स्तवो यस्याः सा नित्यं तेषामार्त्तिः पीडा तस्या न
समर्था । नतानां नम्राणां माता जननी श्रियां संपदां संघट्ट
स्थानम् । यद्वा संघट्टे युद्धे श्रीर्येषां युद्धरासिकानां बाधि
निरस्तभया रामाणां स्त्रीणां सीमा मर्यादा आदिमा आदिभ
मे शं सुखं दिश्याद्द्यादित्यर्थः ॥ रचना त्वेवम् ।

१ माशब्दं लिखित्वा तद्दक्षिणे स्ववामे तीर्यगूर्ध्वक्रमेण रादिहकारांतांश्चतु-
ल्लिखेदित्येका धारा मूर्ध्नि सेति श्लिष्टं तदधो वामेऽधः क्रमेण रादिक्षांतांश्चतुर्दश
खेदित्यन्या धारा । माशब्द आद्यंतर्भूतः पुनस्तमेव माशब्दमादाय तद्दक्षिणे
तादिट्टइत्यंता वर्णा विलोमाः तद्वामे स्वदक्षिणे श्रीकारादिभ्रकारांताः सप्त वर्ण
मा: । माशब्दस्त्वाद्य एव तच्छेषः । पुनस्तमेव ...

पद्मबंधमाह । भासते प्रतिभासार रसाभाताहताविभा ॥ भाविता-त्माशुभावादेदेवाभाबत ते सभा ॥ १ ॥ हे प्रतिभया बुद्धया सार श्रेष्ठ ते तव सभा भासते शोभते । बत हर्षे रसेनाभाता शोभिताहताऽविभाऽदीप्तिर्यस्या स्सा । यद्वाऽविना मेषेण भातीत्यविभो वह्निर्हतो निरस्तोऽविभो यया सा । भा-वितो वशीकृतो ध्यातो वा आत्मा-

पद्मबंधः ।

मुरजबन्धः ।

१ १ २ ३ ४ ५ ६ ७ ८ १

स र ला ब हु ला रं भ

त र ला रि ब ला र वा

वा र ला ब हु ला मं द

क र ला ब हु ला म ला

---

१ भाशब्दं कर्णिकायां न्यस्याष्टदलेषु भाशब्दं द्वौद्वौ वर्णौ निर्गमप्रवेशाभ्यां लिखेत् । भाशब्दो मध्यस्थो निर्गमे प्रवेशे सर्वत्रान्वेति । दिग्दलेषु ४ आरो-हावरोहाभ्यां नाभा प्रवेशः विग्दिलेषु सकृदवरोहणनामेये ऐशाने च प्रति वते द्वौद्वौ वर्णौ नैर्ऋत्ये वायव्ये च हतात्माशु इति द्वौद्वौ वर्णौ सिद्धौ ॥ एवमष्ट-दलेषु कर्णिकायां सप्तदशवर्णैर्द्वात्रिंशर्णनिर्वादंतेपूर्वदलांतान्मध्ये प्रवेशात्पद्मासि-द्धिरिति पद्मबंधः ॥

२ मुरजबंधमाह । सरलाबहुलारंभतरलारिबलारवा ॥ वारलाबहुलामंदकरलाबहु-लामला ॥ शरद्वर्णनम् । सरलाऽवक्रा शराँल्लातीति शरला बहुल आरंभ उदयो यस्य सः तरलानां चपलानामलिबलानां द्विरेफसैन्यानां रवः शब्दोयस्यां सा वारला-भिर्हंसीभिर्बहुलाः संकुला अमंदाः सोत्साहाः कराँल्लाति स्वीकुर्वंतीति करला राजानो यस्यां सा अबहुलेन शुक्लपक्षेणामला बहुले कृष्णपक्षे नक्षत्रैरमला वा । अत्र पाद-चतुष्कपंक्तिचतुष्के विलिख्याद्यद्वितीयतृतीयपादे सा आद्यद्वितीयतृतीयान् चतुर्थपादे चतुर्थपंचमौ तृतीयद्वितीयाद्यानां षष्ठोपांत्यांत्यवर्णैराद्यः पादः ॥ १ ॥ द्वितीयाद्यामाद्याद्विद्वि-तीयतृतीयौ द्वितीयतृतीययोश्चतुर्थौ चतुर्थस्य तृतीयद्वितीयौ ...

यया सा । वादे शुभा देवाभा देवतुल्या।अस्योद्धारः। अथ स

सर्वतोभद्रश्चः ।

र	सा	सा	र	र	सा	सा	र
सा	य	ता	क्ष	क्ष	ता	य	सा
सा	ता	वा	त	त	वा	ता	सा
र	क्ष	त	स्त्व	स्त्व	त	क्ष	र

रसासार रसा सारसायताक्षक्षतायसा ॥
सातावाततवातासारक्षतस्त्वस्त्वतक्षर ॥ १ ॥

भद्रमाह।हे रसासार भू
सारसं जलजं पक्षिभेदे
तद्वद्विशालनेत्रा । सातं
ष्टम् अवातमज्ञातं यस्
वा गतावित्यस्य ज्ञान

त्वात् । तक्षस्तनूकरणं राति प्राप्नोतीति तक्षरः स न इ
तक्षरः । अतनु अनल्पं राति ददातीत्यतक्षर इति वा तत्सं
हेनृप रक्षतस्तव तु पुनः।रसा भूमिरस्तु।यद्वा।तव भूरीदृशी अ
कीदृशी क्षतायसा क्षतोऽयः शुभावहो विधिर्येषां तानस्यति
स्यति सा । यद्वा क्षतमायसं शस्त्रं यस्यां युद्धाभावात् । न वि
तासमुपक्षयो यस्याः साऽतासा । तसु उपक्षये धातुः ।
प्रतिलोमानुलोमपादोऽपि चतुर्णां पादानामाद्यैरंत्यैश्चाद्यः प
॥ १ ॥ द्वितीयैरुपांत्यैश्च द्वितीयः ॥ २ ॥ तृतीयैः षष्ठैश्च तृत
॥ ३ ॥ तुर्यैः पंचमैश्चतुर्थः ॥ ४ ॥ अंताद्विपर्ययो वेति सर्वतोभ
चक्रगोमूत्रिकादयोऽन्येपि बंधभेदा बहवः संति ते च किरातार्जुन
शिशुपालवधादौ वर्णिता इह दिङ्मात्रमेवादर्शि ॥ अथ वक्रोक्ति
हा।अन्याभिप्रायेणोक्तं वाक्यमन्येनान्यार्थकतया यद्योज्यते सा
क्रोक्तिः । एतदेव वाकोवाक्यमुच्यते । यथा । कोऽयं द्वारि ह
प्रयाह्युपवनं शाखामृगेणात्र किं कृष्णोऽहं दयिते बिभेमि सुत
कृष्णादहं वानरात् ॥ मुग्धेऽहं मधुसूदनो व्रज लतां तामेव पुष्

लगृहापाङ्गभङ्गितरङ्गितैः ॥ आलिङ्गितः स तन्वङ्ग्या कृतार्थ-
यतु मानसम् ॥ अनेकस्य व्यंजनस्य सकृत्साम्यं छेकानुप्रासः ।
नितम्बगुर्वी गुरुणा प्रयुक्ता वधूर्विधातृप्रतिमेन तेन ॥ चकार सा
मत्तचकोरनेत्रा लज्जावती लाजविमोक्षमग्नौ ॥ पदमेकं हृदा कृत्वा
तदनुप्रासकाम्यया ॥ आदिक्षांतलिपौ कादिक्षांतशब्दं विचिंतये-
दिति रहस्यम् ॥ गूढं क्रियागुप्तादि । क्रियादिकं स्थितं यत्र
पदसंधानकौशलात् ॥ स्फुटं न लक्ष्यते तत्स्यात्क्रियागुप्तादिकं
यथा ॥ राजन्नव घनश्यामनिस्त्रिंशाकर्षदुर्जय ॥ आकल्पंवसुधामे-
नां विद्विषोद्य रणे वहून् ॥ अव द्योति द्वे क्रियापदे ॥ यथा । पुंस्को-
किलकुलस्यैतैर्नितांतमधुरारवैः ॥ सहकाराद्रुमारम्यावसंते कामपि
श्रियम् ॥ अधुरत्र गुप्तमस्ति॥इदञ्च नाना यदाहुः । क्रियाकारकसं-
बंधगुप्तान्यामंत्रितस्य च ॥ गुप्तं यथा समासस्य लिंगस्य वचनस्य
च ॥ १ ॥ क्रियागुप्तं तूक्तम् ॥ नकरोतु नास रोषं न वदतु परुषं न
हंत्वथो शत्रून् ॥ रक्षयति महीमखिलां तथापि वीरस्य धी-
रस्य ॥ शरदिन्दुकुंदधवलं कृतनगनिलयं मनो हरं
देवम् ॥ यैः सुकृतं कृतमनिशं तेषामेव प्रसादयाति ॥
॥२॥क्रमेण धीर्मनश्चेति कर्तृगुप्तम् ॥ सीकराकरसंवाही सरोजवन-
मारुतः ॥ प्रक्षोभयति पान्थः स्त्रीनिःश्वासैरिव मांसलः ॥ १ ॥
सुभग तवाननपङ्कजदर्शनसंजातनिर्भरप्रीतेः ॥ शमयति कुर्व-
न्दिवसः पुण्यवतः कस्य रमणीयः ॥ २ ॥ इह क्रमेण सरः शश्व-
ति गुप्तं कर्म । अयातिर्विवक्षावशतः परस्मैपद्यप्यस्ति, उदयाति
यदि भानुरित्यादिप्रयोगात् ॥ पूतिपंकमयेऽत्यर्थं कासारे दुःखि-
ता अमी ॥ दुर्वासा मानसं हंसा गमिष्यंति घनागमे ॥ १ ॥ अहं

नसा महता शकटेनेति करणद्वयं गुप्तम् ॥ प्रसत्त्यायुक्त
तव संमानिताः श्रिताः ॥ स्पृहयन्ति न के नाम गुण
प्रभो ॥ १ ॥ अंभोरुहमये स्नात्वा वापीपयसि भामिनी ॥
भक्तिसंपन्ना पुष्पं सौभाग्यकाम्यया ॥ २ ॥ इह क्रमेण प्र
ये चेति संप्रदानद्वयकं गुप्तम् ॥ शिलीमुखैस्त्वया वीर दु
र्जितो रिपुः ॥ विभेत्यत्यन्तमलिनो वनेऽपि कुसुमाकरे
अलिबाणौ शिलीमुखावित्यमरादलिनो भ्रमरस्यापि भीहेत
सरसीतोयमुद्धृत्य जनः कंदर्पकारकम् ॥ पिबत्यंभोजसु
च्छमेकान्तशीतलम् ॥ २ ॥ इहसरसीत इति गुप्तमपादानम
कटाक्षच्छटापातैः पवित्रयति मानवम् ॥ एकान्ते रोपितप्री
सा कमलालया ॥ १ ॥ विपद्यमानता सिद्धा सर्वस्यैव
णः ॥ तथा हि भस्म पादाभ्यां निर्वाणं हन्त्यय
॥ २३ ॥ इह क्रमेण एकारपदवाच्ये विष्णाविति विपदि
विति गुप्तमधिकरणद्वयम् ॥ निर्वाणं शीतं भस्माऽयं जन
भ्यां हंतीति योजना । निरूष्मणो निस्तेजसः ॥ तूणीव
सेऽस्मिन्नसालद्रुममंजरी ॥ इयमुद्भिन्नमुकुलैर्भाति न्यस्तशि
खा ॥ १ ॥ अस्यापत्यमिस्तस्य एः कामस्य तूणीव वि
कुड्मला परिभ्रमद्भ्रमराऽऽश्रवह्यारिः शोभते ॥ प्राप्तमदो म
प्रबलरुक्प्रियतमोऽपि दूरस्थः ॥ असतीयं सन्निहिता ह
शीला सखी नित्यम् ॥ २ ॥ चैत्रमासस्येदमतिप्रकृष्टतेजः
मिति योज्यामिह क्रमेण एर्मधुमास इति गुप्तसंबंधद्वयकम् ।
ज्ञेन त्वया वीर नास्त्यविज्ञातमीदृशम् ॥ इहेनेतिगुप्तमामं
कमले कमले नित्यं मधूनि पिबतस्तव ॥ भविष्यति न

वटवृक्षो महानत्र मार्गमावृत्य तिष्ठति ॥ तावत्त्वया न गंतव्यं यावन्मार्गे स तिष्ठति ॥ इहापि क्रमेणाऽले वटो इतिं संबुद्धिर्गुप्ता कर्ता च गुप्तोऽस्ति॥२॥रामनाम सुधाधाम पवित्रं रस ना रसम्॥ कः कर्त्ता कर्म किञ्चात्र के च संबोधनक्रिये ॥ इह हे नः त्वं रामनाम रस आस्वादय । किंभूतं सुधाधामामृतस्थानं पुनः पवित्रं रसरूपञ्च । अत्र कर्त्तृकर्मसंबुद्धिक्रियाश्च गुप्ताः ॥ विषादी भैक्ष्यमश्नाति सदा-रोगं न मुंचति ॥ क्रुद्धेनापि त्वया वीरशंभुनारिः समः कृतः ॥ १ ॥ इह विषादश्चेतसो भंगः सोऽस्यास्तीति विषादी विषमत्तीति वा सदारोगं शश्वद्व्याधिं सभार्यः अगं हिमाद्रिम् इह विषादी सदारइति च समासयोर्गुप्तिः ॥ नित्यमाराधिता देवैः कंसस्य द्विषतस्तनुः ॥ मंडलाग्रं गदां शंखं चक्रं जयति बिभ्रती ॥ २ ॥ इहापि नित्यं मा श्रीर्यस्यांसेति समासो गुप्तः मंडलाग्रं कौक्षेयकं खड्गमिति यादवः । इतिसमासगुप्तम् ॥ नितांतस्वच्छहृदयं सखिप्रेयान्समागतः ॥ त्वां चिरादर्शनप्रीत्या यः समालिंग्यरंस्यते ॥ १ ॥ इह स्वच्छहृदयमिति विशेषणक्रियाभ्रांत्याऽयमिति पुँल्लिङ्गमस्पष्टम् ॥ कलिकालमियं तावदगस्त्यस्य मुनेरपि ॥ मानसं खंडयत्यत्र शशिखंडानुकारिणी ॥ २ ॥ इयं लोपामुद्रा वक्रशीलतयाल्हादकतया च शशिखंडानुकारिणी अगस्त्यस्यापि मुनेश्चेतःकलिना प्रणयकलहेन कालं मलिनतामापन्नं खंडयाति तथाऽगस्त्यस्य तरोरियं कलिका मुकुलं शशिखंडवत्कुटिला मुनेरपि मनःखंडयत्युद्दीपनविभावत्वात् । अत्र कलिकेति स्त्रीलिंगं गूढम् ॥ इति लिंगगुप्तम् ॥ प्रमोदं जनयत्येव सदाप्रमदमेधिनः ॥ यदि धर्मश्च कामश्च भवेतां संग-

रम् ॥ २ ॥ इह परिपृच्छतीति यङ्लुकि लट्प्रथमपुरुषवच
मस्तीतिअतिशयेन पुनःपुनः पृच्छंतीत्यर्थः ॥ इति वि
गुप्तम् ॥ एकोच्चारणापह्नुतिभेदत्वं श्लेषत्वम्। स चाष्टधा व
लिंगभाषाप्रकृतिप्रत्ययविभक्तिवचनानां भेदात्। क्रमेणोदाह
अलंकारः शंकाकरनरकपालं परिजनो विशीर्णांगो भृङ्गी
वृष एको बहुवयाः ॥ अवस्थेयं स्थाणोरपि भवति सर्वामरगु
वक्रे मूर्ध्नि स्थितवति वयं के पुनरमी ॥१॥ इह विधौ चंद्र
वक्रे कुटिले विरुद्धे च मूर्ध्नि शिरसि सर्वोपरि च अत्र
विधिशब्दयोरौकारांतं रूपं सप्तम्यां समानं तेन इउवर्णयोः
ऽयम् ॥ १ ॥ पदश्लेषमाह ॥ पृथु कार्त्तस्वरपात्रं भूषितां
परिजनं देव ॥ विलसत्करेणुगहनं संप्रति सममावयोः
॥ २ ॥ पृथूनि कार्त्तस्वरस्य हेम्नः पात्राणि यत्र तत् पक्षे
कानां बालानामार्तस्वरस्थानम्। भूषिता अलंकृता नि
स्सर्वे परिजनाः सम्बंधिनो यत्र पक्षे भुवि उषिताः शयि
ति पूर्ववत्। बिलेषु सन्तो बिलसत्काः। स्वार्थिकःकः। मूषि
षां रेणुना गहनंदुःप्रवेशम् पक्षे विलसंतः प्रकाशंतो ये करे
स्तिनस्तैर्गहनामिति॥२॥लिंगश्लेषमाह॥भक्तिप्रह्वविलोकनप्रण
नीलोत्पलस्पर्द्धिनी ध्यानालम्बनता समाधिनिरतैर्नीतेहितप्र
लावण्यैकमहानिधी रसिकतां लक्ष्मीदृशोस्तन्वती युष्माकं
भवार्तिशमनं नेत्रे तनुर्वोहरेः ॥ ३ ॥ हरेस्तनुर्नेत्रे च यु
संसृतिक्लेशहानिं कुरुताम्। भक्तिनम्रविलोकने प्रणयः स्नेहो
ययोर्वा तथा।पुनर्नीलोत्पलं स्पर्द्धितुं शीलं यस्या ययोर्वा पुन
धिनिष्ठैर्ध्यानविषयतां नीता नीते वा। तनुपक्षे। ईहितर

गरूपसाम्याल्लिंगयोः श्लेषः।एकवचनद्विवचनयोः शब्दसाम्यवचनश्लेषोऽपीत्यर्थः॥३॥अथ प्राकृतसंस्कृतभाषयोः श्लेषमाह।महदेसुरसंधम्मेतमवसमासंगमागमाहरणे॥हरवहुसरणं तंचित्तमोहमवसर उमे सहसा ॥ ४ ॥ मह्यं दद स्वरसं धर्मं तमोवशामाशांगमागमात्संसाररूपात् हर नः हे हरवधुशरणं त्वं चित्तमोहोऽपसरतु सहसा मे इति प्राकृतेऽर्थः। संस्कृते तु महदे उत्सवदात्रि उमे मे आगमाहरणे वेदोपादाने तं सुरसंधं देवेषु संधानं भक्तिमवरक्ष समासंगमासक्तिं हर अपनय बहु सरणं प्रसरणं यस्य तं चित्तमोहमवसरे समये उमे सहसा हरेत्यावृत्त्या योज्यम् ॥ ४ ॥ प्रकृतिश्लेषमाह । अयं सर्वाणि शास्त्राणि हृदि ज्ञेषु च वक्ष्यति ॥ सामर्थ्यकृदमित्राणां मित्राणां च नृपात्मजः ॥ ५ ॥ अयं सर्वाणि शास्त्राणि हृदि वहिष्यति ज्ञेषु विज्ञेषु जनेषु वादिष्यति । वहिवच्योर्लृटि वक्ष्यतीति समं रूपम् । अमित्राणां सामर्थ्यं कृंततीति मित्राणां सामर्थ्यं करोतीति । कृंततिकरोत्योः क्विप् । तेन प्रकृत्योः श्लेषः ॥५॥ प्रत्ययश्लेषमाह । रजनिरमण मौलेः पादपद्मावलोकक्षणसमयपराप्तापूर्वसंपत्सहस्रम्॥ प्रमथनिवहमध्ये जातुचित्तप्रसादादहमुचितरुचिः स्यान्नन्दिता सा तथा मे ॥ ६ ॥ चंद्रमौलेः पादपद्मावलोकेक्षण उत्सवस्तत्समये पराप्तं प्राप्तं यदपूर्वमगोचरं संपदां सहस्रं यत्र तद्यथा स्यात्तथाहं जातुचित्कदाचित्तस्य चंद्रमौलेः प्रसादात् प्रमथाख्यगणमध्ये उचिता योग्या रुचिः प्रीतिर्दीप्तिर्वा यस्य तादृशो नंदिता नंदकर्ता स्यां भवेयं तथा सति सा नंदिता नंदिनो गणस्य भावो नंदिता मे मम स्यादित्यर्थः । अत्र स्यां स्यादित्युत्तमप्रथमपुरुषयोर्लिङि [illegible] प्रत्ययश्लेषः ॥ ६ ॥ अथ [illegible]

भवः संसारस्तन्नाशपरः नयो नीतिरुपकारश्च तयोः सांमुख्
ल्यं तनुः शरीरं तस्य जीवनं वर्त्तनं चायासि प्राप्नो
चोरं प्रत्युक्तिः।त्वं सर्वस्य सर्वस्वं हर छेदो ग्रंथेर्भित्तेर्वा तत
उपकारसांमुख्यं नय त्यज । आयासि क्लेशयुक्तं वर्तनं त
अत्र हरभवनयायासितन्विति तिङन्तानि क्रियापदानि इ
चेति सुप्तिङां श्लेषः॥७॥अथ प्रहेलिका।व्यक्तीकृत्य कमप्य
पार्थस्य गोपनात् ॥ यत्र वाक्यांतरादर्थः कथ्यते सा प्रहेलि
सा द्विधाऽऽर्थी च शाब्दी च विख्याता प्रश्नशासने ॥ आ
दर्थविज्ञानाच्छाब्दी शब्दविभंगतः ॥ २ ॥ तरुण्याऽऽलि
नितंबस्थलमाश्रितः ॥ गुरूणां सन्निधानेऽपि कः कूजति
॥ ३ ॥ पानीयकुंभ इति मध्योऽर्थः । बाह्योऽर्थस्तु भर्त्ता
पाण्डुपीनकठिनं वर्तुलं सुमनोहरम्॥ करैराकृष्यतेऽत्यर्थं ि
पि सस्पृहम् ॥ ४ ॥ बाह्योऽर्थः स्तनयुगम् । मध्योऽर्थः प
फलम् । इत्यार्थी ॥ दुर्वारवीर्यसरुपि त्वयि या प्रसुप्ता
सपत्नहृदये सुपयोधरा च ॥ तुष्टे पुनः प्रणतशत्रुसरोजसू
द्यवर्णरहिता वद नाम का स्यात् ॥ ५ ॥ शस्त्री त्वयि स
शत्रुहृदये वर्णेन श्यामा अजातरजस्का मार्जितत्वात् सुष्ठ
रिणी मध्ये निम्नत्वात् । पक्षे सुस्तनी प्रसुप्ता नम्रीभूत
षोडशवार्षिकाऽजातरजस्का निवृत्तरजस्का शस्त्री असिपुत्र
नितेति॥सदारिमध्यापि न वैरियुक्ता नितांतरक्तापि सितैव
यथोक्तवादिन्यपि नैव दूतिका का नाम कांतेव निवेदय
सारिका पक्षिविशेषः द्यूतक्रीडनका वा। सदारिशब्दो मध्ये
सा न वैरियुक्ता । नितांतमत्यर्थं रक्ता मध्ये सितान्तैः

सा च षोढा च्युताक्षरा॥ दत्ताक्षरोभयाक्षराक्षरमुष्टिबिन्दुमत्यर्थवती-भेदात्॥सुशीलः स्वर्णगौराभः स्वर्णचंद्रनिभाननः॥सुगतः कस्य न प्रीतिं तनोति हृदि संस्थितः॥ १ ॥ इह सुगतम् इत्यत्र मध्ये गकारभ्रंशात्सुत इति सिध्यति इति च्युताक्षरा । इहाक्षरशब्देन मात्राविसर्गबिन्दुव्यंजनान्यपि ग्राह्याणि ॥ अन्योप्यर्थः स्फुटो यत्र मात्रादिच्युतकेष्वपि ॥ प्रतीयते विदुस्तज्ज्ञास्तन्मात्राच्युत-कादिकम् ॥ १ ॥ महाशयमतिस्वच्छं नीरं संतापशांतये ॥ खलावासादतिश्रान्ताः समाश्रयत हे जनाः॥ १ ॥ अत्र नकार-स्येकारमात्रायाश्च्यावने नरोऽपि भवति । तथा च नरनीरयोः कर्मणोः समाश्रयतेति क्रिययान्वयः । महान् आशयश्चित्तमाश्रयो वा यस्य तम्।अतिस्वच्छमकुटिलं निर्मलं च । संतापः आधिर्व्या-धिश्च । खलो दुर्जनो धान्यमर्दनभूश्च ॥ तुषारधवलः स्फूर्जन्महा-मणिधरोनवः ॥ नागराजो जयत्येकः पृथिवीधरणक्षमः ॥ २ ॥ इह नकारे आकारच्यावनान्नगराजो हिमाद्रिर्नागराजः शेषः ॥ इह यद्यपि । धूमे शंखे मणौ मांसे तैले भोज्ये गृहे पथि । गुरुमज्ज-नवैद्येषु संज्ञायां ब्राह्मणे तथा॥अश्लीलार्थाभिधायित्वान्महच्छब्दं न दापयेदिति वचनान्महामणिशब्दो लज्जाकरस्तथापि क्रीडाकाव्येषु न दोषो महामणिषु जातं मन्यसे त्वं महत्वमित्त्यादिप्रयोग-दर्शनात् ॥ मात्राच्युतकमिति । सुश्यामा चंदनवती कांता तिल-कभूषिता ॥ कस्यैषानंगभूः प्रीतिं भुजंगस्य करोति न ॥ १ ॥ अत्रानंगभूरित्यत्र बिंदुच्युत्या नगभूर्भवति सा चौचित्यान्मलयाद्रि-र्ज्ञेया।सुष्ठु श्यामलाऽजातरजाश्चचंदनद्रुमवती चंदनांगरागवती च ।

वर्षतौं कांतो भर्ता दुःखेन लभ्यत इत्यर्थः॥इति विन्दुच्युतक
रुहा विहंगानां मधुरैककलापिनाम् ॥ विरुतैर्नीरवाहाय
नीव कुर्वते ॥ १ ॥ मधुरैककलापिनामिह विसर्गच्युत
रैर्विरु तैश्शब्दैः मधुरमेवैककं लपितुं शीलं येषां तेऽत्रैकश
र्थिककांतो ज्ञेयः।पक्षे केन सुखेन युक्तः कलापः पुच्छभ
तेषां मयूराणां मधुरैर्विरुतैरिति ॥ अगस्त्यस्य मुनेः शाप
दनमाश्रितः ॥ महासुखात्परिभ्रष्टो नहुषः सर्पतां गतः ॥२
महासुर्महाप्राणः खादाकाशाद्भ्रष्टो नहुषो विप्ररथस्थः
गतः । पक्षे बृहत्सुखादिति विसर्गच्युतकम् ॥ भिक्षवं
सर्वे सुरसाश्च जनप्रियाः ॥ क्षमायामपि संपन्ना दृश्यं
परम् ॥ १ ॥ भकारच्युताविक्षवः स्युः । इक्षुपक्षे स्पष्टोर्थः
पक्षे रुचिरा वपुर्वेषयुक्त्युक्तिभिर्दीताः शृंगारादिरसाभिन
त्सुरसाः क्षमायां क्षांतावपि संपन्नाः परं केवलं मगधदेशे
पक्षे क्षमायां भूमौ । इति व्यंजनच्युतकम् ॥ स्फोटं
किञ्चित्पुनरन्यस्य दानतः ॥ यत्रापरो भवेदर्थश्च्युतदत्त
तत् ॥ १ ॥ सदागतिहतोच्छ्रायस्तमसोवश्यतां गतः ॥
ष्याति दीनो यं विधुरेकः शिवास्थितः ॥ १ ॥ अयमेको
शिवस्थितो हरस्थो दीनः क्षीणः सदागत्या गमनेन ह
गतवृद्धिः । एकत्रावस्थित्या कुब्जीभूतांग इत्यर्थः । तम
रवश्यतामग्रसनीयतां गतोऽस्तमेष्यति । काक्का नैष्यतं
तथाऽयं दीपः सदागतिना वायुना हतोच्छ्रायः प्रास्तशिख
धकारस्य वश्यतां गतोऽस्तमेष्यति विध्वस्तो भविष्य
विधुरे विपादकः शिवो निरवग्रहस्थितः । अत्र दीन ह

कामिनीह ककारं निष्कास्य यकारदाने यामिनी रात्रिरिति। 'अंबरं व्योम्नि वाससी'त्यमरः॥स्वांतं मनः पूर्वस्यालंबनविभावत्वादपरस्योद्दीपनविभावत्वाच्चेति च्युतदत्ताक्षरा॥प्रसंगात्स्थानच्युतकमप्याह॥ तनोतु ते यस्य फणी गरुत्मान्पाणौ मुरारिर्दयिता च शय्या॥नाभ्यां स्फुरन्भद्रमशुभ्रदेहः पद्मा गतिश्चक्रमसौ विरिञ्चिः ॥१॥असौ मुरारिर्विष्णुस्ते तव भद्रं शुभं तनोतु। यस्य फणी शेषः शय्या।गरुत्मान् गतिर्वाहनम्। पाणौ चक्रं दयिता श्रीः नाभ्यां विरिञ्चिः स्फुरन्दीप्यमानः। अशुभ्रदेहः श्यामांगः। अत्र व्युत्क्रमयोजनया स्थानच्युतकत्वम् ॥ अथाक्षरमुष्टिमाह ॥ बहूनां यत्र वस्तूनामुक्तिराद्याक्षरेण हि। प्रोच्यतेक्षरमुष्टिस्सा साहित्यनयकोविदैः ॥ अकचटतपयशा यथा वर्गाष्टबोधकाः॥आचंकुराजीशबुकेशुनवग्रहबोधकाः ॥ एवम्। आभाकासितपक्षेषु मैत्रश्रवणरेवती। संगमे नहि भोक्तव्यं द्वादश्यां द्वादशक्षयादित्युक्तेरन्यथापि बोध्याक्षरमुष्टिः।स्वरेषु बिन्दुयुक्तेषु हलांयदवबोधनम्। तद्बिंदुमदितिप्राहुः केचिद्बिंदुमतीमिति ॥

िः ○○○○ू○ा ○ं○ि○○ं○ि○○ं○ो ः○ु○ु ः ○ो○ि○○ः।○○ु○○ि○○ु○○ा○○○ु○ि○○○○ो○○ा ःं ः ॥

त्रिनयनचूडारत्नं मित्रं सिंधोः कुमुद्वती दयितः ॥ अयमुदयाति घुसृणारुणतरुणिमवदनोपमश्चन्द्रः ॥ १ ॥ घुसृणा कुंकुमम्। अर्थवती तु तरुण्यालिंगित इत्यादिना प्रागुक्तैव ॥ प्रश्नोत्तरं क्रमप्राप्तमाह ॥ बहिरंतर्भेदात्प्रश्नोत्तरं द्विधा। तत्र बहिः प्रश्नोत्तरं यथा। प्रायः कार्यै नियुज्यंते जनाः सर्वत्र कीदृशाः॥नाधेत्ययं भवेच्छब्दो नौवाची वद कीदृशः ॥ १ ॥ सावधानाः अविकलेंद्रियाः। औकारेण सहितः सौ अधाना इति शब्देन रहितो नाधा इति शब्दो नौरिति भवेत्। यद्वा सौ अधानाः सौ सहौकारेणेति सौ तथा कृते

आ आकारो यत्र सोऽना अधश्चानात्यधानाः धलोपे आलोपे रौकारयोर्योगे नौरिति सिद्ध्यति ॥१॥ अंतःप्रश्नोत्तरं यथा संबोधनं कीदृक्कंविना परिकथ्यते ॥ केनेदं मोहितं विश्वम न बुध्यसे ॥ १ ॥ को इति पृथिवीसंबोधनम् । इना कामेने तामिति ॥ अथ यमकलक्षणम् ॥ अतुल्यार्थत्वे सत्यानुपूर्व विशिष्टनियतव्यंजनसमुदायो यमकम् । यथा । नवपला वनं पुरः स्फुटपरागपरागतपंकजम् ॥ मृदुलतां तलतां यत्ससुरभिं सुरभिं सुमनोभरैः ॥ १ ॥ सुरभिर्वसंतः । तच्चे पेण सप्ताशीतिप्रकारमित्यलंकारशेखरः । काव्यप्रकाशे सत्यर्थभिन्नानां वर्णानां सा पुनः श्रुतिः । यमकं पादतः तद्यात्यनेकताम् ॥समरसमरसोऽयमित्यादावेकेषामर्थवत्त्वे नर्थवत्त्वे भिन्नार्थानामिति न युज्यते वक्तुमित्यर्थे सतीत्य सरोरस इत्यादिवैलक्षण्येन तेनैव क्रमेण स्थितानां पादेति द्वितीयादौ द्वितीयस्तृतीयादौ तृतीयश्चतुर्थे प्रथमस्त्रिष्वपी प्रथमो द्वितीये तृतीयश्चतुर्थे इति प्रथमश्चतुर्थे द्वितीयस्त इति द्वे तदेवं पादजं नवभेदम् ॥ अर्धावृत्तिश्श्लोकावृत्तिश्च द्विधा विभक्ते पादे प्रथमपादादिभागः पूर्ववत् । द्वितीयतृ पादादिभागेष्वंतभागोंतभागेष्विति विंशतिभेदाः । श्लो नासौ भागावृत्तिः । त्रिखंडे त्रिंशच्चतुष्खंडे चत्वारिंशत् पादादिगतान्त्याद्धादिभागो द्वितीयपादादिगते ॥ अद्याद्ध यम्यत इत्याद्यन्वर्थतानुसरणेनानेकभेदमन्तादिकमाद्यां तसमुच्चयः मध्यादिकमादिमध्यमन्तमध्यं मध्यांतिकं तेषां तस्मिन्नेव पादे आद्यादिभागानां मध्यादिभागेष्वनियते

स्य भेदलक्षणं कृतं दिङ्मात्रमुदाह्रियते । अथास्य व्याख्या। अर्थे सतीति। अर्थभिन्नानां भिन्नार्थानां वाहिताग्न्यादिष्विति पूर्वनिपातः। तेनैकार्थे लाटानुप्रासेन प्रसंगः। एवं त्वर्थशून्यानां पुनः श्रुतौ यमकं न स्यादत आह। अर्थे सतीति। सा भिन्नक्रमा वर्णानां पुनःश्रुतिर्यमकमित्यर्थः । अत्र वर्णयमकभेदेऽपि श्रुतिसाम्ये यमकं भवत्येव। यथा माघे। भुजलतां जडतामबलाजन इति डलयोः साम्ये॥ तदुक्तं डलयोरलयोश्चैव डरयोश्च समा श्रुतिरिति। नन्वर्थे सतीति व्यर्थमत आह। समरेति। समरे युद्धे समो रसो यस्य सः। अत्र द्वितीयसमरपदेऽर्थाभावान्न यमकं स्यादतोऽर्थे सत्युक्तम्। मूले सेति पदं व्यर्थमत आह। तेन तुल्यार्थशून्यानेकवर्णपुनःश्रुतिर्यमकं तच्च भिन्नार्थत्वेऽर्थाभावे च तुल्यं विशिष्टाभावस्य द्वेधासंभवादिति तत्त्वम्॥ मूले सेति पदं व्यर्थमत आह। सर इति। सरसस्तडागस्य रस इत्यत्र वर्णाभेदेऽपि क्रमभेदान्न यमकमित्यर्थः। अस्य विंशतिभेदानाह। पादे यमकं द्वेधा पादवृत्तिस्तद्भागवृत्तिश्च। आद्यमेकादशधा प्रथमः पादो द्वितीयादौ द्वितीये तृतीये चतुर्थे च विकल्पेन यम्यत इत्यग्रेतनेन संबंधः। एवं साम्ये मुखम् १ संदेहः २ आवृतिश्चेति त्रयो भेदाः। द्वितीयः पादस्तृतीये चतुर्थे च सम इति गर्भसंदेशौ द्वौ तृतीयश्चतुर्थे इत्येकः पुच्छाख्यः प्रथमः पादस्त्रिष्वपि सम इति पंक्त्याख्यः । यथा। विकाशमीयुर्जगतीशमार्गणा इति। अत्र मुखयोगे युग्मकम्।गर्भावृत्त्योर्योगे परिवृत्तिः। अर्द्धावृत्तिः समुद्रकं श्लोकावृत्तिर्महायमकमेवं सप्तभेदाः। पादयमकस्येत्यर्थः प्रथम। इति। आद्ययोरंत्ययोश्च पादयोः साम्ये एकः। आद्यंतयोर्द्वितीयतृतीययोश्च साम्येऽन्य

कपादांश्चतुरो द्वेधा कृत्वाऽऽद्यभागस्य द्वितीयपादौ तृती
र्थादौ भागे साम्यम् । एवं द्वितीयाद्यभागः तृतीयाद्ये चतुर्थ
सम इति पञ्च । अंतभाग इति प्रथमपादांत्यभागो द्वितं
तृतीयांत्ये चतुर्थांत्ये इति पञ्च । एवं भागावृत्तौ दश पूर्व
श्लोकावृत्तिं विना दशेति विंशतिरित्यर्थः । ननु श्लोकावृत्त्य
कविंशत्या भाव्यम्।कथं विंशतिभेदा इत्यत आह। श्लोकान्
भागावृत्तौ न श्लोकावृत्तिः । द्वित्र्यक्षरावृत्तावपि व्य
चमत्काराभावादित्यर्थः । पादस्य त्रेधाभागे चतुर्द्धा
चान्यभेदानाह । त्रिखंडेति । त्रिखंडे चतुष्खंडे इत्यत्र पादे
षंगः।आद्यपादभागो द्वितीयाद्ये इति पूर्ववद्योज्यम्।अन्वर्थता
भेदं यमकमित्यनुषंगः । त्रिखंडचतुष्खंडादौ यमकभेदाना
दिकमिति । प्रथमांतस्य द्वितीयाद्यैक्येंतादिकं प्रथमादौ
तैक्ये आद्यांतिकं प्रथमान्तद्वितीयांतयोरैक्ये तत्समुच्चयः।
ध्यस्य द्वितीयाद्यैक्ये मध्यादिकं प्रथमादेर्द्वितीयमध्यसाम्ये
मध्यं प्रथमांतस्य द्वितीयमध्येन प्रथममध्यस्य द्वितीयांते
तत्संज्ञे प्रथमादिमध्यांतानां द्वितीयाद्यादौ समुच्चयः इत्य
ज्ञेया । एकपादेऽपि तद्भेदानाह।तथेति।आदिभागस्य मध्येंते
यमेन विकल्पेन संस्थितिरावृत्तिः।एवं द्वितीयादिपादेष्विति
भेदं यमकमित्यन्वयः । गडुर्ग्रंथिः शब्दचित्रत्वेनाधमत्वादि
दिङ्मात्रं मार्गमात्रं पूर्णवचनाशक्तेरित्यर्थः ॥ पुनर्
सन्नारीभरणोमायमाराध्य विधुशेखरम् ॥ सन्नार
मायस्ततस्त्वं पृथिवीं जय ॥ विना यमेनोनयताऽसु
विनाऽयमेनोनयताऽसुखादिना ॥ महाजनोऽदीयत मानसा

हिमव्याप्तविश्वा वेधा न वेद याम् ॥ या च मातेव भजते प्रणते-मानवे दयाम्॥यदानतोऽयदानतो न यात्ययं नयात्ययम् ॥ शिवेहि तां शिवे हितां स्मरामितां स्मरामि ताम् ॥ समुच्चययमकम् । सर स्वति प्रसादं मे स्थितिं चित्तसरस्वति ॥ सरस्वति कुरु क्षेत्रं कुरुक्षे त्रंसरस्वति ॥ ससार साकं दर्पेणकंदर्पेण ससारसा ॥ शरन्नवाना वि-भ्राणा नाविभ्राणा शरन्नवा ॥ मधुपराजिपराजितमानिनीजनमनः-सुमनःसुरभिश्रियम् । अमृतवारिजवारिजविप्लवं स्फुटिततास्रतता-म्रवणं जगत्॥एवं वैचित्र्यसहस्रैः स्थितमन्यदुन्नेयम्॥अथ व्याख्या॥ आद्यतृतीयपादसाम्ये आह । सन्नारीति । सन्ना नष्टा अरीणामिभा गजा यत्रेदृशो रणो यस्य स त्वं सतीर्नारीर्बिभर्ति पुष्णाति यो मा गौरी तां याति यस्तं विधुशेखरं शिवम् । अमायमकपटं यथा तथाराध्य ततो हेतोः पृथिवीं जयेत्यर्थः । पादावृत्तौ युग्मक-माह । विनेति । यमरूपेण विना पक्षिणाऽयं महाजनः सज्जन ए-नोऽपराधं विना यतमानानां प्रयत्नवतामपि सादं दुःखं राति ददा-तीति सादरं यथा तथा । यद्वा । यतो दीर्घो मानो येषां तेषु सादरं यथातथा । मानसाच्चित्तात्सरसश्चारमत्यर्थमदीयत अखंड्यत अमा-र्यतेत्यर्थः । कीदृशेन यमेन नयता स्वस्थानं प्रापयताऽसून्प्राणा-न्खादतीति खादी तेन । ऊनयता हानिं कुर्वता सुखादि ऊनयता नाशयता अयन्ना पुमान् अखंड्यतेति संबंधः । महमुत्सवमजति क्षिपतीति महाजः खलस्तं नुदतीति महाजनो ना पुरुषः । यद्वाऽयं शुभविधिं विना एनः पापं नयता जनयता महां-तमजं छागं नुदति ददातीति नोदी 'महोक्षं वा महाजं वा श्रोत्रिया-गोप[illegible] ॥ श्लोकान्तरमाह । म[illegible]ति ॥ म त भगतो

अन प्राणने । अवात्र निषेधे । त्वरावानित्यर्थः । अग
वा । वा गतौ । अस्थित स्यति क्षिपतीत्यस्थितः । अधा
क्तेर्धातुत्वान्नोपधादीर्घः । अर्थव्यत्ययेन क्रमेण वा पुनः
श्लोकस्तदायमर्थः । सर्वं दारयति नाशयतीति सर्वद
मानमिच्छतीति दावानलो दवाग्निस्तेन समं तुल्यं स्थितं
सत्वेन गुणेन सामर्थ्येन वारंभेन कार्यारंभे रतः । अवलं
विततो विस्तीर्ण आरवश्शब्दो यस्य तं वश्यमनैषीदिति
यद्वाऽलसं मदम् आवान् गच्छन् ओ विष्णुस्तत्र
द्विखंडे पादे भागात्संदष्टमाह । अनंतेति द्वाभ्याम् । वेधा
यां न वेद अनंतमहिम्ना व्याप्तं विश्वं यया या च प्रणते मान
दयां भजते तां स्मरामीत्यग्रेऽन्वयः ॥ एकपादे आद्यन्तय
यदानत इति । यस्यामानतोऽयं जनोऽयस्य शुभविधेर्दानतं
यस्य नतिरत्ययं नाशं न गच्छति । शिवेन रुद्रेणेहितां शिवे
णे हितां स्मरेण कामेनामितां व्याप्तां गौरीं स्मरामीति द्वये
पादभेदे आद्यंतयोः समुच्चयमाह । सरस्वतीति । क्षे
कुरुक्षेत्रं तीर्थं तत्र सरस्वति नदीरूपे वाग्देवि मे चित्तमेव
न्समुद्रः । सरस्वान्सागरोऽर्णव इत्यमरः । तत्र स्वति
गच्छ । स्थितिं प्रसादं च कुर्वित्यर्थः ॥ द्वयोरर्थयोराद्यंत
च्चयमाह । ससारेति । ससारसा सारसपक्षिसहिता । स
सारसं पद्मं वा शरदृतुःकंदर्पेण साकं सह । यद्वा कं ब्रह्माणं
नाशयतीति कंदर्पः तेन दर्पेण कृत्वा ससार प्रवृत्तेत्यर्थः ।
नवा नूतना शरं कांडं बिभ्राणा नवानां यूनामनः प्रा
[illegible] य

पानां राज्या पंक्त्या पराजितं मानिनीजनमनो याभिस्ताः सुमनसः पुष्पाणि यत्र । स्त्रियः सुमनसः पुष्पमित्यमरः । स चासौ सुरभिर्वसंतस्तस्य श्रियम् । यद्वा।तासां सुमनसां पुष्पाणां सुरभिः सुगन्धस्तस्य लक्ष्मीमभृत दधार । वारिजानि पद्मानि वारीणि च तज्जो विप्लुवो विह्वलता यत्र । यद्वा ।वीनां पक्षिणां प्लवो गतिर्यत्र स्फुटितं विकसितं ताम्रं रक्तं ततं विस्तृतमाम्रवणं यत्र तत्तथेति । विशेषतो यमकोदाहरणानि तु नलोदयकाव्ये कालिदासेन प्रदर्शितान्यपेक्षा चेत्तत्र द्रष्टव्यानीत्युपरम्यत इति शब्दालंकारदिग्दर्शनम् ॥ अथार्थालंकारान्विभजते ॥ उपमा रूपकोत्प्रेक्षा समासोक्तिरपह्नुतिः। समाहितं स्वभावश्च विरोधः सारदीपकौ ॥ सहोक्तिरन्यदेशत्वं विशेषोक्तिविभावने। एवं स्युरर्थालंकाराश्चतुर्दश न चापरे ॥ अन्याः सर्वालंकृतय एष्वेवांतर्भवंति हीति । तत्र भेदे सति साधर्म्यमुपमा अधिकगुणवत्तया संभाव्यमानमुपमानं निकृष्टगुणवत्तया संभाव्यमानमुपमेयम् । ता विभजते ॥ वाक्यार्थातिशयश्लेषनिन्दाऽभूतविपर्ययाः । संशयो नियमः स्वच्छ विक्रियेत्युपमा दश ॥ तत्र वाक्यार्थेनैव वाक्यार्थो यत्रोपमीयते सा वाक्यार्थोपमा। सा च द्वयी प्रत्येकसादृश्यानपेक्षा तत्सापेक्षा च । आद्या यथा। कामिनीनयनकज्जलपंकादुत्थितो मदनमत्तवराहः । कामिमानसवनांतरचारी कंदमुत्खनति मानलतायाः॥अत्रोपमानस्य वराहादेर्मत्तत्वादमूर्त्तैर्मदनादिभिरुपमेयैरसादृश्यत्वेन न्यूनत्वात्॥यथा।त्वदाननमधीराक्षमाविर्दशनदीधिति ॥ भ्रमद्भृंगमिवालक्ष्य केशरं भाति पङ्कजम्॥२॥ इहोपमेयस्याननस्योपमानेन पंकजेन प्रत्येकं सादृश्यात् ॥यत्रातिशयधर्मोपन्यासः साऽतिशयोपमा । यथा । कल्पद्रुमो न जानाति

राजते विलसद्वयाः । बालेवोद्यानमालेयं सालकाननशो
अत्र तमालपत्राण्याभरणानि यस्याः सा तथा। तमा
पुंड्रविशेषाणि पक्षे तापिच्छपत्राणि । विलसद्वयो यौवनं
पक्षे विलास्सद्वयसो युवानो यस्यां सा। अलकैः सहिता च
नेन मुखेन शोभिनी पक्षे सालकाननैः सालवृक्षविशेषैः शो
सर्वत्र पदश्लेषः॥ यत्रोपमानस्य निन्दया प्रतिक्षेपस्सा नि
यथा।नागेन्द्रहस्ता स्त्वंचि कर्कशत्वादेकान्तशैत्यात्कदली
लब्ध्वाऽपि लोके परिणाहि रूपं जातास्तदूर्वोरुपमानबाह्
पमानयोरिभशुंडाकदलीस्तंभयोस्त्वक्कार्कश्यैकान्तशैत्या
दया प्रतिक्षेपः॥ यत्रासंसृष्टज्ञानेन संसर्गमारोप्य साम्
साऽभूतोपमा। यथा। उभौ यदि व्योम्नि पृथक्प्रवाहावाक
यसः पतेताम् । तदोपमीयेत तमालनीलमामुक्तमुक्त
वक्षः॥ अत्र द्युगंगासंसर्गमज्ञात्वैव तत्संसर्गारोपेण समुक्ता
साम्यतारोप्यते॥ यत्रोपमानस्यैवोपमेयता सा विपर्ययो
था। अतिसुललितयोषिद्भ्रूलताचारुशार्ङ्गं रतिवलयपद
मासज्य कंठे । सहचरमधुहस्तन्यस्तचूतांकुरास्त्रः
मुपतस्थे प्रांजलिः पुष्पधन्वा ॥ इहोपमानस्य शार्ङ्ग
यता॥ यत्रोपमानोपमेययोः संशयकोटिता सा संशयोपम
किमिंदुः किं पद्मं किमु मुकुरबिम्बं किमु मुखं किमब्जे
किमु मदनबाणौ किमु दृशौ। स्तगौ वा गुच्छौ वा व
शौ वा किमु कुचौ तडिद्वा तारा वा कनकलतिका
मबला॥स्पष्टार्थः॥यत्र तथान्यावृत्त्या साम्यलाभस्सा नि
यथा॥कले पुरंदरादन्यः प्रतिमल्लो भविष्यति॥कले सहस्रा

यथा। आघूर्णितं पक्ष्मलमक्षियुग्मं प्रांतद्युतिश्वैत्यजितामृतांशुः॥अ-
स्या इवास्याश्चलदिन्द्रनीलगोलामलश्यामलतारतारम् ॥ अभेदानु-
मानवदिह भेदो द्रष्टव्यः॥ यत्रोपमेयमुपमानविकारतयोच्यते सा वि-
क्रियोपमा। यथा। हरिणादथ तन्नयनादथ पद्मात्पद्मपत्राच्च॥आहृत्य
कांतिसारं विधिरसृजत्सुभ्रुवो दृष्टिम् ॥ श्रीपादस्तु समभिव्याहारो-
पमाप्यस्तीत्याह । सा यथा। प्रकृत्यैव मनोहारि वदनं हरिणीदृशः।
चन्द्रे ह्लादकता कस्मात्पद्मः केन परिष्कृतः॥अत्र सर्वत्र। न्यूनाधिकत्व
शंका चेद्विभागेषु तदिष्यताम् ॥ किंचिद्विशेषमादाय भेदोभेदश्च क-
श्चन ॥ काचित्समस्तान्वयिनी क्रियामात्रान्वयापरा ॥ विशेषणान्व-
या काचिदुपमा कापि तत्परा ॥ अत्र च । न्यूनता साम्यमाधिक्यं य
द्यदेवाभिधीयते ॥ अहो वाक्यस्य माहात्म्यं समतैव प्रतीयते॥तदाह
राजशेखरः। समानमधिकं न्यूनं सजातीयं विरोधि च ॥ सकुल्यं सो-
दरं कुल्यमित्याद्याः साम्यवाचकाः ॥ अलंकारशिरोरत्नं सर्वस्वं
काव्यसंपदाम्॥ उपमा कविवंशस्य मातैवेति मतिर्मम ॥ इत्युपमा ॥
अतिसाम्यादपह्नुतभेदयोरुपमानोपमेययोरभेदप्रत्ययो रूपकम् ॥
यदाह।तद्रूपकमभेदो य उपमानोपमेययोरिति॥दंडी च।उपमैव तिरो-
भूतभेदा रूपकमिष्यते।इति॥तद्विभजते।विरुद्धश्च समस्तं च व्यस्त-
रूपकरूपकम् । श्लिष्टञ्च रूपकं तस्मात्संक्षेपात्पंचधा स्मृतम्॥तत्रो-
पमानविरुद्धोर्थस्ताद्विरुद्धम्। यथा। दिवा न परिभूयते न च मनागपि
क्षीयते न वा चरमवारिधेः पयसि लुप्तिमाविंदति । न च त्रिदश-
सुभ्रुवां वदनकांतिभिर्जीयते यशस्तुहिनदीधितिर्जयति को पि भूमी-
पतेः ॥ अत्रोपमानश्चन्द्र उपमेयं यशस्तच्च चंद्राद्विरुध्यत्वेन वर्णि-
तम् ॥ समस्तं यथा । तस्या बाहुलता पाणिपद्मं चरणपल्लवम् ।

वदनं सुधांशुः कुंदानि दंताश्चरणौ सरोजे । स्मितं प्र
करौ प्रवाले पयोधरौ भूमिधरौ मृगाक्ष्याः ॥ अत्र सर्वाणि
व्यस्तान्येव ॥ रूपकरूपकं यथा । मुखपंकजरङ्गेऽस्मि
नर्तकी तव । नरीनार्तिं लसत्स्वर्णकेतकीदललोचने ॥ अ:
मुखमेव पंकजं तदेव रंगस्तत्रेति रूपकेण रूपकम् ॥ श्लि
यथा । राजहंसोपभोगार्हं भ्रमरप्रार्थ्यसौरभम् ॥ पुष्णाति
कांचिन्मुखपंकेरुहं तव ॥ अत्र राजैव हंस इति भ्रमरैः प
श्च प्रार्थ्यं सौरभं यस्येति श्लेषत्वाच्छ्लिष्टरूपकम् ॥ इद
स्तादिभेदादनंतम् । लक्षणाप्यत्रैवांतर्भवाति ॥ उपमानोप
भेदप्रतिपत्तेरत्रापि सत्त्वात् । तदुक्तं रूपकं लक्षणादि
सा च द्विधा समस्तासमस्तभेदात् ॥ तत्राद्या यथा । उद
नकाचलयोरुपरि चलत्पङ्कजश्चंद्रः । तदुपरि घनांधका
कृते धातुरीदृशी सृष्टिः ॥ इह कनकाचलयोरित्यादिसमर
स्तननेत्रभ्रूलतासु लक्षणा । कस्य कृते कस्यार्थम् । कृत इ
र्थेऽव्ययम् ॥ अंत्या यथा । तामरसे सालसता जलमुचि
द्विपर्यासः । निस्स्पंदता लतायां कथयति कस्यापि
नि ॥ इह तामरसेन नेत्रं जलमुचा च पतिर्लक्ष्यते । ल
पुण्येनोपभोगश्च लक्ष्यते ॥ इति रूपकम् ॥ अनन्यनिर्मि
स्तुन्यन्यनिमित्तकत्वारोपणमुत्प्रेक्षा ॥ यथा । गमनम
कुंभलक्ष्मीं कुचाभ्यामविकलकरशोभामूरुकांडद्वयेन । य
रदेषां हेतुनानेन नूनं निजवपुषि करींद्राः पांशुपूरं कि
अत्र निजांगधूलिक्षेपेऽनिमित्तभूतानामपि गत्यादिहरणान
तत्कल्पनयोत्प्रेक्षा । इयं च । सर्वालंकारसर्वस्वं कविकीर्तिवि

इत्युत्प्रेक्षा ॥ अन्यदभिप्रेत्यान्याभिधानं समासोक्तिः सैव चान्यापदेश उच्यते यथा। त्वं पीयूषदिवोपि भूषणमासि द्राक्षे परीक्षेत को माधुर्यं तव विश्वतोपि विदिता माध्वीकसाध्वी कथा ॥ एतत्किंतु तवाप्यरुंतुदमिव ब्रूमो न चेत्कुप्यसे यः कांताधरपल्लवे माधुरिमा नान्यत्र कुत्रापि सः॥ इह कान्ताधराभिप्रायेणामृतादिकथनात्समासोक्तिः ॥ किञ्चिदपह्नुत्य यदन्यार्थप्रदर्शनं सापह्नुतिः ॥ यथा। शीत्कारं शिक्षयति व्रणयत्यधरं तनोति रोमाञ्चम् ॥ नागरिकः किमु मिलितो नहि नहि सखि हैमनः पवनः ॥ अत्र नागरिकमपह्नुत्य हैमनपवनप्रदर्शनादपह्नुतिः ॥ आरब्धानुकूलाकस्मिकसहकारिलाभः समाहितम् ॥ मानापनोदनविधौ मदिरेक्षणाया यावन्नमामि चरणावथ तावदेव। नीपस्खलन्नवसमीरपुरस्सराणि प्रादुर्बभूवुरचिराद्धनगर्जितानि ॥ सुरभिवातघनगर्जनादेरुद्दीपनविभावत्वेन सहकारित्वेन समाहितत्वमत्रेति ॥ यस्य वस्तुनो यत्स्वभावता तदाख्यानं स्वभावः स एव जातिरुच्यते यथा। चलति कथंचित्पृष्टा यच्छति वाचं कथंचिदालीनाम् ॥ आसितुमेव हि मनुते गुरुगर्भभरालसा सुतनुः ॥ स्पष्टार्थः ॥ विरोधो द्विविधः तत्राद्यः पारमार्थिकाविरोधेप्यौचित्येन विरोधिता प्रतीयते यत्र सः यथा। मनीषिताः सन्ति गृहेषु देव इत्यादौ। द्वितीयस्तु यथा । श्रुते विरोधसंधानेपि यत्राभिप्रेतमासाद्याविरोधः अयमेव विरोधाभास उच्यते । यथा। भक्तानां कामदो यस्तु रुषा कामं दहन्नपि ॥ अपिज्ञानमयःस्थाणुर्यस्तमीशं स्तुवीमहि ॥ स्पष्टम् ॥ उत्तरोत्तरं यत्र सारोत्कर्षः स सारः। यथा। विषयेषु तावदबलास्तास्वपि गोप्यः स्वभावमनलाः। मध्ये तासामपि सा तस्या अपि साचि वीक्षितं

यथा । पाणौ पद्मा धियेत्यादौ ॥ भिन्नं यथा । नृत्यंति नि
गायंति च कलापिनः । बध्नन्ति च पयोदेषु दृशो हर्षाश्रुगर्भा
इह कलापिन इत्यस्य नृत्यादिसर्वक्रियोपकारकत्वम्
विस्तरभिया सर्वं नोदाह्रियते॥एतच्च मालादीपकादिभेदा
अत्र पूर्वापरवाक्यार्थयोरुपकार्योपकारकत्वं मालादीपक
त्तरस्य पूर्वोपकारकत्वं यथा ॥ चारुता वपुरभूषयदासां ता
वयौवनयोगः।तं पुनर्मकरकेतनलक्ष्मीस्तांमदस्तमपि वल्ल
स्पष्टम् ॥ पूर्वस्योत्तरोपकारकत्वं यथा । संग्रामाङ्ग
भवता चापे समासादिते देवाकर्णय येन येन सहसा यद्य
दितम् । कोदंडेन शराः शरैरपि रिपुस्तेनापि भूमंडलं
भवता च कीर्तिरतुला कीर्त्या च लोकत्रयम् ॥ स्पष्टम् ।
कालोक्तिः सहोक्तिः सा द्वयी।उदासीनयोस्त्वराप्रतिपत्तये
णयोरपि । आद्या यथा।सह दीर्घा मम श्वासैरिमाः संप्रति
समं मम शरीरेण क्षीयंते दिवसा अमी ॥ अन्त्या यथा । व
थानां मूर्छया चूतमंजरी । पतंति च समं तेषामश्रुभि
निलाः ॥ इहाम्रमंजरीमलयानिलयोरुद्दीपकत्वात्कारणत
मूर्च्छाश्रूणां कार्यत्वम् । प्रयोज्यप्रयोजकयोर्वैयधिकरण्य
त्वम् । यथा । सा बाला वयमप्रगल्भवचसः सा स्त्री वयं
सा पीनोन्नतिमत्पयोधरयुगं धत्ते सखेदा वयम् । साक्रांता
लेन गुरुणा गंतुं न शक्ता वयं दोषैरन्यजनाश्रितैरपटवो ज
इत्यद्भुतम् ॥ कारणे सत्यपि कार्याभावो विशेषोक्तिः
आवाति वारिधरशीकरवारिवर्षी स्वैरं कदंबवनदुर्ललितः
अंगेऽर्पितानि नलिनीनवपल्लवानि तापस्तथापि सुदृशः

नांगेषु रत्नाभरणानि संति निःश्वासहार्य्याण्यपिनांशुकानि ॥ तथापि सा संप्रति सारसाक्षी दिने दिने कामपि कान्तिमेति ॥ निःश्वासहार्यीण्यतीव मृदुसूक्ष्माणि । केचित्तु अन्यदेशत्वमेव विशेषोक्तिविभावनेऽधिकरणद्वयमादाय । अन्ये तु अनयोरेकेनापरस्याऽन्यथासिद्धिर्व्यतिरेकमादायेति । गोवर्द्धनस्त्वन्यथा सिद्ध्याऽन्यदेशत्वमेव निराचकार । व्यतिरेकालंकारस्त्वतिरिच्यत इत्येके । स च यथा । कादाचित्कीं द्युतिं धत्ते कलंकी क्षीयतेऽन्वहम् । दोषाकरः कथंकारं त्वदाननसमः प्रिये ॥ एकेनाप्रस्तुतस्य सिद्धिराक्षेपः । सोऽपि पृथगित्यपरे ॥ यथा । इंद्रेण किं स यदि कर्णनरेंद्रसूनुरैरावतेन किमसौ यदि तद्द्विपेन्द्रः । दंभोलिनाऽप्यलमयं यदि तत्प्रतापः स्वर्गोऽप्ययं ननु मुधा यदि तत्पुरीयम् ॥ आनंत्यादेवालंकाराणामिह दिङ्मात्रमेवादर्शि । विशेषापेक्षा त्वलंकारसर्वस्वादिपरिशीलनत एव शाम्यतीति ॥ अथालंकारिकाभिमतव्यंजनावृत्तिर्हि तार्किकादिभिर्नाङ्गीक्रियतेऽधुनाकाव्यप्रकाशोक्तवर्त्मना तां साधयामः ॥ गतोऽस्तमर्क इत्यादौ नानार्थप्रतीतिसिद्धिर्हि व्यंजनामंतरा न संभवतीति वदन्तं प्रत्याह । रामोऽस्मि सर्वसह इह दुःखसहिष्णुत्वम् । रामेण प्रियजीवितेन तु कृते प्रेम्णः प्रियेनोचितमिह निःस्नेहत्वम् । रामोऽसौ भुवनेषु विक्रमगुणैः प्राप्तः प्रसिद्धिं परामित्यत्रोत्कृष्टत्वं च । तेन लक्षणीयार्थोऽपि नानात्वं भजते विशेषव्यपदेशहेतुश्च भवति । तदवगमश्च शब्दार्थायत्तः प्रकरणादिसव्यपेक्षश्चेति कोऽयं नूतनः प्रतीयमानो नाम । अस्यार्थः । विशेषव्यपदेशोऽर्थांतरसंक्रमितवाच्यत्वादिस्तद्धेतुस्तद्विषयस्तदवगमो लक्ष्यावगमः लक्षणायाः शब्दवृत्तित्वाच्छब्दायत्तत्वं शक्यसम्बन्धापेक्षणाच्चार्थायत्तत्वम् । प्रक-

भिप्रेता ते च लक्ष्येपि संतीति तत्रैव व्यंग्यस्यांतर्भावो
भावः ॥ अथ मूलम्॥उच्यते॥लक्षणीयार्थस्य नानात्वेप्यनेव
ब्दाभिधेयवन्नियतत्वमेव न खलु मुख्येनार्थेनानियतसंबंधो
तुं शक्यते । प्रतीयमानस्तु प्रकरणादिविशेषबलेन नियत
नियतसंबंधः संबंधश्च द्योत्यते।न च ' अत्ता एत्थ णि मज्ज
अहं दियसण्यलोएहि मा पहिअ रतिअंधसिज्जाण मह णिमज्जि
इत्यादौ विवक्षितान्यपरवाच्ये ध्वनौ मुख्यार्थबाधः । तत्
लक्षणा । लक्षणायामपि व्यंजकमवश्यमाश्रयितव्यमिति प्रति
तम्॥व्याख्या॥उत्तरमाह।उच्यते इति।न हि नानात्वाल्लक्ष्यत्वं
र्थैति प्रसक्तेरित्यर्थः।नियतत्वं सर्वपुरुषगम्यत्वं प्रतीयमानो
गतोऽस्तमर्क इत्यादौ नियतानियतपरंपरासंबंधगम्यार्थप्रतीति
र्थः।मुख्यार्थबाधाभावादपि न लक्षणेत्याह । न चेति । श्वश्रूर
ज्जति अत्राहं दिवसे विलोकये मा पथिक रात्र्यंधशय्या
निसंक्ष्यसि निमज्जति वृद्धत्वान्निस्पंदं शेते ॥ ननु न मुख्यार्थ
लक्षणाबीजं किंतु तात्पर्य्यानुपपत्तिः सा चात्ता एत्थेत्यत्रास्
आह । लक्षणायामपीति । अयं भावः । पावनत्वादिप्रतीतेरा
कत्वात्तत्र च वृत्त्यंतराभावादवश्यं व्यंजनांगीकार्या । न
त्रापि लक्षणा सा हितनिरूढा प्रसिद्ध्यभावात् । न प्रयोज
प्रयोजनस्य विषयत्वाभावादित्युक्तं द्वितीयोल्लासे ॥
व्यंग्ये लक्षणा न पदवृत्तिः । वाच्यस्यापि व्यंजकत्व
पदैकदेशवर्णादौ तत्वाच्चं नवाक्ये पदत्वं तदेकं
दौ सत्त्वात् । न च शब्दवृत्तिरर्थस्य व्यंजकत्वा

व्यपेक्षालक्षणाऽत एवाभिधा पुच्छमित्याहुः । न च लक्षणात्मकमेव ध्वननं तदननुगमनेन तस्य दर्शनात् । न च तदनुगतमेव अभिधावलंबनेनापि तस्यभावात् । न चोभयानुसार्येव अवाचकवर्णानुसारेणापि तस्य दृष्टेः । न च शब्दानुसार्येव अशब्दात्मकनेत्रविभागावलोकनादिगतत्वेनापि तस्य प्रसिद्धेरित्यभिधातात्पर्यम् । लक्षणात्मकव्यापारानुवर्त्ती ध्वननादिपर्यायो व्यापारो नापह्नवनीय एव ॥ व्याख्या । किञ्चाभिधावल्लक्षणापि संकेतापेक्षा । न च व्यंग्ये तदस्तीत्याह । यथा चेति । समयः संकेतः । यद्यपि तद्रूपत्वादभिधानतत्सापेक्षा तथापि संबंधाभिप्रायः समयशब्दः । यद्वाभिधानजन्यं ज्ञानं संकेतापेक्षा ज्ञानापेक्षेत्यर्थः । मुख्यार्थबाधस्तद्योगः प्रयोजनं चेति त्रयमित्यर्थः । ननु तर्ह्यभिधातो भेदो न स्यादत आह । अत एवेति । यतः संकेतापेक्षाऽतस्तत्सापेक्षा च लक्षणाशक्यसंबंधात्तस्याः । अतः परम्परया लक्षणापि संकेतापेक्षेत्यभिधा तत्पुच्छभूतेत्यर्थः। लक्षणाव्यंजनयोर्भेदकांतरमाह । न चेति॥ तस्य ध्वननस्य असिद्धिं निरस्यति । नचेति ॥ अभिधेति । नानार्थव्यंजनाया भद्रात्मन इत्यादावित्यर्थः । उभयं लक्षणाभिधा । अवाचकेति । अबोधकवर्णा गतोस्तमर्क इत्यादावित्यर्थः ॥ वस्तुतस्तु एकैकदूषणेनैवोभयदूषणाद्रसादेरपूर्वत्वेन तत्र शक्तिग्रहाभावाच्छक्यसंबंधाग्रहणाच्चेतिं । तत्त्वं नेत्रविभागः कटाक्षः । आदिपदादभिनयादितात्पर्यं वाक्यस्य तदर्थे ॥ मूलम् । तत्र च अत्तारात्थेत्यादौ नियतसंबंधः । कस्सवणेत्यादावनियतसंबंधः । विपरीयरए लच्छी वंहंड दूण णाहिकमलत्थं । हरिणो दाहिणणणं रसाउला

निधुवनविलसितम्।अखंडबुद्धिनिर्ग्राह्यो वाक्यार्थ एव वाच्यार्थो
च्यमेव वाचकमिति येऽप्याहुस्तैरप्यविद्यापदपतितैः पदपदार्थक
ना कर्त्तव्यैवेति। तत्पक्षेप्यवश्यमुक्तोदाहरणादौ विध्यादिर्व्यंग्य ए
ननु वाच्यादसंबद्धं तावन्न प्रतीयते।यतः कुतश्चिद्यस्य कस्यचि
स्य प्रतीतिप्रसंगात् ॥ व्याख्या । अत्ता एत्थेति नियतत्वं वाच्य
ग्यप्रतीत्योरेकाधिकरणत्वं द्वयोः पांथनिष्ठत्वात् । कस्सवणेत्य
वनियतत्वं सखीकांताद्यनेकनिष्ठत्वात् ॥ विपरीयेति । विपरीत
लक्ष्मीर्ब्रह्माणं दृष्ट्वा नाभिकमलस्थं हरेर्दक्षिणनयनं रसाकुला झ
ति स्थगयति संबंधसंबद्धं विवृणोति ॥ अत्रहीति। ततस्तेन सं
चेनेत्यर्थः ॥ तत्र चोति । स्थगने सतीत्यर्थः ॥ अनियंत्रणं नि
निधुवनं सुरतमत्र परंपरया व्यंग्यधीरित्यर्थः ॥ अखंडवाक्य
वाक्यार्थे शक्तिरिव व्यंग्योपि शक्तिरिति वेदांतिमतं शंकते । अ
डबुद्धीति । एकमेवाद्वितीयंब्रह्मेत्यादिश्रुतयः शक्यं बोधयन्ति
तथा व्यंग्योपि वाच्य इत्यर्थः ॥ तदुक्तम्।अनवयवमेव वाक्यम
द्यविद्योपदर्शितालीकवर्णपदविभागमस्या निमित्तमिति अ
बुद्धेरन्यत्रापि अविशिष्टमर्यादयानेकशब्दप्रकाशितम् ॥ एकं
दान्तनिष्णातास्तमखंडं प्रपेदिर इति तैरपीति तत्त्वतश्चेद्वाक्
प्यलीकमिति कस्य वाचकत्वम्।अविद्यादशायां तु व्यवहारे भट्टन
गीकारादावापोद्वापाभ्यां पदपदार्थविभागोंगीकार्य एव अन्य
साध्वसाधुव्यवहारो न स्यात् । न स्याच्च वाक्ये तत्तत्पदार्थतत्तत्
धर्धीः।तत्र चोक्तदिशा व्यंग्येऽभिधाद्यसंभवात्सिद्धा व्यंजनेति भा
उक्तेति । निश्शेषेत्यादौ तदंतिकं गतासीति विधिरित्यर्थः॥ अनु
नाद्यो... व्यक्तिविवेककारमहिममतं शंकते । नान्वि

ति व्याप्तत्वेन नियतधर्मनिष्ठत्वेन च त्रिरूपाल्लिंगाल्लिंगिज्ञानमनुमा-नं यत्तद्रूपः पर्यवस्यति ॥ तथाहि । भमधम्मिअवीसत्थो सो सुणहो अज्ज ओमाईदेण गोलाणईकत्थकुंडंगवासिणा दरीयसीहेण ॥ अत्र गृहेश्वनिवृत्त्या भ्रमणं विहितं गोदावरीतीरे सिंहोपलब्धेरभ्रमणमनु-मापयति॥व्याख्यासंबन्धसामान्येऽप्यतिप्रसंगस्तुल्योऽत आह॥प्रति वंधेति।प्रतिवंधो व्याप्तिः॥पक्षधर्मतामाह।द्वंद्वान्ते श्रुतस्य त्वशब्दस्य प्रत्येकमन्वयः।नियतत्वेन धर्मिनिष्ठत्वेन चेत्यर्थः ॥ विपक्षासत्त्वेन सपक्षसत्त्वेन चेत्यर्थः। अत एवोक्तं त्रिरूपादिति । पक्षसत्त्वसपक्षस-त्त्वविपक्षासत्त्वधर्मत्रययुतादित्यर्थः ॥ अबाधितत्वस्य सर्वप्रमाण-साधारण्यादसत्प्रतिपक्षत्वस्य स्वार्थानुमानेऽनुमानाच्च नाभिधान-म् । अत्रानुमानपदं भावव्युत्पत्त्यानुमितिपरं तद्रूप इति । अनुमि-त्यात्मको व्यंग्यव्यंजकभाव इति पूर्वेणान्वयः ॥ भमधम्मीति । भ्रमणधार्मिकविश्वस्तः स श्वा अद्य मारितस्तेन गोदानदीकच्छ-कुंजवासिना दृप्तसिंहेन पुष्पावचयार्थं स्वसंकेतस्थलं गोदानिकुंजं गच्छंतं विघ्नकारिणं प्रति कस्याश्चिदियमुक्तिः । गोदातीरे सिंहो-पलक्षितभयहेतोः सत्त्वाद्गृह एव तिष्ठ मा गा इति तात्पर्यार्थः।अनु-मानप्रकारमाह। अत्रेति । गृहे भ्रमणमभ्रमणमनुमापयतीत्यन्व-यः। यद्यपि गृहे भ्रमणं गोदातीरे न भ्रमणाभावमनुमातुमीष्टे व्य-धिकरणत्वात्तथापि व्याप्तिग्रहोपयिकत्वेनेदमुक्तं श्वनिवृत्त्या गृहे विहितं भ्रमणं तद्धेतुकं कल्पते।तेनैवं व्याप्तिः।यद्यद्भीरुभ्रमणं तत्त-द्भयकारणाभावज्ञानपूर्वकमिति । गोदेति। अत्र हेतुः सिंहोपलब्धे इति । एवं च प्रयोगः। गोदातीरं भीरुभ्रमणयोग्यं भयकारणवत्त्वा-त्सिहादिमत्त्वाद्वा यन्नैवं तन्नैवं यथा गृहमिति भ्रमणाभावानुमि-

अत्रोच्यते । भीरुरपि गुरोः प्रभोर्वा निदेशेन प्रियानुरागे
चैवंभूतेन हेतुना सत्यपि भयकारणे भ्रमतीत्यनैकांतिको
शुनो बिभ्यदपि वीरत्वेन सिंहान्न बिभेतीति विरुद्धोऽपि गो
तीरे सिंहसद्भावः प्रत्यक्षादनुमानाद्वा न निश्चितोऽपि तु वचना
वचनप्रामाण्यमस्ति । अर्थेनाप्रतिबंधादित्यसिद्धश्च तत्कथमे
द्धेतोः साध्यसिद्धिः । तथा निःशेषच्युतेत्यादौ गमकतय
चंदनच्यवनादीन्युपात्तानि तानि कारणांतरतोऽपि संभवं
अतश्चात्रैव स्नानकार्यकारित्वेनोक्तानीति नोपभोग एव प्रा
नीत्यनैकान्तिकत्वं व्यक्तिवादिनाधमपदसहायानामेव व्यंज
क्तं न चात्राधमत्वं प्रमाणप्रतिपन्नमिति कथमनुमानं तत्व
विधादर्थादेवंविधोऽर्थ उपपत्त्यनपेक्षितत्वे सति प्रकाश
व्यक्तिवादिनः पुनरदूषणम् ॥ व्याख्या ॥ व्याप्तिं दर्शयितुमा
दिति । व्यापकविरुद्धेति । भीरुभ्रमणस्य व्यापिकाभयक
रणाभावोपलब्धिस्तद्विरुद्धं भयकारणं तदुपलब्धिरित्यर्थ
व्यतिरेकव्याप्तिमुक्तां दूषयति । उच्यते इति । एवं हि परस्
प्तिरभिमता यत्र भीरुभ्रमणायोग्यत्वाभावः किं तु भीरुभ्र
ग्यत्वं तत्र भयकारणाभाव इति सा चायुक्ताबलात्प्रभुनिदे
भीरुभ्रमणस्य भयकारणेऽपि दर्शनेन व्यभिचारादिति
अन्येन निधिलाभादिनेत्यर्थः । शुनो बिभ्यदिति स्प
द्बिभ्यादित्यर्थः । यदि धार्मिकः शूरोऽभिप्रेतस्तत्र गोदातीरं
मणायोग्यं भयहेतुमत्त्वात्सिंहवत्त्वाद्वेत्युच्येत तदा साध्याभा
त्वाद्विरुद्धतेति भावः । यदि तु भयकारणवत्त्वं सिंहवत्त्वं
त्वया प्रयुज्येते तदा स्वरूपासिद्धिरपीत्याह । गोदावरीति

स्थलांतरेऽपि व्यभिचारादनुमानं निरस्यति।तथेति॥कारणं संभोग-भिन्नं स्नानादि तस्मादित्यर्थः।प्रतिबद्धानि व्याप्तानि तर्हि व्यभिचारे व्यंजनापि कथं तत्राह । व्यक्तीति ॥ व्यक्तिर्व्यंजना । अस्तु ममाप्यधमपदसहकारेणानुमानमत आह । न चेति ॥ ततश्च पूर्ववत्संवित्तिसिद्धिरिति भावः।ननु व्यंजनापक्षेऽप्येष दोषोऽत आह।एवमिति। तत्र व्याप्तेरनंगत्वेन संभावनामात्रादेव तत्प्रतीतेर्न चातिप्रसंगः। वक्त्रादिवैशिष्ट्यस्य नियामकत्वात् । यस्त्वर्थसंदेहे व्यंग्यधर्मीति तत्स्ववासनया प्रतीतिकलहे एव विश्राम्यतीति तत्त्वमिति व्यंजनावृत्तिसाधनम् ॥ अथ संक्षेपतो वक्ष्ये समस्यापूरणे विधिम् । अत्रादौ विशदाः पंच प्रोच्यंते कारिका यथा ॥ कल्पादिसिंधुलघुभिर्गुरुता युगान्तदूरावलोकगुरुभिर्लघुता विधेया । विष्णोरधोमुखतया प्रतिबिंबतश्च स्याद्वैपरीत्यमुदकादिषु जन्मता च ॥ अयमर्थः । कल्पस्यादिः कल्पादिः सृष्टिसमयः । सिंधुः समुद्रः । लघुः क्षुद्रपदार्थः । एतैर्हेतुभूतैर्वस्तुनो गुरुता विधेया कल्पनीया। सृष्टौ हि स्रष्टा महावयववानेव निर्मिमीते स्म पदार्थान् । कालक्रमेण सर्वे दुर्बला अभूवन् । सामुद्रिकद्रव्येषु शाश्वतिक एवातिरेकः । लघ्वपेक्षया ततोऽधिकस्यापि महिमा नियोज्यः । युगान्तादिहेतुभिर्लघुता कल्पनीया । युगान्तसमये हि सर्वं लघु भवति । दूरे दृश्यमानाः पदार्था अतिक्षोदीयांस इव भासंते । गुर्वपेक्षयाऽप्येवमाकलनीयम् ॥ उदाहरणानि यथा । कल्पादिकाले गुरुदेहदेश्या पिपीलिका राजति शैलतुल्या । तदा लघीयानपि गंडशैलः श्रीखंडशैलस्य तुलां तनोति॥सिंधुना यथा । अहो पयोराशिनिवासियादौ पिपीलिका राजति शैलतुल्या । सदा

कुंभिसन्निभा ॥ स्थले स्थिता यावन्तो जीवास्तावंतो जले
संतीति बोध्यम् ॥ ते ते च सर्वे निर्वासितखर्वभावाः स्व
देव ॥ लघुभिर्यथा । कृमिप्रमाणेन महत्तमांगी पिर्पालिका
शैलतुल्या ।यस्मादधोधः परिदर्शनेन सदा लघूनामपि गौरव
लिक्षालक्षाग्रतः कीटकोटिः करिवरायते । विंध्याद्रिमुद्रा
मत्तेभः कलभाग्रतः ॥ अथ गुरुपदार्थस्य युगांतेन दूरावलो
च गुरुभिर्लघुता विधेया । यथा । कल्पांतकालकवलीकृतस
गोत्रो बिभर्ति सुतरां परमाणुरूपम् ॥ संवर्त्तपूर्वसमये विभरा
यो जातरूपधरणीधरसन्निभत्वम्। विश्वम्भरास्थितपदार्थसमी
त्कस्वर्ल्लोकमार्गचरखेचरकामिनीनाम् ॥ अभ्यागतो नय
महाचलोऽ यं सत्यं बिभर्त्ति परमाणुसमानरूपम्॥कल्पांतका
णीधरणप्रवृद्धलोकाधिराजतनुमानविलोकनेन ॥ शैलो वि
परमाणुसमत्वमेव सर्वस्य लाघवमहो गुरुसन्निधौ स्यात् । प
णुतनोरग्रे कीटिका वारणायते॥ वारणोऽतिसुवर्णाद्रिमानतः व
कायते । महाद्रिशिखरस्थायी वारणः कीटिकायते ॥ साधुनि
नुमानेन महाद्रिः कीटिकायते ॥ इत्यादिगुरुतरपदार्थेन गुरु
र्थस्य लघुता विधेया ॥ विष्णोरधोमुखतया वैपरीत्यं यः
कालि याहि ग्रहव्यग्रे यमुनायां जगन्निधौ । झंपयाधोमुखं
विपरीतं जगत्त्रयम् ॥ अपरेणापि प्रकारेण विपरीते कृते वृ
तदुदरवर्तिजगत्त्रयमध्यस्थितः सर्वोऽपि पदार्थो विपरीतो भवा
प्रतिबिंबतो वैपरीत्यं यथा । तडागे दर्पणप्राये प्रतिबिंबादजाय
जलशय्याकृतः कृष्णप्रासादः कलशोपरि । हन्त स्वल्पाब्धिसं

न्तर्जातार्कप्रतिबिंबतः। शंक्यते शत्रुकांताभिः किमुदेति रविद्वयम्॥ चंद्रांधकाररविकीर्तिकुकीर्तिसंध्यारागाभिसंगकृतवर्णविपर्ययेण । दृष्टांतबद्धयदिशब्दतया पुराणैर्वात्सल्यशोकमधुघातवियोगमादौ॥ स्वप्नेंद्रजालकमतिभ्रमचित्रमायामंत्रौषधीमणितपःपदभंगभावात् । शौर्यस्त्रवांछितमनोगतिपुण्यदेवप्रश्नोत्तरक्षयसमासविभिन्नसाध्यात्। श्रीहाटकेश्वरजगत्प्रलयग्रहास्तपाथोधिमंथसमयप्रतिबिंबभावैः।संग्रामलक्ष्यपुरचंदनशस्त्रपातैश्चंडीशपद्मगुरुताभिरथोपमानैः ॥ यद्युघंटं भवति तत्प्रकटं पटीयानौचित्यचिंतितपदं परिद्युर्य्य कुर्य्यात्॥पूर्वोक्तपद्यगदितैरुपदेशभावैरेतैरिति स्म कविकल्पलताकृदाह ॥ अथोदाहरणानि ॥ रक्तकृष्णादयो वर्णाश्चंद्रेण श्वेताः क्रियंते। यथा । उल्लसत्तुहिनज्योतिर्द्युतिविद्योतितोऽभितः। कैलासशैलसंकाशः कासते विंध्यभूधरः ॥ जपापुष्पं जातिसमं सुवर्णं रजतप्रभम्॥ सुधाकरकरस्पर्शाद्भाति चंदनवन्मसी ॥ अंधकारेण यथा। कैलासो विंध्यसंकाशः कर्पूरः कज्जलप्रभः। जपा तापिच्छगुच्छश्रीस्तमसा भाति लिम्पता ॥ कृष्णश्वेतादयो वर्णा बालार्केण प्रथमं रक्तास्तदनु पीताः क्रियन्ते । यथा । कज्जलं कुंकुमच्छायं जातीपुष्पं जपासमम् । सुवर्णं पद्मरागश्रि प्रभातार्कप्रभावृतम् ॥ इत्थमन्यत्रापि वर्णविपर्ययः कार्य्यः॥ यदा पुनश्चंद्रादीनामेव वर्णविपर्ययाश्चिकीर्षितस्तदा कीर्त्त्यादिभिरेव तेषामपि वर्णविपर्ययः कार्यः । स्वर्धुनीसलिलसंनिभस्फुरत्तावकीनघनकीर्त्तिमंडलैः । विस्तृतैस्त्रिजगति क्षमापते शीतरश्मिरिव लक्ष्यते रविः ॥ अन्यवस्तूनां यथा। मेदिनीदयित तावकैर्यशःसञ्चयैरुपचितैः समंततः । क्षीरनीरनिधिसोमकोमलैर्लक्ष्यते रजतकांतिकज्जलम् । हिमादिसदृशो मेरुर्भाति

ण्यजलवाहकांतिभिश्श्यामलो जयति यामिनीपतिः ॥ अन्य
नामपि यथा॥मेदिनीदयित तावकद्विषत्प्रोन्मिषद्गुरुतरायशः
अंधकारनिकरैरिवोद्धतैः कुंकुमं मृगमदायतेतराम् ॥हिमाद्रि
बंधुश्रीः स्वर्णं मरकतप्रभम् । धराधर तव द्वेषि कुकीर्तिप्रसरै
संध्ययोर्यथा ॥ पूर्वभूधरशिरस्तटीचरः सांध्यरागपटलैः परी
दृश्यतामिह विभावरीमुखे विद्रुमप्रतिनिधिः सुधानिधिः ॥ वि
रुणबिंबौष्ठप्रभापाटलितद्युतिः । वदने तव तन्वंगि कर्पूरः कुंकु
ते ॥ कांतकायपरवामलोचनालोचनांतविततारुणद्युतौ । सां
गपटले सति क्षणं कज्जलं जयति कुंकुमोपमम् ॥ रूप्यं सिन्दू
भं कर्पूरं पद्मरागरुक् ॥ जपाकुसुमसंकाशैः सांध्यरागभरैरभूत्
र्णांतरसंगाद्यथा ॥ शशिमुकुटललाटे शैलजागंडपालीविगलि
गनाभिव्यक्तघर्मांबुसिक्तः । समजनि नरकारिश्श्यामलो यामि
जगति मलिनसंगात्को न मालिन्यमेति ॥ मसृणघुसृणपंकप्रां
भंगिजाग्रत्कुचकलशविलासैः कुंदचंद्रोज्ज्वलोऽपि । अगमदरु
वं कामिनीकंठहारो जगति भवति रागो रागिसंगान्न कस्य॥
धरपातिपुत्रीमौक्तिकव्यक्तभंगीनिलयवलयमालाकांतिजालाव
हिमरुचिरुचिरासीन्नीलकंठस्य कंठो भवति विमलयोगान्नि
न कस्य ॥ अत्रोच्चैः स्फूर्जदभ्रंलिहगृहवडभिवियर्वदूर्य्यानिय्य
तिर्जातप्रयातव्यतिकरविधुरीभूतशोभाभिभूतः । कालिंदी
कांतिः समजनि रजनीजीवितस्याधिनाथो धत्ते को वा कर
नपि न हि मलिनासंगतः कज्जलत्वम् ॥ अहो राहुग्रहग्रस्तसम
ज्ज्वलमंडलः । इंदुः कज्जलबिंदुश्रीर्म्लानिः कस्य न विप्लवे ॥
तवद्धयादिशब्दतया यथा॥प्रतीच्यां यदि मार्त्तण्डः समुदेति

अहर्पतिमहःशुष्कात्सागराद्धूलिरुत्थिता ॥ अतुच्छवत्सवात्सल्य-
पिच्छलीभूतचेतसा॥जनन्या मन्यतेऽत्यर्थं व्याघ्रः सौम्यवपुः क्षमी।
शोकेन मधुनाघाते न वियोगे न मादने ॥ नवा समस्या पूर्य्यते
शोकादिभिर्व्याप्तचेता हि विपरीतमाचरति। शोकव्याप्तितचेता
वा आत्मानं मन्यते मृतम्।मद्यपा मदिरामेव गंगां वदति मानवः।
शस्त्राघातयुतो भूमिमाकाशमिव मन्यते ॥ वियोगार्त्तो जनः स्त्रा-
णुं मानुषत्वेन पश्यति । मत्तो नग्नोऽप्यनग्नमात्मानं मन्यते भृ-
शम् ॥ इति स्वप्नेऽघटमानमपि घटते भोज्याभिषेककलाकुश-
लस्वप्ने दृष्टमिदं त्वं विचारयेत्यादि कल्पनीयम् । इंद्रजालेन मति-
भ्रमेण चित्रेण चाद्भुतमपि भोश्चित्रकर ईदृग्दृष्टं चित्रं लिखेति
वाक्यं । रचनीयं माययापि विसदृशं भाव्यं मणिमंत्रमहौषधीनां च
प्रभावेण सर्वसाध्यं यस्मादचिंत्यो हि महिमा मणिमंत्रमहौषधीनां
तपसापि सर्वं साध्यते यतः। सर्वं हि तपसा साध्यं तपश्च दुरति-
क्रमम् ।पदभंगेन यथा॥ मृगार्तिसहः पलायते॥मृगमत्तीति विशेषणं
पलाय मांसाय ते तव अयं मृगः समायातिमृगार्तिसहः पलायते।
ततो वेगात्पलायस्व त्वरितस्त्वरितैः पदैः॥शौर्य्येण स्वेन वांछितेन
मनोगत्या पुण्येन दुर्घटमपि घटते देवप्रसादेनासाध्यमपि साध्य-
ते ॥ यथा ॥ निःश्रीकोऽपि विभो विभातसमये पश्यत्यवश्यं पु-
मान्यस्ते पद्मसमानमाननमसौ स्यादिन्दिरामन्दिरम् । देवोल्लासि
किमु स्तुमस्तव पदं यस्य प्रसादाज्जनो मूको जल्पति संशृणोति
बधिरः पंगुर्नरीनृत्यते ॥ १ ॥ प्रश्नोत्तरेण यथा ॥ कस्तूरी जायते
कस्मात्को हंति करिणां कुलम्। किं कुर्यात्कातरो युद्धे मृगार्तिसहः
पलायते ॥ समस्यायां यत्साध्यं पदं तत् क्षयसमासेन भिन्नं क्रि-
यते समासस्य ... [illegible]

ताभ्रे ॥ इंदोर्नृप द्वेंषितमोवितानसूर्योदये रोदिति चक्रवाकी
पूरस्य पूरः पुंजस्तस्य च्छव्या सह वादविद्यासंवावदूका प्रति
र्थीत्ताहृशी या द्युतिस्तया शुभ्रितानि श्वैत्यं नीतान्यभ्राणि
तस्मिन् । इन्दोरुदये सूर्यानवोढा चक्रवाकी कोकी
द्वेंषिण एव तमांसि तेषां विगतस्तानो विस्तारो
एताहृश रोदिति वियोगभीतेः हाटकेश्वरनमस्कारेण
र्गलोकावतारः जगतः प्रलयेन मर्त्यलोकावतारः । ग्रह
न नभोलोकावतारः ॥ यथा ॥ हाटकेश्वरयात्रायां शिव
महोत्सवे । सुरेन्द्राादिभिरायातैः स्वर्गः पातालमाययौ ॥ ज
लयकालेऽसौ पृथ्वी पातालमाययौ । संहारघोरचंडीशकोपाटोप
त्वरत् ॥ कदाचिच्चारभेदेन क्रमादस्तमुपागतैः । ग्रहैः संभ
सम्यग्ययौ व्योम रसातलम् ॥ पाथोधिमथनारंभसंभेदाद्देवनाग
पृथिव्यां स्वर्गपाताले दृश्येते स्म समागते ॥ दर्पणप्रातिमोह
पयःपूरे सरोवरे । प्रतिबिंबच्छलादेतद्भुवि व्योम समागतम् ॥
मधीरवीराणां विलोकनकुतूहलात् । समायातैः सुरेन्द्राद्यैः
नभसि दृश्यते ॥ आकाशान्तरसञ्चारि हरिश्चंद्रपुरच्छलात् ।
स्य मिलनायैव जगाम धरणीं नभः । श्रीरामरावणरणे कपिभिं
न शस्त्रीकृतैर्मलयजद्रुमचक्रवालैः । रिङ्गद्भुजङ्गमकुलैः प
स्फुरद्भिः संभाव्यते नभसि सर्पपुरं प्रसर्पत् ॥ श्रीकण्ठकण्ठदोर्द
जटाश्रोत्राहिमंडलैः । अहो पातालोकोऽयं स्वर्लोककलिताश्र
अभ्रंलिहगृहव्यूहचंद्रशालाविलासिभिः । नरनारीगणैरेव मर्त्यल
द्युलोकगः ॥ सुमेरुशिखरप्रांतस्फुरद्दिव्यवधूमुखैः । परितः स्फुर
शंके शतचंद्रं नभस्तलम् ॥ युद्धक्रुद्धभटच्छिन्नकुंभिकुंभस्थलोद्

भिया बहु नोद्धाट्यते इत्यलम् ॥ अथ च नीतिशास्त्रमपि मन्वादिभिः सूत्रितं कामंदकादिभिः प्रणीतं तत्संधिविग्रहादिभेदैरनेकधा । संधिश्च विग्रहं चैव यानमासनमेव च । द्वैधीभावं संश्रयं च षड्गुणांश्चितयेत्सदेति श्रीमानवोक्तेः।तत्रोभयानुग्रहार्थं हस्त्यश्वरथहिरण्यादिनिबंधनेनावाभ्यामन्योन्यस्योपकर्त्तव्यमिति नियमबंधः संधिः। विग्रहं वैरम्।यानं शत्रुं प्रति गमनम्।तदुपेक्षणमासनम्। स्वार्थसिद्धये स्वबलस्य द्विधाकरणं द्वैधीभावः। शत्रुपीडितस्य प्रबलतरराजांतराश्रयणं संश्रयः। गुणानुपकारकान्सदा चिंतयेत्। यद्गुणाश्रयणे सत्यात्मन उपचयः परस्यापचयस्तं गुणमाश्रयेदिति भावः। एषां भेदास्तु श्रीमनुना सप्तमाध्याये प्रपंचितास्ते चात्र विस्तरभिया नोक्ताः॥ अथ लेशेन राजनीतिमपि वदामः॥धार्मिकं पालनपरं सम्यक्परपुरंजयम् ॥ राजानमभिमन्यंते प्रजापतिमिव प्रजाः ॥ १ ॥ पर्जन्य इव भूतानामाधारः पृथिवीपतिः ॥ विकलेऽपीह पर्जन्ये जीव्यते न तु भूपतौ ॥ २ ॥ प्रजां संरक्षति नृपः सावर्द्धयति पार्थिवम् ॥ वर्द्धनाद्रक्षणं श्रेयस्तन्नाशेन सदप्यसत्॥३॥आत्मानं प्रथमं राजा विनयेनोपपादयेत् ॥ ततोऽमात्यांस्ततो भृत्यांस्ततः पुत्रांस्ततः प्रजाः ॥ ४ ॥ राज्ञि धर्मिणि धर्मिष्ठाः पापे पापाः समे समाः॥ लोकास्तदनुवर्त्तंते यथा राजा तथा प्रजाः ॥ ५ ॥ नृपाणां च नराणां च उभयोस्तुल्यमूर्तिता॥ आधिक्यं तु क्षमा धैर्यमाज्ञा दानं पराक्रमः ॥ ६ ॥ सदानुरक्ताकृतिश्च प्रजापालनतत्परः॥ विनीतात्मा हि नृपतिर्भूयसीं श्रियमश्नुते ॥ ७ ॥ प्रजा न रंजयेद्यस्तु राजा रक्षादिभिर्गुणैः ॥ अजागलस्तनस्येव तस्य जन्म निरर्थकम् ॥ ८॥ अजामिव प्रजां हन्याद्यो मोहात्पृ-

दग्ध्वा विनिवर्त्तते ॥१०॥ यथा बीजांकुरः सूक्ष्मः प्रयत्नेनाभि
तः ॥ फलप्रदो भवेत्काले तद्वल्लोकः सुरक्षितः ॥ ११ ॥ हिर
न्यरत्नानि स्त्रियश्च गजवाजिनः ॥ तथान्यदपि यत्किञ्चित्प्र
स्यान्महीपतेः ॥ १२ ॥ उत्खातान्प्रतिरोपयन्कुसुमितांश्चि
घून्वर्द्धयन्नत्युच्चान्नमयन्पृथूंश्चलघयन्विश्लेषयन्संहितान् ॥ क्षु
टकिनो बहिर्नियमयन्स्वान्त्रोपितान्पालयन्मालाकार इव प्रयो
पुणो राजा चिरं तिष्ठति ॥ १३ ॥ अकृत्वा निजदेशस्य रक्ष
विजिगीषते ॥ स नृपः परिधानेनावृतमौलिः पुमानिव ॥ १
अनंतरमरिं विद्यादरिसेविनमेव च ॥ अरेरनंतरं मित्रमुद
तयोः परम् ॥ १५ ॥ विजिगीषोर्नृपस्यानन्तरितं चतुर्दिशम
प्रकृतिं जानीयात्तथा तत्सेविनमप्यरिमेव विद्यात् । अरेर
विजिगीषोर्नृपस्यैकानन्तरं मित्रप्रकृतिं विद्यात्तयोररिमित्रये
विजिगीषोरुदासीनं प्रकृतिं विद्यादित्यर्थः॥तान्सर्वानभिसंदध्य
मादिभिरुपक्रमैः॥व्यस्तैश्चैव समस्तैश्च पौरुषेण नयेन च ॥
निर्विषोऽपि यथा सर्पःफटाटोपो भयंकरः ॥ तथाडंवरवान्रा
परैरभिभूयते ॥ १७॥ पुष्पैरपि न योद्धव्यं किं पुनर्नि
शरैः। जये भवति संदेहः प्रधानपुरुषक्षयः ॥ १८ ॥ भूमिर्मित्रं
ण्यं वा विग्रहस्य फलत्रयम् ॥ नास्त्येकमपि यद्येपा न तत
त्कथंचन ॥ १९ ॥ सामैव हि प्रयोक्तव्यमादौ कार्यं विजानत
साम्ना सिद्धानि कार्याणि विक्रियां यांति न क्वचित् ॥ २०
विश्वसेदमित्रस्य मित्रस्यापि न विश्वसेत् ॥ विश्वासाद्भयमु
मूलान्यपि निकृंतति ॥२१॥ शपथैः संधितस्यापि न विश्वासं
द्रिपोः ॥ राज्यलोभोद्यतो वृत्रः शक्रेण शपथैर्हतः ॥२२॥ उप

पि संवृद्धः कुरुते भस्मसाद्वनम् ॥ २४ ॥ कौर्मं संकोचमास्थाय प्रहारानपि मर्षयेत्॥कालेकाले च मतिमानुत्तिष्ठेत्कृष्णसर्पवत्२५॥ तावद्भयाद्विभेतव्यं यावद्भयमनागतम् ॥ आगतं तु भयं दृष्ट्वा प्रहर्त्तव्यमभीतवत् ॥ २६ ॥ परोऽपि हितवान्बंधुर्बंधुरप्यहितः परः ॥ अहितो देहजो व्याधिर्हितमारण्यमौषधम् ॥ २७॥ यच्छक्यं ग्रसितुं ग्रासं ग्रसितं परिणमेच्च यत् ॥ हितं च परिणामे स्यात्तदाद्यं भूतिमिच्छता ॥ २८ ॥ मा तात साहसं कार्षीर्विभवैर्गर्वमागतः॥स्वगात्राण्यपि भाराय भवंति हि विपर्यये॥२९॥मा त्वं तात बले स्थित्वा बाधिष्ठा दुर्बलं जनम्॥न हि दुर्बलदग्धानां कुले किंचित्प्ररोहति ॥ ३० ॥ यानि मिथ्याभिभूतानां पतंत्यश्रूणि रोदताम् ॥ तानि संतापकान्घ्नन्ति सपुत्रपशुबांधवान्॥३१॥ब्राह्मणेषु च ये शूराः स्त्रीषु जातिषु गोषु च ॥ वृन्तादिव फलं पक्वं धृतराष्ट्र पतंति ते ॥ ३२ ॥ देवब्रह्मस्वपुष्टानि सैन्यानि पृथिवीपतेः ॥ युद्धकाले विशीर्य्यन्ते सैकतास्सेतवो यथा॥३३॥प्रणीतश्चाप्रणीतश्च यथाग्निर्दैवतं महत् ॥ एवं विद्वानविद्वांश्च ब्राह्मणो दैवतं महत् ॥३४॥ अदेवं देवतं कुर्युर्दैवतं चाप्यदैवतम्॥ ब्राह्मणा लोकपालांश्च सृजेयुश्चातिकोपिताः॥३५॥युगे युगे च ये धर्म्मास्तेषु धर्मेषु ये द्विजाः॥तेषां निंदा न कर्तव्या युगरूपा हि वै द्विजाः ॥ ३६ ॥ आक्रम्य ब्राह्मणैर्भुक्तं परिक्षीणैश्च बांधवैः ॥ गोभिश्च नृपशार्दूल राजसूयाद्विशिष्यते ॥ ३७ ॥ गतश्रीश्च गतागतश्रीर्गणकान्द्वेष्टि गतायुश्च चिकित्सकान् ॥ गतश्रीश्च गतायुश्च ब्राह्मणान्द्वेष्टि भारत ॥ ३८ ॥ बुद्धौ कलुषभूतायां विकारे प्रत्युपस्थिते ॥ अनयोऽनयसंकाशो हृदयान्नापसर्पति ॥ ३९ ॥ न कालः खड्गमुद्यस्य शिरः कृंतति कस्यचित् ॥ कालस्य बलमेतावद्

संपदामग्रमारूढोऽस्मीति विश्वसीः ॥ दुरारूढपरिभ्रंशविनि
तिदारुणः॥४२॥कितवा यं प्रशंसंति यं प्रशंसंति चारणाः॥
यं नटा मल्लाः स पार्थ पुरुषाधमः ॥४३॥ राजानो यं प्रशंसां
शंसंति वै द्विजाः ॥ साधवो यं प्रशंसंति स पार्थ नृप उच्यते
प्रज्ञागुप्तशरीरस्य किं करिष्यंति संहताः ॥ गृहीतच्छत्रहस्त
रिधारा इवारयः॥४५॥ बहूनामप्यसाराणां समुदायोऽस्ति
राज्ञा भृत्याः प्रकर्त्तव्या ये हि सर्वक्रियाक्षमाः ॥ ताडितो
क्तोऽपि खंडितोऽपि महीभुजा॥४६॥न चिंतयति यः पापं स
र्हो महीभुजाम् ॥ योऽनाहूतः समभ्येति द्वारे तिष्ठ
दा॥ पृष्टः सत्यं मितं ब्रूयात्स भृत्योऽर्हो महीभुजाम्॥ ४७
स्यं मुखरं क्रूरं स्तब्धं व्यसनिनं वशम् ॥ असंतुष्टमभक्तं
भृत्यं नराधिपः ॥ ४८ ॥ रिक्ताः कर्मणि पटवस्तृप्तास्त्व
वन्ति ये भृत्याः ॥ तेषां जलौकसामिव पूर्णानां रिक्तत
॥ ४९ ॥ क्रूरं व्यसनिनं लुब्धमप्रगल्भमथाकुलम् ॥ मूर्खम
र्त्तारं नाधिपत्ये नियोजयेत्॥५०॥नियोगिभिर्विना राज्यं ना
हि केवले ॥ तस्मादमी विधातव्या रक्षितव्याः प्रयत्नतः ।
वेदवेदांगतत्त्वज्ञो जपहोमपरायणः ॥ आशीर्वादपरो नित्यमे
पुरोहितः ॥ ५२ ॥ क्रमागतो हितमतिः सर्वभावपरीक्षकः॥
थोक्तवादी च एष दूतो विधीयते ॥ ५३ ॥ प्रवीणो वाक्प
न्स्वामिभक्तश्च नित्यशः ॥ अलुब्धः सत्यवादी च एष श
खकः ॥ ५४ ॥ मेधावी वाक्पटुर्धीरो लघुहस्तो जितेंद्रियः
शास्त्रपरिज्ञाता एष लेखक उच्यते॥५५॥इंगिताकारतत्त्वज्ञो
न्प्रियदर्शनः ॥ समयज्ञः स्वामिभक्तः प्रतीहारः स उच्यते ।

काणाः कुब्जाश्च षण्ढाश्च तथा वृद्धाश्च पंगवः ॥ एते स्वांतःपुरे नित्यं नियोक्तव्याः क्षमाभृता ॥ ५८ ॥ सिद्धान्नमिव राजेंद्र सर्वसाधारणाः स्त्रियः ॥ परोक्षे च समक्षे च रक्षितव्याः प्रयत्नतः ॥ ५९ ॥ सूक्ष्मेभ्योऽपि प्रसंगेभ्यः स्त्रियो रक्ष्या हि सर्वदा ॥ द्वयोर्हि कुलयोः शोकमावहेयुररक्षिताः ॥ ६० ॥ धर्मशास्त्रार्थ-कुशलाः कुलीनाः सत्यवादिनः ॥ समाः शत्रौ च मित्रे च नृपतेः स्युः सभासदः ॥ ६१ ॥ न सा सभा यत्र न संति वृद्धा न ते वृद्धा ये न वदंति धर्मम् ॥ नासौ धर्मो यत्र नैवास्ति सत्यं न तत्सत्यं यच्छलेनानुविद्धम् ॥ ६२ ॥ सभा वा न प्रवेष्टव्या वक्तव्यं नासमंजसम् ॥ अब्रुवन्विब्रुवन्वापि नरः किल्बिषम श्नुते ॥ ६३ ॥ तस्मात्सभ्यः सभां गत्वा रागद्वेषविवर्जितः ॥ वचस्तथाविधं ब्रूयाद्यथा न नरकं व्रजेत् ॥ ६४ ॥ पिता माता गुरुर्भ्राता भार्या पुत्रः पुरोहितः ॥ नादण्ड्यो नाम राज्ञोऽस्ति स्वधर्मे यो न तिष्ठति ॥ ६५ ॥ अवध्यो ब्राह्मणो बालः स्त्री तपस्वी च रोगवान् ॥ क्रियन्ते व्यंगिता ह्येते ततो दोषैर्न लिप्यते ॥ ६६ ॥ न तु हन्यान्महीपालो दूतं कस्यांचिदापदि ॥ दूतान्हत्वा तु नरक-माविशेत्साचिवैः सह ॥ ६७ ॥ विशोधयेन्महीपालो मंत्रशालामशे-षतः ॥ अयुक्तो नार्हति स्थातुमस्यां मंत्ररहस्यावित् ॥ ६८ ॥ मंत्रतंत्रार्पितप्रीतिर्देशकालोचितस्थितिः ॥ यश्च राज्ञि भवेद्भक्तः सोऽमात्यः पृथिवीपतेः ॥ ६९ ॥ अन्तःसारैरकुटिलैः सुस्निग्धैः सुपरीक्षकैः ॥ मंत्रिभिर्धार्यते राज्यं सुस्तंभैरिव मंदिरम् ॥ ७० ॥ नर-पतिहितकर्त्ता द्वेष्यतां याति लोके जनपदहितकर्त्ता मुच्यते पार्थि-वेन्द्रैः ॥ इति महति विवादे वर्त्तमाने समाने नृपतिजनपदानां दुर्लभः

कर्त्तव्यः कदाचन ॥ षट्कर्णेषु च करणाद्भूपोऽभूद्विक्षुकः पुर
अत्रेयमाख्यायिका ॥ कश्चिन्नृप एकेन निजपरमसेवकेन योगि
गत्वा परकायावेशविधिं योगिनं ययाचे । योगिना सेवाप्रीतः
निजभृत्यमितो निष्कास्य शृण्विति बहुधोक्तोऽपि तेन सहैव
तावुभावेव समं तद्विधिं विजज्ञतुः । एवं स्थिते कदाचित्तत्प
पालितः कीरो मृतिमाप । सा च बहुधा विललाप । तद्रा
भृत्येन सार्द्धमेव नृपोंतःपुरमाप । ताञ्चाह कीरमृतिविह्वलां
पटुतरं कीरसहस्रं ते दास्याम्यतः कः शोकावसरः । सा च
मेव मह्यं पूर्वदर्शितयोगविद्यया मुहूर्त्तं जीवय पुनरेतु मृतिं
नृपस्तां बोधयन्नपि बोधयितुं न शशाक । ततो निजदेहं
कीरे प्रविश्य तं जीवयामास । तदा तूर्णमेव राज्यभोगलोभे
विवेको नृपदेहं स भृत्यो विवेश । शुकश्च पंजराद्विससर्ज्ज
तत्रैव विधवापुत्रं विप्रं मृतं दृष्ट्वा तन्मातरमतीव शोकाकुल
कीरदेहं त्यक्त्वा विप्रात्मजवपुः प्रविश्य तं जीवयामास । रा
विष्टेन तद्भृत्येन सर्वत्र शुकमारणमज्ञापि । तदा राज्यो मंत्र्य
विरुद्धचेष्टं मत्वा नायं नृप इति मेनिरे । राज्ञोऽन्वेषणार्थं
पुरांतरेषु च सत्राणि कृतानि । तत्र च समागतविदेशिजन
खनार्थं लेखका अपि न्यस्तास्तद्वृत्तं च पट्टराज्ञी नित्यं शृणो
एकदा नृपतिरेव विप्रांगाविष्टात्मा सत्रमाप्य षट्कर्णेषु न
इत्यादिश्लोकं पपाठ । लेखकस्तं राज्यै श्रावयामास । पुन
श्रुत्वा झटिति स्त्रीवेषिणं तं विधाय मत्पार्श्वमानयेति लेखकं
च । स तथैव कृतवान् । सा च पूर्ववदेकं चटकेंद्रं मार
सशोच । तत्रागतस्तां सांत्वयितुमागतस्तदर्शनतया

चटकं ममर्देति शिष्टाः ॥ अथ प्रकृतमनुसरामः ॥ हन्यादेकं न वा हन्यादिषुर्मुक्तो धनुष्मता ॥ बुद्धिर्बुद्धिमता क्षिप्ता हंति राज्यं सनायकम् ॥ ७४ ॥ न तद्रथैर्न नागेन्द्रैर्न हयैर्न च पत्तिभिः ॥ कार्यं संसिद्धिमभ्येति यथा बुद्धया प्रसाधितम् ॥ ७५ ॥ दुर्योधनः समर्थोऽपि दुर्मंत्री प्रलयं गतः॥राज्यमेकं चकारोच्चैस्सुमंत्री चंद्रगुप्तकः ॥७६॥ अशृण्वन्नापि बोद्धव्यो मंत्रिभिः पृथिवीपतिः॥ तथा स्वदोषनाशाय विदुरेणांबिकासुतः ॥ ७७ ॥ पृष्टो ब्रूते मितं ब्रूते परिणामे सुखावहम् ॥ मंत्री चेत्प्रियवक्ता स्यात्केवलं स रिपुः स्मृतः ॥ ७८ ॥ सुलभाः पुरुषा राजन्सततं प्रियवादिनः ॥ अप्रियस्य च पथ्यस्य वक्ता श्रोता सुदुर्लभः ॥ ७९ ॥ दुर्गाणि राज्ञा कार्याणि सजलाग्निदृढानि च ॥ द्रव्यमन्नं च तेष्वेव स्थापनीयं प्रयत्नतः ॥ ८० ॥ दुर्गं बहुविधं ज्ञेयं पर्वतस्य जनस्य च॥प्राकारस्य वनस्यापि भूमेरपि भवेत्क्वचित् ॥८१॥ न गजानां सहस्रेण न लक्षेणैव वाजिनाम्॥तथा सिध्यन्ति कार्याणि यथा दुर्गप्रभावतः॥८२॥ विषहीनो यथा सर्पो मदहीनो यथा गजः ॥ सर्वेषां वश्यतां याति दुर्गहीनस्तथा नृपः ॥८३ ॥ शतमेको वशं धत्ते दुर्गस्थो हि धनुर्धरः ॥ तस्माद्दुर्गं प्रशंसंति नीतिशास्त्रविदो जनाः ॥ ८४ ॥ एकः शतं योधयते प्राकारस्थो धनुर्द्धरः ॥ शतं सहस्राणि तथा सहस्रं लक्षमेव च ॥ ८५ ॥ त्रिविधाः पुरुषा राजन्नुत्तमाधममध्यमाः ॥ नियोजयेत्तथैवैतांस्त्रिविधेष्वेव कर्मसु ॥ ८६ ॥ तुल्यार्थं तुल्यसामर्थ्यं मर्मज्ञं व्यवसायिनम्॥अर्द्धराज्यहरं भृत्यं यो न हन्यात्स हन्यते॥८७॥ निर्विशेषं यदा राजा समं भृत्येषु तिष्ठति ॥ तत्रोद्यमसमर्थानामुत्साहः परिहीयते ॥ ८८ ॥ प्रसादो निष्फलो यस्य क्रोधो यस्य नि-

च्च कृतनाशकम् ॥ ९० ॥ सदवनमसुजनशासनमाश्रितभरणं
पचिह्नानि ॥ छत्रचमरवाद्यानि मृतजनमपि केऽपि कुर्वंति ॥ ९
आश्रितान्पालयेन्नित्यं पारंपर्य्यगतान्ध्रुवम् ॥ यश्चाश्रितपरित्
स राजा केन कथ्यते ॥ ९२ ॥ आश्रितास्त्रिविधाः प्रोक्ता भृत्य
प्राश्च बंधवः ॥ न तांस्त्यजेद्विपन्नोऽपि ब्राह्मणांश्च विशेषतः ॥९
अविवेकिनि भूपाले नश्यंति गुणिनां गुणाः ॥ प्रवासरसिके
यथा वध्वास्स्तनोन्नतिः॥चित्तोत्साहः पुरंध्रीणां सति पत्यौ न
॥ ९४ ॥ शास्त्रश्रवणपाठादिहीनो नरपतिस्तु यः ॥ सोऽविवे
संप्रोक्तः पाखंडनिरतस्तु यः ॥ ९५ ॥ वेदाः सांगाः पुराणानि
रतं चागमानि च ॥ रामायणं धर्मशास्त्रं यदन्यच्छ्रुतिसंमतम्॥
एतच्छास्त्रमिति प्रोक्तमशास्त्रं यदतोऽन्यथा ॥ यद्वृत्तं न हि वे
तत्पाखंडमितीरितम्॥९७॥पाखंडिनः स्वीयराज्याद्राजा निवा
त्सदा ॥ तेनैहिकं सुखं भुक्त्वा राजेंद्रपदमश्नुते ॥ ९८ ॥ किं
किं शुकाः कुर्युः फलितेऽपि बुभुक्षिताः ॥ अदातारि समृद्धेऽ
कुर्युरुपजीविनः ॥ ९९ ॥ सेवया धनमिच्छद्भिस्सेवकैः पश्य य
तम् ॥ स्वातंत्र्यं यच्छरीरस्य मूढैस्तदपि हारितम् ॥ १०
वाचा सत्यं सदा ब्रूयात्प्रतिश्रुत्य न वै चलेत् । वाचा विचलित
सुकृतं तेन हारितम्॥१०१॥ माता पिता च तस्यैव जातिद्व
न्विते॥विज्ञेयो यो न मनुते शास्त्रमार्षं पृथग्जनः ॥ १०२ ॥ वि
दैवतान्वृद्धाञ्छास्त्राणि यो न मानयेत् ॥ नैवात्र संशयः का
भवेद्वर्णसंकरः ॥ १०३ ॥ वरं वनं फलं भैक्ष्यं वरं भारोपजीव
पुंसां विवेकहीनानां सेवया न धनार्जनम् ॥ १०४ ॥ जीवन्तं
मृताः पञ्च व्यासेन परिकीर्त्तिताः ॥ दरिद्रो व्याधितो मूर्खः प्र

रोऽपि सेव्यः स्याद्धंसाकारैः सभासदैः ॥ हंसाकारोऽपि संत्याज्यो गृध्राकारैः सभासदैः ॥ १०७ ॥ चक्रं सेव्यं नृपः सेव्यो न सेव्यः केवलो नृपः ॥ यस्य चक्रस्य माहात्म्यं मृत्पिंडः पात्रतां गतः ॥ ॥ १०८ ॥ गंतव्या राजसभा द्रष्टव्या राजपूजिता लोकाः ॥ यद्यपि न भवंत्यर्थास्तथाप्यनर्था विनश्यंति ॥ १०९ ॥ अत्यासन्ना विनाशाय दूरतश्चाफलप्रदाः ॥ मध्यभावेन सेव्यंते राजा वह्निगुरू स्त्रियः॥११०॥आसन्नमेव नृपतिर्भजते मनुष्यं विद्याविहीनमकुलीनमसंगतं वा॥प्रायेण भूमिपतयः प्रमदा लताश्च यः पार्श्वतो भवति तं परिवेष्टयंति ॥१११॥ यस्मिन्नेवाधिकं चक्षुरारोपयति पार्थिवः ॥ कुलीनो वाऽकुलीनो वा स श्रियो भाजनं भवेत् ॥ ११२ ॥ धवलान्यातपत्राणि वाजिनश्च मनोरमाः ॥ सदा मत्ताश्च मातंगाः प्रसन्ने सति भूपतौ ॥ ११३ ॥ राजमातरि देव्यां च कुमारे मुख्यमंत्रिणि ॥ पुरोहिते प्रतीहारे समं वर्तेत राजवत् ॥ ११४ ॥ यत्राहवेषु युद्ध्यंते स्वाम्यर्थमपराङ्मुखाः ॥ विकटैरायुधैर्यांति ते स्वर्गं योगिनो यथा ॥ ११५ ॥ पदानि क्रतुभिस्तुल्यान्याहवेष्वनिवर्त्तिनाम् ॥ राजा सुकृतमादत्ते हतानां विपलायिनाम् ॥११६॥ तवाहं वादिनं क्लीबं निहंति परसंगतम् ॥ न हन्याद्विनिवृत्तञ्च युद्धे प्रक्षीणतां गतम् ॥ ११७॥ द्विजा अपि न गच्छंति यां गतिं चैव योगिनः ॥ स्वाम्यर्थं संत्यजन्प्राणांस्तां गतिं यांति सेवकाः॥११८॥ राजा तुष्टो हि भृत्यानां मानमात्रं प्रयच्छति ॥ तेऽपि संमानमात्रेण प्राणैः प्रत्युपकुर्वते ॥ ११९ ॥ सारासारपरीवेत्ता स्वामी भृत्यस्य दुर्लभः ॥ अनुकूलः शुचिर्दक्षः प्राणैर्भृत्योऽपि दुर्लभः ॥१२०॥ अतितेजस्व्यपि नृपः पानासक्तो न साधयत्यर्थान्॥ तृणमपि दग्धु-

नृपः कामासक्तो गणयति न कार्यं न च हितं यथेष्टं
दश्चरति किल मत्तो गज इव ॥ ततो मानाध्मातः प
यदा शोकगहने तदामात्ये दोषान् क्षिपति न निजं वेत्त्य
॥१२३॥गुणवदगुणवद्वा कुर्वता कार्यजातं परिणतिरवधार्या
पंडितेन ॥ अतिरभसकृतानां कर्मणामाविपत्तेर्भवति हृ
शल्यतुल्यो विपाकः ॥ १२४ ॥ आयाच्चतुर्थभागेन व्ययव
र्त्तयेत् ॥ प्रभूततैलदीपो हि चिरं भद्राणि पश्यति ॥ १२
र्थानामर्जनं कार्यं वर्द्धनं रक्षणं तथा ॥ भक्ष्यमाणो निरायैश्च
रुरपि हीयते ॥ १२६ ॥पञ्चधा विभजान्वित्तमिहामुत्र च म
धर्माय यशसेऽर्थाय आत्मने स्वजनाय चेति ॥ १२७ ॥
मनसा वाचा चक्षुषा च चतुर्विधम् ॥ प्रसादयति
यस्तं लोकोऽनुप्रसीदति ॥ १२८ ॥ संभोजनं संकथनं
ऽथ समागमः ॥ ज्ञातिभिः सह कार्याणि न विरोधः
॥ १२९ ॥ संहतिः श्रेयसी राजन्विगुणेष्वपि बंधुषु ॥
परित्यक्ता न प्ररोहंति तंडुलाः ॥ १३० ॥ मृदोः परिभव
वैरं तीक्ष्णस्य नित्यशः ॥ उत्सृज्य तद्द्वयं तस्मान्मध्यां वृ
श्रयेत् ॥ १३१ ॥ अबुद्धिमाश्रितानांच क्षंतव्यमपराधिना
हि सर्वत्र पांडित्यं सुलभं पुरुषे क्वचित् ॥ १३२ ॥ ते
क्षमोपेते नातिकर्कशमाचरेत् ॥ अतिनिर्मथनादग्निश्चंदना
यते ॥ १३३ ॥ किमप्यसाध्यं महतां सिद्धिमेति लघ
प्रदीपो भूमिगेहान्तर्ध्वांतं हंति न भानुमान् ॥ १३४ ॥ अ
चितं कार्यमातिथ्यं गृहमागते ॥ छेत्तुमप्यागते छायां नो
द्रुमः ॥ १३५ ॥ हंतुमेवोपसर्पति मृगेंद्रः संकुचन्नपि ॥ बु

स्तथाविधा न संवृतांगान्निशिता इवेषवः ॥ १३७ ॥ कोऽहं कौ देशकालौ समविषमगुणाः केऽरयः के सहायाः का शक्तिः कोऽभ्युपायः फलमिह च कियत्कीदृशी दैवसंपत् ॥ संपत्तौ को निबंधः प्रविदितवचनस्योत्तरं किं नु मे स्यादित्येवं कार्यसिद्धावहितमनसां सम्पदो हस्तसंस्थाः ॥ १३८ ॥ धर्मः प्रागेव चिंत्यः सचिवगतमती सर्वदालोचनीये प्रच्छाद्यौ रागरोषौ मृदुकठिनरसौ योजनीयौ च काले ॥ ज्ञेयं लोकानुवृत्तं वरचरनयनैर्मण्डलं वीक्षणीयमात्मा यत्नेन रक्ष्यो रणशिरसि पुनः सोपि नापेक्षणीयः ॥ १३९ ॥ ऋतौ विवाहे व्यसने रिपुक्षये यशस्करे कर्मणि मित्रसंग्रहे ॥ प्रियासु नारीष्वधनेषु बंधुषु धनव्ययस्तेषु न गण्यते बुधैः ॥ १४० ॥ स्वाम्यमात्यश्च राज्यञ्च कोशं दुर्गं बलं सुहृत् ॥ एतावदुच्यते राज्यं सत्वबुद्धिव्यपाश्रयम् ॥ १४१ ॥ संधिविग्रहयानानि संस्थितिः संश्रयस्तथा ॥ द्वैधीभावश्च भूपानां षड्गुणाः परिकीर्त्तिताः ॥ १४२ ॥ उत्साहस्य प्रभोर्मंत्रस्यैवं शक्तित्रयं जगुः ॥ आत्मनः सुहृदश्चैव तन्मित्रस्योदयास्त्रयः ॥ १४३ ॥ सामदानभेददंडा इत्युपायचतुष्टयम् ॥ हस्त्यश्वरथपादाताः सेनांगं स्याच्चतुष्टयम् ॥ १४४ ॥ दुष्टाविनीतशत्रूणां भयकृद्बंधुसन्निभम् ॥ शस्त्रधारणमोजस्यं रक्षोविद्युद्ग्रहापहम् ॥ १४५ ॥ वर्षानिलरजोघर्महिमादीनां निवारणम् ॥ राज्यलक्ष्मीगृहं वर्ण्यं चक्षुष्यं छत्रधारणम् ॥ १४६ ॥ चामरं श्रीकरं दिव्यं राज्यशोभाकरं परम् ॥ सिंहासनं सुखैश्वर्यकरं लोकानुरंजनम् ॥ १४७ ॥ सुमनोवररत्नानां धारणं दिव्यरूपकृत् ॥ पापालक्ष्मीप्रशमनं चंदनाद्यनुलेपनम् ॥ १४८ ॥ स्नानं [illegible] मनःप्रसादजननं दुःस्वप्ननिर्नाशनं शौचस्यायतनं

तांबूलं मुखरोगनाशनिपुणं संवर्द्धनं तेजसो नित्यं जाठरव जननं दुर्गंधदोषापहम् ॥ वक्त्रालंकरणं प्रहर्षजननं पात्रे रणे कामस्यायतनं समुद्भवकरं लक्ष्म्याः सुख दम् ॥ १५० ॥ देवतातिथिविप्राणां पूजनं पापना लोकद्वयेऽपि सुखकृद्दानधर्मयशस्करम् ॥ १५१ ॥ सुतभृ रिस्वामिसद्गुरुदैवते ॥ एकैकोत्तरतो वृद्धया श्रीशब्दायः ॥१५२॥ अनुगंतुं सतां वर्त्म कृत्स्नं यदि न शक्यते ॥ स्व नुगंतव्यं मार्गस्थो नावसीदति ॥ १५३ ॥ प्रत्यहं प्रत्यवेक्षे रितमात्मनः ॥ किन्नु मे पशुभिस्तुल्यं किन्नु सत्पुरुषैरिति सद्भिरेव सहासीत सद्भिः कुर्वीत संगतिम् ॥ सद्भिर्विवादं मैः सद्भिः किंचिदाचरेत् ॥१५५॥ न द्विषंति न याचंते परनिं वंते ॥ अनाहूता न गच्छंति तेनाश्मानो हि देवताः ॥ १५ तो नास्ति मूर्खत्वं जपतो नास्ति पातकम्॥मौनिनः कलह न भयं चास्ति जाग्रतः॥ १५७॥ गतेऽपि वयसि ग्राह्या वि त्मना बुधैः॥यद्यपि स्यान्न फलदा सुलभा साऽन्यजन्मनि यदीच्छसि वशीकर्त्तुं जगदेकेन कर्मणा ॥ परापवादसस्यं चरंतीं निवारय ॥१५९॥ वाङ्माधुर्याद्याति लोके प्रियत्वं रुष्याद्याति लोकेऽप्रियत्वम् ॥ किं तद्द्रव्यं कोकिलेनोप वा लोके गर्दभस्यापराधः ॥ १६० ॥ यस्य चाप्रियमन्वि कुर्यात्सदा प्रियम् ॥ व्याधा मृगवधं कर्त्तुं गीतं गायंति ॥ १६१ ॥ प्रहरिष्यन्प्रियं ब्रूयात्प्रहृत्यापि प्रियोत्तरम् ॥ स्य शिरश्छित्त्वा रुद्याच्छोचेत्तथापि च ॥ १६२ ॥ नालस वन्त्यर्थान्न शठा न च मायिनः ॥ न च लोकरवाद्भीता न

कृतेऽपि न हि सिध्यति कोऽत्र दोषः ॥ १६४॥ उद्यमेनैव सिध्यंति कार्याणि न मनोरथैः ॥ न हि सुप्तस्य सिंहस्य प्रविशंति मुखे मृगाः ॥ १६५ ॥ उत्थाय हृदि लीयंते ह्यलसानां मनोरथाः ॥ बालवैधव्यदग्धानां कुलस्त्रीणां कुचा इव ॥ १६६ ॥ नोदन्वानर्थितामेति न चांभोऽपि प्रपूर्य्यते ॥ आत्मा तु पात्रतां नेयः पात्रमायांति संपदः ॥ १६७ ॥ विद्यते न स हि कश्चिदुपायः सर्वलोकपरितोषकरो यः ॥ सर्वथा स्वहितमाचरणीयं किं करिष्यति जनो बहुजल्पः ॥ १६८ ॥ काकतालीययोगेन यदनात्मवति क्षणम् ॥ करोति प्रणयं लक्ष्मीस्तदस्यास्त्रीत्वचापलम् ॥ १६९ ॥ यो यमर्थं प्रार्थयते तदर्थं घटते च यः॥अवश्यं तदवाप्नोति न चेच्छान्तो निवर्त्तते ॥ १७० ॥ मित्रस्वजनबन्धूनां बुद्धेर्धैर्यस्य चात्मनः ॥ आपन्निकषपाषाणे नरो जानाति सारताम् ॥ १७१ ॥ दुःस्थैरपि निजैरेव प्रावृतं शोभतेऽखिलम् ॥ जीर्णाबरेणापि वृतं हट्टे कार्प्पटमर्हति ॥ १७२ ॥ चिंतनीया हि विपदामादावेव प्रतिक्रिया । न कूपखननं युक्तं प्रदीप्ते वह्निना गृहे ॥ १७३ ॥ वरं दारिद्र्यमन्यायप्रभवाद्विभवादिह ॥ कृशताभिमता देहे पीनता न तु शोफतः ॥ १७४ ॥ गावो दूरप्रचारेण हिरण्यं लाभलिप्सया ॥ स्त्री विनश्यति रूपेण ब्राह्मणो राजसेवया ॥ १७५ ॥ अतिदानाद्बलिर्बद्धो नष्टो मानात्सुयोधनः ॥ विनष्टो रावणो लौल्यादति सर्वत्र वर्जयेत् ॥ १७६ ॥ हास्येन यादवा नष्टा हास्येनैव च कौरवाः ॥ हास्येन रावणो नष्टस्तस्माद्धास्यं विवर्जयेत् ॥ १७७ ॥ धनमस्तीह वाणिज्ये किञ्चित्तत्कर्षणेऽपि च ॥ सेवया किञ्चिदस्तीह भिक्षायां नैव किंचन ॥१७८॥ स्पृशन्नपि गजो हंति जिघ्रन्नपि भुजंगमः ॥ हसन्न-

नाः ॥ १८० ॥ सपक्षो लभते काको वृक्षस्य विविधं फलम् ॥
क्षहीनो मृगेन्द्रोऽपि भूमिसंस्थो निरीक्षते ॥ १८१ ॥ सपक्षो
भते लक्ष्यं गुणमुक्तोऽपि मार्गणः ॥ न लक्ष्यं हि विपक्षश्चेद्गु
रापूर्य्यते यदि ॥ १८२ ॥ युक्तियुक्तं प्रगृह्णीयाद्बालादपि वि
क्षणः ॥ रवेरविषये वस्तु किन्न दीपः प्रकाशयेत् ॥ १८३ ॥ कि
वा मधुरं वा प्रस्तुतवचनं मनोहारि ॥ वामे गर्दभनादश्चित्तप्री
प्रयाणेषु ॥ १८४ ॥ समयप्रोक्ता वाणी गुणगणरहिताऽपि शो
पुंसाम् ॥ रतिसमये रमणीनां भूषाहानिस्तु भूषणं भव
॥ १८५ ॥ वृथा वृष्टिं समुद्रेषु वृथा तृप्तस्य भोजनम् ॥ वृ
दानं धनाढ्यस्य वृथा षंढे विभूषणम् ॥ १८६ ॥ अज
द्धमृषिश्राद्धं प्रभाते मेघडंबरम् ॥ दंपत्योः कलहश्चैव परिणामे
किंचन ॥ १८७ ॥ सप्तैतानि न पूर्य्यंते पूर्य्यमाणान्यपि क्वचि
ब्राह्मणोऽग्निर्यमो राजा समुद्रमुदरं गृहम् ॥ १८८ ॥ वस्त्रं ग
बहुक्षीरां जलपात्रमुपानहौ ॥ औषधं बीजमाहारं संक्रीणीत यथ
यात् ॥ १८९ ॥ अर्थनाशं मनस्तापं गृहे दुश्चरितानि च
मानं चैवापमानञ्च मतिमान्न प्रकाशयेत ॥ १९० ॥ अवृ
त्यजेद्देशं वृत्तिं सोपद्रवां त्यजेत् ॥ त्यजेन्मायाविनं मित्रं
प्राणहरं त्यजेत् ॥ १९१ ॥ सौहृदेन परित्यक्तं निस्स्नेहं
वत्त्यजेत् ॥ सोदरं भ्रातरमपि किमुतान्यं पृथग्जनम् ॥ १९२ ॥
न्निमित्तं भवेल्लोके त्रासो वा दुःखमेव वा ॥ आयासो वा यतो
तदेकांगमपि त्यजेत् ॥ १९३ ॥ त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे
त्यजेत् ॥ ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ॥ १९४ ॥
त्येकेन पादेन तिष्ठत्येकेन पंडितः ॥ नासमीक्ष्य परं स्थानं पूर्व
... ॥ १९५ ॥ न गणस्याग्रतो गच्छेत्सिद्धे

पंच यत्र न विद्यंते न तत्र दिवसं वसेत् ॥ धनिकः श्रोत्रियो राजा नदी वैद्यस्तु पंचमः ॥ १९७ ॥ अनायके न वस्तव्यं न वसेद्बहुनायके ॥ आत्मनः शांतिमन्विच्छन्न वसेद्बालनायके ॥ १९८ ॥ गुरुलाघवमर्थानां प्रारंभे कर्मणां फलम् ॥ यथावद्यो न जानाति स बालः प्रोच्यते बुधैः ॥ १९९ ॥ जन्मना ब्राह्मणो ज्ञेयः संस्काराच्च द्विजो भवेत् ॥ वेदाभ्यासाच्च विप्रः स्यात्त्रिभिः श्रोत्रिय उच्यते ॥२००॥ सर्वे यत्र विनेतारः सर्वे पंडितमानिनः ॥ सर्वे महत्त्वमिच्छंति तद्वृंदमवसीदति ॥ २०१ ॥ नहीदृशं च सबलं त्रिषु लोकेषु विद्यते ॥ दया मैत्री च भूतेषु दानं च मधुरा च वाक्॥२०२॥विवादो धनसंबंधो याचनं स्त्रीषु संगतिः ॥ आदानमग्रतः स्थानं मैत्रीभंगस्य हेतवः ॥ २०३ ॥ बालसखित्वमकारणहास्यं स्त्रीषु विवादमसज्जनसंगम् ॥गर्दभयानमसंस्कृतवाचं विजहि षडेताँल्लघुताहेतून् ॥ २०४॥ दर्शितानि कलत्राणि गृहे सुत्तमशंकितम्॥कथितानि रहस्यानि सौहृदं किमतः परम् ॥२०५॥ न मातरि न दायादे न सौदर्येषु बंधुषु ॥ विश्रंभस्तादृशः पुंसां यादृङ्मित्रे निरंतरम् ॥ २०६ ॥ शोकदुःखारातित्राणं प्रीतिविश्रंभभाजनम् ॥ केन रत्नमिदं सृष्टं मित्रमित्यक्षर द्वयम् ॥ २०७ ॥ दुःखेन श्लिष्यते भिन्नं श्लिष्टं दुःखेन भिद्यते ॥ मित्रश्लिष्टा तु या प्रीतिः सा दुःखैकप्रदायिनी ॥ २०८ ॥ ययोरेव समं वित्तं ययोरेव समं कुलम् ॥ तयोर्मैत्री विवाहश्च न तु पुष्टविपुष्टयोः ॥ २०९ ॥ चिबुके यस्य रोमाणि न वक्षसि न गंडयोः ॥ तेन मैत्री न कर्त्तव्या यदि निर्मानुषं जगत् ॥ २१० ॥ सरलयोः सखिसख्यमुदाहृतं तरलयोर्घटनैव न जायते ॥ यदि भ-

स्य जन्म निरर्थकम् ॥ २१२ ॥ परोपकारशून्यस्य धिङ्मनुष्
जीवितम् ॥ जीवंति पशवो येषां चर्माप्युपकरिष्यति ॥ २१
यज्जीव्यते क्षणमपि प्रथितैर्मनुष्यैर्विज्ञानविक्रमयशोभिरभग्नमा
तन्नामजीवनफलं प्रवदंति संतः काकोऽपि जीवति चिरं च
मेव भुंक्ते ॥ २१४ ॥ अधिकारपदं प्राप्य नोपकारं करोति
अकारस्तत्र लुप्येत कस्य द्वित्वं प्रजायते ॥ २१५ ॥ किं
जातु जातेन मातुर्यौवनहारिणा ॥ आरोहति न यः स्वस्य वंश
ग्रं ध्वजो यथा ॥ २१६ ॥ अजातमृतमूढेभ्यो मृतोऽजातः
वरम् ॥ यतस्तौ स्वल्पदुःखाय यावज्जीवं जडो दहेत् ॥ २१
न पुत्रः पितरं द्वेष्टि स्वभावात्स्वस्य रेतसः ॥ ब्राह्मणानां हि
षी जायतेऽन्यस्य रेतसः ॥ २१८ ॥ यस्सुतः पितरं द्वेष्टि त
द्यादन्यरेतसः ॥ यस्तु नारायणं द्वेष्टि तं विद्यादन्यरेतसः ॥२
किं कुलेन विशालेन शीलमेवात्र कारणम् ॥ कृमयः किं न ज
कुसुमेषु सुगंधिषु ॥ २२० ॥ न पुत्रत्वेन पूज्यंते गुणैरासाद्य
दम् ॥ रवेर्व्यापारमादत्ते प्रदीपो न पुनः शशी ॥ २२१ ॥ अ
मातुलैः ख्याताः श्वशुराच्चाधमाधमाः ॥ उत्तमा आ
ख्याताः पित्रा ख्यातास्तु मध्यमाः ॥ २२२ ॥ ज्येष्ठो भ्राता
समो मृते पितरि सर्वदा ॥ सर्वेषां वृत्तिदाता स्यात्स ह्येता
पालयेत् ॥ २२३ ॥ कनिष्ठास्तं नमस्येरन्सर्वे छंदानुवर्त्तिनः ।
व पुत्रा जीव्येरन्यथैव पितरं तथा ॥ २२४ ॥ विभागे च स
स्ते पितुर्द्रव्यस्य केवलम् ॥ लघोः पूर्वतरो यस्तु गुरुः स हि
द्यते ॥ २२५ ॥ ऋणशेषश्चाग्निशेषः शत्रुशेषस्तथैव च ॥
पुनः प्रवर्धेत तस्माच्छेषं न रक्षयेत् ॥२२६॥ कुभोज्येन दि

ते येन योषितः ॥२२८॥ स्त्रियस्तु यः कामयते सन्निकर्षं च गच्छ-ति ॥ ईषत्प्रकुरुते सेवां तं तमिच्छंति योषितः ॥ २२९ ॥ यदैव भर्त्ता जानीयान्मंत्रमूलपरां स्त्रियम् ॥ उद्विजेत तदैवास्याः सर्पाद्वेश्मगतादिव ॥ २३० ॥ जल्पंति सार्द्धमन्येन पश्यंत्यन्यं सविभ्रमम् ॥ हृदये चिंतयन्त्यन्यं न स्त्रीणामेकतो रतिः ॥ २३१ ॥ नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः ॥ नांतकः सर्वभूतानां न पुंसां वामलोचना ॥ २३२ ॥ स्थानं नास्ति क्षणं नास्ति नास्ति प्रार्थयिता नरः ॥ तेन नारद नारीणां सतीत्वमुपजायते ॥ २३३ ॥ सुवेषं पुरुषं दृष्ट्वा भ्रातरं यदि वा सुतम् ॥ योनिः क्लिद्यति नारीणां सत्यं सत्यं हि नारद ॥२३४॥ सा भार्या या प्रियं ब्रूते स पुत्रो यत्र निर्वृतिः ॥ तन्मित्रं यत्र विश्वासः स देशो यत्र जीविका ॥ २३५ ॥ लक्ष्म्या परिपूर्णोहं न भयं ते मोहानिद्वैषा ॥ परिपूर्णस्यैवेंदोर्भवति भयं सिंहिकासूनोः ॥२३६॥अतिपरिचयादवज्ञा संततगमनादनाद-रो भवति ॥ लोकः प्रयागवासी कूपे स्नानं समाचरति ॥ मलये भिल्लपुरंध्रिश्चंदनतरुमिंधनं कुरुते ॥ २३७ ॥ इति वा ॥ सन्निकर्षो मनुष्याणामनादरणकारणम् ॥ गांगं हित्वा यथान्यांभस्तत्रत्यो याति शुद्धये ॥ २३८॥ व्रजत्यधः प्रयात्युच्चैर्नरःस्वैरेव चेष्टितैः ॥ अधः कूपस्य खनक ऊर्ध्वं प्रासादकारकः॥ २३९ ॥ ब्राह्मे मुहूर्ते पुरुषस्त्यजेन्निद्रामतंद्रितः॥ नरं प्रातः प्रबुद्धं हि श्रयति श्रीर्गुणाश्रया ॥२४०॥नोत्तरस्यां प्रतीच्यां च कुर्वीत शयने शिरः॥शय्याविपर्यया द्गर्भो दितेः शक्रेण दारितः॥ २४१ ॥ न कुर्यात्परदारेच्छां विश्वासं स्त्रीषु वर्जयेत्॥हतो दशास्यः सीतार्थे हतः पत्न्या विदूरथः॥२४२॥ न मद्यव्यसनक्षीबः कुर्याद्वार्त्तादिविप्लवम् ॥ वृष्णयो हि ययुः क्षीबा-स्तृणप्रहरणैः क्षयम् ॥ २४३ ॥ दासं न स्वा...

ब्राह्मणान्नावमन्येत ब्रह्मशापोऽतिदुःसहः ॥ तक्षकाग्नौ गतः व
द्ब्राह्मणस्याभिमन्युजः ॥ २४५॥ दंभारंभोद्यतं कर्म नाचरेदिह
ष्फलम् ॥ ब्राह्मणाद्दंभलब्धास्त्रविद्या कर्णस्य निष्फला ॥ २४
न स्त्रीजितः प्रमूढः स्याद्गाढरागवशीकृतः ॥ पुत्रशोकाद्दशरथो
जायाजितोऽत्यजत् ॥ २४७ ॥ क्षिपेद्वाक्यशरान्घोरान्न पार
विषप्लुतान् ॥ वाक्पारुष्यरुषा चक्रे भीमः कुरुकुलक्षयम् ॥ २४
परेषां क्लेशदं कुर्यान्नपैशुन्यं प्रभुप्रियम् ॥ पैशुन्येन गतौ राह
द्राकौं भक्षणीयताम् ॥ २४९ ॥ कुर्य्यान्नीचजनाभ्यस्तां न य
मानहारिणीम् ॥ बलेः प्रार्थनया प्राप लघुतां पुरुषोत्तमः ॥२५
क्रूरैः क्रूरतरैर्लुब्धैर्न कुर्य्यात्प्रीतिसंगतिम् ॥ वसिष्ठस्याऽहर
विश्वामित्रो निमंत्रितः ॥ २५१ ॥ तीव्रे तपसि लीनानामिन्द्रिय
न विश्वसेत् ॥ विश्वामित्रोऽपि सोत्कंठो मेनकावशमागतः ॥ २५
भक्तं रक्तं सदासक्तं निर्दोषं न परित्यजेत्॥रामस्त्यक्त्वा सतीं स
शोकशल्याकुलोऽभवत् ॥२५३॥न क्रोधात्तु विधानस्य भीमाच्छि
द्विधेयताम् ॥ निपीतभ्रातृरुधिरः प्रपानिंदां वृकोदरः ॥ २५४
वर्जयेदिंद्रियजये निर्जने जननीमपि॥ पुत्रीकृतोऽपि प्रद्युम्नः कामि
शंबरस्त्रिया ॥ २५५ ॥ प्रभुप्रसादे विश्वासं न कुर्यात्स्वप्नसंनिभे
नंदेन मंत्री निक्षिप्तः शकटो लोहबंधने ॥ २५६ ॥ न लोकायतवादे
नास्तिकः स्याददैवतः ॥ हरिर्हिरण्यकशिपुं जघान स्तंभनिर्ग
॥ २५७ ॥ अत्युन्नतपदारूढः पूज्यान्नैवापमानयेत् ॥ नहुषः शक्र
तां प्राप्य च्युतोऽगस्त्यापमानतः ॥२५८॥ हितोपदेशं शृणुयात्स
वींत च यथोदितम् ॥ विदुरोक्तमकृत्वाभूत्कौरवः शोकभाजन
॥ २५९ ॥ न प्रजायच्छैश्वर्यं कुर्यादार्यः कथंचन ॥ प्रजाविनप्र

नदीनां च नखीनांच शृंगिणां शस्त्रपाणिनाम् ॥ विश्वासो नैव कर्तव्यः स्त्रीषु राजकुलेषु च ॥ २६२ ॥ न कुर्यादभिचारेच्छां वश्यादिकुहकक्रियाम् ॥ लक्ष्मणेनेंद्रजित्कृत्याभिचारसमये हतः ॥ २६३ ॥ व्याकुलेऽपि महोत्पातैः स्मरेद्विष्णुं सदा हृदि ॥ शरतल्पगतो भीष्मः सस्मार गरुडध्वजम् ॥ २६४ ॥ संदेहो वैष्णवे मार्गे न कार्योऽन्यैः कुदर्शनैः ॥ रामप्रभावमद्यापि पाथोधौ पश्य सेतुताम् ॥ २६५ ॥ अध्वा जरा मनुष्याणामनध्वा वाजिनां जरा ॥ असंभोगो जरा स्त्रीणां मालिन्यं वसनज्वरा ॥ २६६ ॥ अविधेयो भृत्यजनः शठानि चित्राण्यदायकः स्वामी॥अविनयवती च भार्या मस्तकशूलानि चत्वारि ॥ २६७ ॥ दौर्मंत्र्यान्नृपतिर्विनश्यति यतिः संगात्सुतो लालनाद्विप्रोऽनध्ययनात्कुलं कुतनयाच्छीलं खलोपासनात् ॥ मैत्री चाप्रणयात्समृद्धिरनयात्स्नेहः प्रवासाश्रयाद्धीर्धर्माद्यनवेक्षणादपि कृषिस्त्यागात्प्रमादाद्धनम् ॥२६८॥ कोऽर्थान्प्राप्य न गर्वितो विषयिणः कस्यापदोऽस्तंगताः स्त्रीभिः कस्य न खंडितं भुवि मनः को नाम राज्ञां प्रियः ॥ कः कालस्य न गोचरांतरगतः कोर्थी गतो गौरवं को वा दुर्जनवागुरानिपतितः क्षेमेण जातः पुमान् ॥ २६९ ॥ क्लीबे धैर्यं मद्यपे तत्त्वचिंता सर्पे क्षांतिः स्त्रीषु कामोपशांतिः ॥ काके शौचं द्यूतकारे च सत्यं राजा मित्रं केन दृष्टं श्रुतं वा ॥ २७० ॥ मांसं मृगाणां दशनं गजानां मृगद्विषां चर्म फलं द्रुमाणाम् ॥ स्त्रीणां हि रूपञ्च नृणां हिरण्यमेते गुणा वैरिकरा भवन्ति ॥ २७१ ॥ स्तब्धस्य नश्यति यशो विषमस्य मैत्री नष्टक्रियस्य कुलमर्थपरस्य धर्मः ॥ विद्याबलं व्यसनिनः कृपणस्य सौख्यं राज्यं प्रमत्तसचिवस्य नराधिपस्य॥२७२॥

घाते च वित्ताशा मोक्षाशा कौलिके मते ॥ जामातरि च पुत्र
त्रयमेतन्निरर्थकम् ॥ २७४ ॥ राजा घृणी ब्राह्मणः सर्वभक्षी
चावश्या दुष्टबुद्धिः सहायः ॥ प्रेष्यः प्रतीपोऽधिकृतः प्रमादी त
ज्या इमे यश्च कृतं न वेत्ति ॥ २७५ ॥ वैद्यं पानरतं नरं कुपा
स्वाध्यायहीनं द्विजं युद्धे कापुरुषं हयं गतरयं मूर्खं परिव्राजकम्
राज्यं बालनृपं च मंत्ररहितं मित्रं छलान्वेषि यद्भार्यां यौवनगर्वि
पररतां मुञ्चंति ये पंडिताः ॥ २७६ ॥ वृक्षं क्षीणफलं त्यज
विहगाः शुष्कं सरः सारसा निर्द्रव्यं पुरुषं त्यजंति गणिका
नृपं मंत्रिणः ॥ पुष्पं पर्युषितं त्यजंति मधुपा दग्धं वनांतं मृ
सर्वः कार्यवशाज्जनोऽभिरमते कः कस्य वा वल्लभः ॥ २७७
त्यजति भयमकृतपापं मित्रं च शठः प्रमादिनं विद्या॥ह्रीः का
नमलसं श्रीः क्रूरं स्त्री दुर्जनं लोकः ॥ २७८ ॥ द्वाविमौ पु
लोके सुखिनौ न कदाचन ॥ यश्चाधनः कामयते यश्च कुप्यत्य
श्वरः ॥ २७९ ॥ द्वाविमौ पुरुषौ लोके स्वर्गस्योपरि तिष्ठत
प्रभुश्च क्षमया युक्तो दरिद्रश्च प्रतापवान् ॥ २८० ॥ द्वाविमौ
रुषौ लोके न भूतौ न भविष्यतः ॥ प्रार्थितो यश्च कुरुते
नार्थयते नरम् ॥ २८१ ॥ द्वाविमौ पुरुषौ लोके शिरःशूल
परौ॥गृहस्थो यो निरारंभो यतिश्च सपरिग्रहः ॥ २८२॥ द्वावि
वंभसि क्षेप्यौ गाढं बद्ध्वा गले शिलाम् ॥ धनिनं चाप्रदातारं द
चातपस्विनम् ॥ २८३ ॥ संतश्चेदमृतेन किं यदि खलः सत्क
कूटेन किं दातारो यदि कल्पशाखिभिरलं यद्यर्थिनः किं तृणैः
किं कर्पूरशलाकया यदि दृशोः पंथानमेति प्रियः सं
ऽपि सतींद्रजालमपरं यद्यस्ति तेनापि किम् ॥ २८४ ॥ ल

स्वमहिमा यद्यस्ति किं मंडनैः सद्विद्या यदि किं धनैरपयशो यद्य-
स्ति किं मृत्युना ॥ २८५ ॥ मित्रं स्वच्छतया रिपुं नयबलैर्लुब्धं
धनैरीश्वरं कार्येण द्विजमादरेण युवतीं प्रेम्णाऽतितीव्रं स्तवैः ॥
बंधुं क्षांततया गुरुं प्रणतिभिर्मूर्खं कथाभिर्बुधं विद्याभी रसिकं रसेन
सकलं शीलेन कुर्य्याद्वशम् ॥ २८६ ॥ वाजी चारुगतिः शशांकध-
वलं छत्रं प्रियाः पृष्ठतः प्रोत्तुंगस्तनमंडला विजयिनो भृत्याः पुरः
पंचषाः ॥ तांबूलं प्रचुरं सखा स चतुरः संपद्यते चेत्पथि प्राहुस्त-
त्कटकप्रयाणमितरत्प्राणप्रयाणं बुधाः ॥ २८७ ॥ जवो हि सप्तेः
परमं विभूषणं त्रपांऽगनायाः कृशता तपस्विनः॥द्विजस्य विद्या नृ-
पतेरपि क्षमा पराक्रमः शस्त्रबलोपजीविनाम् ॥ २८८ ॥ वासः शुभ्र-
मृतुर्वसंतसमयः पुष्पं शरन्मालती धानुष्कः कुसुमायुधः परिमलः
कास्तूरिकोऽस्त्रं धनुः ॥ वाणी तर्करसोज्ज्वला प्रियतमा श्यामा
वयो नूतनं मार्गः शांभव एव पञ्चमलया गीतिः कविर्बिह्लणः
॥२८९॥शत्रुर्दहति संयोगे वियोगे मित्रमप्यहो॥उभयोर्दुःखदायित्वं
को भेदः शत्रुमित्रयोरित्यलम् ॥ एवमश्वशास्त्रं गजशास्त्रं शिल्प-
शास्त्रं सूपकरणशास्त्रं चतुःषष्टिकलाशास्त्रं चेतिनानाशास्त्रं शोलिहा-
त्रादि नानामुनिभिः प्रणीतं तस्य च सर्वस्य लौकिकतत्तत्प्रयोजन-
भेदो द्रष्टव्यः ॥ एवमष्टादश विद्यास्त्रयीशब्देनोक्तास्तथा सांख्यशा-
स्त्रं भगवता कपिलेन प्रणीतम् ॥ अथ त्रिविधदुःखात्यंतनिवृत्तिर-
त्यंतपुरुषार्थ इति षडध्यायम्।तत्र प्रथमेऽध्याये विषया निरूपिताः।
द्वितीयेऽध्याये प्रधानकार्याणि । तृतीये विषयेभ्यो वैराग्यम्।चतुर्थेऽ-
ध्याये विरक्तानां पिंगलाकुररादीनामाख्यायिका । पंचमे परपक्ष-
निर्जयः।षष्ठे सर्वार्थसंक्षेपः। प्रकृतिपुरुषविवेकज्ञानं सांख्यशास्त्रप्रयो-

निरोधात्मकः समाधिरभ्यासवैराग्यरूपश्च तत्साधनं निरूपितम्। द्वितीयेपादे विक्षिप्तचित्तस्य समाधिसिद्ध्यर्थं यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टांगानि निरूपितानि। तृतीयपादे योगविभूतयश्चतुर्थपादे कैवल्यमिति॥ विजातीयप्रत्ययस्यैव निरोध द्वारेण निदिध्यासनसिद्धिः प्रयोजनम्। तथा पाशुपतं शास्त्रं भगवत पशुपतिना पशुपाशविमोक्षणायाथातः पाशुपतं योगविधिं व्याख्यास्यामइत्यादिपंचाध्यायैर्विवेचितम्॥ तत्राध्यायपंचकेनापि कार्यरूपं जीवः पशुः कारणं पशुपतिरीश्वरो योगः पशुपतौ चित्तसमाधानं विधिर्भस्मना त्रिषवणस्नानादिर्निरूपितो दुःखांतसंज्ञको मोक्षश्च प्रयोजनम् ॥ एत एव कार्यकारणयोगविधिदुःखांता इत्याख्यायंते एवं वैष्णवं नारदादिभिः कृतं पंचरात्रम् ॥ तत्र वासुदेवसंकर्षणप्रद्युम्नानिरुद्धाश्चत्वारः पदार्था निरूपिताः ॥ भगवान्वासुदेवः परमेश्वरः सर्वकारणं तस्मादुत्पद्यते संकर्षणाख्य जीवस्तस्मान्मनःप्रद्युम्नस्तस्मादनिरुद्धोऽहंकारः सर्वे भगवतो वासुदेवस्यांशभूतास्तदभिन्ना एवेति भगवतो वासुदेवस्य मनोवाक्कायवृत्तिभिरभिध्यानं कृत्वा कृतकृत्यो भवतीति निरूपितम् ॥ एवं वैष्णवं मंत्रशास्त्रमखिलमपि पञ्चरात्रांतर्गतमेव ॥ वामागमन्तु शास्त्रबाह्यमेव ॥ तदेवं दर्शितः प्रस्थानभेदः सर्वेषां संक्षेपे त्रिविध एव प्रस्थानभेदस्तत्रारंभवाद एकः परिणामवादो द्वितीयो विवर्त्तवादस्तृतीयः पार्थिवाप्यतैजसवायवीयाश्चतुर्विधाः परमाणवो द्व्यणुकादिक्रमेण ब्रह्मांडपर्यंतं जगदारभंतेऽसदेव कार्यं कारणव्यापारादुत्पद्यते इति तार्किकाणां प्रथमः। मीमांसकानां च सत्त्व रजस्तमोगुणात्मकं प्रधानमेव महदादिक्रमेण जगदाकारेण परिणमते ... कार्यं कारणव्यापारेणाभिव्यज्यते

वैष्णवाः । स्वप्रकाशपरमानंदाद्वितियं ब्रह्म स्वमायावशान्मिथ्यैव जगदाकारेण कल्पते इति तृतीयपक्षो ब्रह्मवादिनां सर्वेषां प्रस्थान-कर्तृणांच । विवर्तवादेच पर्यवसानेनाद्वितीये परमेश्वर एव वेदान्तप्र-तिपाद्ये तात्पर्यं न हि ते मुनयो भ्रान्ताः सर्वज्ञत्वात्तेषां किन्तु बहिर्विषय एव प्रवणानामापाततः परमपुरुषार्थे प्रवेशो न संभव-तीति नास्तिक्यनिवारणाय तैः प्रस्थानभेदा दर्शितास्तत्र तेषां तात्पर्यमबुद्ध्वा वेदविरुद्धेऽप्यर्थे तेषां तात्पर्यमुत्प्रेक्षमाणास्तत्तन्मत-मेवोपादेयत्वेन गृह्णन्तो जना ऋजुकुटिलपथजुषो भवंतीति न सर्वेषामृजुमार्ग एव प्रवेशो न वा पर्यवसानेऽपि परमेश्वरप्राप्तिरंतः-करणशुद्धिवशेन पश्चादृजुमार्गाश्रयणादेव तत्प्राप्तिः । ऋजुमार्गस्तु भागवतधर्माश्रयणमेव सध्रीचीनो ह्ययं पंथा इति श्रीशुकोक्तेः । एष एवाहि लोकानां शिवः पंथाः सनातनः ॥ यं पूर्वे चानुसंतस्थुर्यत्र देवो जनार्दन इति भागवतोक्तेश्च॥यानास्थाय नरो राजन्न स्खलेन्न पतेदिहेति योगेश्वरोक्तेश्च॥तथा च सर्वेषां मार्गाणां साक्षात्परंपरया वा परमात्मैव यथा ऋजुकुटिलपथजुषां सरितां समुद्र एव गम्य इति । यथा ऋजुपथजुषां गंगानर्मदादीनां साक्षादेव समुद्रो गम्यः कुटिलप-थजुषां यमुनासरय्वादीनां गंगाद्वारा समुद्र एव गम्य इति । एवं वेदांतवाक्यश्रवणादिनिष्ठानां साक्षात्त्वंगम्योऽन्येषां तु सांख्यानुया-यिनां तार्किकाणां चतुर्विंशतितत्त्वद्रव्यादिसप्तपदार्थविविक्तात्मज्ञा-नेन मीमांसाधर्म्मशास्त्रेतिहासपुराणानुयायिनां तत्तच्छास्त्रोदितक-र्मानुष्ठायिनामन्तःकरणशुद्धिद्वारा कामशास्त्रानुयायिनां तु विष-यानुभवविरक्तानां वैराग्यद्वाराऽऽयुर्वेदस्य तु तपोयज्ञार्चनादिष्वा-रोग्यस्यैव योग्यत्वेन तत्संपादनद्वारा धनुर्वेदस्य निजधर्मत्वात्क्ष-

व कौन्तेय भजन्तेऽविधिपूर्वकम् 'इति गीतोक्तद्वारा परंपरया वैष्ण-
वत्वद्वारेणैव घंटाकर्णादिषु दृष्टत्वात् ॥ वैष्णवानां तु साक्षादेव नंद-
नंदने परानुरागरूपाद्वैतनिष्ठानां साक्षादेव परमात्मा गम्यस्तथैव
प्रह्लादादिषु दृष्टत्वात् ।साहित्यनिष्ठानामप्युज्ज्वलनीलमण्युक्तप्रका-
रेण परमात्मैव गम्योऽस्तीति ॥ अत एवोक्तं शिवरहस्योक्तमहि-
म्नाख्यस्तवे पुष्पदन्तेनापि 'त्रयी सांख्यं योगः पशुपतिमतं वैष्ण
वमिति प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च ॥ रुचीनां वै
चित्र्यादृजुकुटिलनानापथजुषां नृणामेको गम्यस्त्वमसि पयसामर्ण
इव ॥' इति कृतं प्रपंचेन ॥ प्रकृतमनुसरामः । मातृकागतवर्ण
घटितशब्दस्मृत्यैव ब्रह्मणापि सर्वा सृष्टिरुत्पादिता
तदुक्तं मनुस्मृतौ । सर्वेषाञ्च समानानि कर्माणि च पृ
क्पृथक् । वेदशब्देभ्य एवादौ पृथक्संस्थाश्च निर्ममे ॥ इति
अस्यार्थः । स परमात्मा हिरण्यगर्भरूपेणावस्थितः सर्वेषां नामा
गोजातेर्गौरिति अश्वजातेरश्व इति कर्माणि ब्राह्मणस्याध्ययनादी
क्षत्रियस्य प्रजारक्षादीनि पृथक् पृथक् यस्य पूर्वकल्पे यान्यभू
आदौ सृष्ट्यादौ वेदशब्देभ्य एवावगम्य निर्मितवान् ।भगवता व्य
नाऽपि वेदमीमांसायां वेदपूर्वकैव जगत्सृष्टिर्व्युत्पादिता । तथा
शारीरकसूत्रम् । शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्या
अस्यार्थः । देवानां विग्रहवत्त्वे वैदिके वस्वादिशब्दे देवतावा
विरोधः स्याद्वेदस्यादिमत्वप्रसंगादिति चेन्नास्ति विरोधः । कर
दतः शब्दादेव जगतः प्रभवादुत्पत्तेः । प्रलयकालेऽपि सूक्ष्मरू
परमात्मनि वेदराशिः स्थितः स इह कल्पादौ हिरण्यगर्भस्य
मात्मन एवं प्रथमदेहिमूर्त्तेर्मनस्यवस्थांतरमनापन्नः सुषुप्तप्रबुद्ध
न पान्भवति । तेन प्रदीपस्थानीयेन सुरनरतिर्यगादिप्रविभक्तं

श्रुतिस्मृतिभ्यामित्यर्थः । प्रत्यक्षं श्रुतिरनपेक्षत्वात् । अनुमानं स्मृतिरनुमीयमानश्रुतिसापेक्षत्वात् । तथा च श्रुतिः । एत इति वै प्रजापतिर्देवानसृजतासृग्रमिति मनुष्यानिंदव इति पितॄंस्तिरः पवित्रमिति ग्रहानाशव इति स्तोत्रं विश्वानीति शस्त्रमिति अतिसौभगेत्यन्याः प्रजा इति तथा स मनसा वाचं मिथुनं समभवदिति।अस्यार्थः। एते असृग्रमिंदवस्तिरः पवित्रमाशवः विश्वान्यभिसौभगेत्येतन्मंत्रस्थपदैर्देवादीन्स्मृत्वा ब्रह्मा ससर्ज तत्रैतच्छब्द इंद्रियाधिष्ठातृदेवस्मारकः असृग्रशब्द असृक्शब्दवाच्यरुधिरप्रधानदेहरमणमनुष्यस्मारकः । इंदुमंडलमध्यवर्त्तिपितृस्मारक इन्दुशब्दः । पवित्रं सोमं स्वमध्ये तिरस्कुर्वतां धारयतां ग्रहाणां तिरःपवित्रशब्दः स्मारकः । ऋचोऽशुवतां स्तोत्राणां गानस्वनरूपाणामाशवः शब्दः स्मारकः। विश्वदेवशंसनशस्त्राणां विश्वशब्दः स्मारकः। अभिसौभगेतिशब्दो निरतिशयसौभाग्यवाचकः॥ प्रजानां स्मारक इति सप्रजापतिर्मनसा सह वाचं मिथुनभावं समभवत्समभावयत् । तत्प्रकाशितां सृष्टिं मनसालोचितवानिति यावत् । स्मृतिस्तु सर्वेषां तु सनामानीत्यादिका मन्वादिप्रणीतैव पृथक्संस्थाश्चेति लौकिकीश्चव्यवस्थाः ॥ कुलालस्य घटनिर्माणं कुविंदस्य पटनिर्माणमित्यादिका विभागेन निर्मितवानित्यर्थः । चमत्कारचंद्रिकायां तु पंचभूतग्रहादिसृष्टिरपि मातृकात एवोक्ता पद्यनिर्माणप्रकरणे।तथाहि।वर्णानामुद्भवः पश्चाद्व्यक्तिः संख्या ततः परम् । भूतबीजविचारश्च ततो वर्णग्रहा अपीत्यारभ्य एतत्सर्वमविज्ञाय यदि पद्यंवदेत्कविः ॥ केतकारूढकपिवद्भवेत्कंटकपीडितः॥इति॥कारणात्पञ्चभूतानामुद्भूता मातृका यतः।अतो भूतात्मका वर्णाः पंच पंचविभागतः॥वाय्वग्निभूजलाकाशाः पञ्चाश-

तवर्गोत्थः सुरगुरुः पवर्गोत्थः शनैश्चरः। यवर्गजोऽयं शीतांशुरिति सप्तग्रहाः क्रमादिति॥किंबहुना व्यासादिभिस्तपोयोगबलान्मातृका-त एव तत्तच्छास्त्राण्याविर्भावितानि।तदुक्तम्।तपोयोगप्रभावेण चक्रे वेदविभाजनम् । इतिहासपुराणानि व्यासो नारायणः स्वयम् । गौतमं रूपमास्थाय न्यायशास्त्रं जगौ हरिः । मातृकामेव निर्मथ्य काणादश्च विशेषकम् ॥ मातृकामेव निर्मथ्य धृत्वा जैमिनि रूपकम् । व्यरचत्पूर्वमीमांसां सर्वभूतात्मको हरिः ॥ छन्दःशास्त्र योगशास्त्रं शब्दशास्त्रमथापि वा । पतंजलिर्मुनिर्भूत्वा विचार्य मुहुर्मुहुः॥मातृकामेव व्यवदद्योगमास्थाय नैपुणम् । कापिलं रूप मास्थाय सांख्यं नारायणोऽब्रवीत् ॥ मातृकामेव संवीक्ष्य लोक नां हितकाम्यया । वात्स्यायनेन रूपेण कामशास्त्रं तथा जगौ बहुना किमिहोक्तेन तत्तद्रूपेण माधवः । तत्तच्छास्त्रं तत्र तत्र प्र दुश्चक्रे युगादिषु ॥ मातृकैव चतुर्वेदी सांगोपांगा समीरिता । म तृकैव पुराणानीतिहासश्चैव मातृका । मातृकातो जगज्जातं मा कायां प्रलीयते । यावद्वाग्विषयं तावन्मातृकायां स्थितं पुरा वटबीजाच्च वटवत्प्रादुर्भूतं ततः पुनः। मातृका सर्वकल्पेषु ह्येकै विकृता सदा ॥ न किंचिद्वस्तु विकृतिमेति कल्पांतरेषु वै । सूर चंद्रमसौ धाता यथापूर्वमकल्पयत् ॥ सर्ववस्तुतथात्वे हि श्रु रेवोपलक्षणम् ॥ कालिकापुराणेऽपि । पुरा कल्पे यथा वृत्तं प्र कल्पं तथैव तु । प्रवर्त्तेत इति । तथा ब्रह्मवैवर्त्ते प्रथमेंऽशे प्रति ल्पं कृष्णचरितमेकमेवोततान्यथेति नारदप्रश्ने । प्रतिकल्पं कमेव चरितं नात्र संशयः।इति ब्रह्मण उत्तराच्च मातृकाऽपि सर्व ल्पेष्वेकरूपैव।किञ्चित्कदाचिद्भेदोऽपि भवेत्कल्पांतरे मुन इत्यु मातृकाविकारेषु पुराणादिषु किंचिद्भेदोऽपि भवति।मातृका तु

प्रोक्तं गुरूणां किंचिदेव हि । वंशीधरेण विदुषा खर्डपत्तनवासिना ॥ गौडकौशिकगोत्रेण शास्त्रतत्त्वविदां मुदे । यद्यत्र स्खलितं किञ्चिद्धीमांद्याद्वा प्रमादतः । मय्यल्पज्ञे कृपां कृत्वा विद्वांसः पूरयन्तु तत ॥ किं च॥मातृकापाठनादौ हि पाठयंति क्वचिद्बुधाः । ओंनमः सिद्धमित्येतत्तदर्थस्त्वेष ईर्यते ॥ ओंकोर्थः । ब्रह्मणे सगुणनिर्गुणमूर्त्तये नमो नतिरस्तु। अत्र इतिपदमध्याहृत्य सिद्धपदेन योज्यम् । इह नम इत्युपलक्षणमर्चनादेरपि । अत्रायं भावः । यदिह लोके सगुणपदवाच्या ये भगवतो गुणावतारलीलावतारादयस्तथा निर्गुणपदवाच्यं यत्सच्चिदानंदाद्वितीयं ब्रह्म तेषां तस्य च यथासंभवं नत्यादयो विचारश्च नृभिः क्रियंते चैतदेव सिद्धं सर्वशास्त्रपरिशीलनेनैतदेव सिद्धांतत्वेन निश्चितमिति । तदुक्तम् । वेदे रामायणे चैव पुराणोपपुराणयोः । भारते धर्मशास्त्रे च पांचरात्रादिषु क्रमात् ॥ वर्ण्यते सर्वशास्त्रज्ञैर्ध्येयो नारायणः सदेति ॥ तथा । यत्कीर्त्तनं यत्स्मरणं यदीक्षणं यद्वन्दनं यच्छ्रवणं यदर्हणम् । लोकस्य सद्यो विधुनोति किल्बिषं तस्मै सुभद्रश्रवसे नमो नमः ॥ इति श्रीमुनींद्रोक्तेः । सर्वे वेदा यत्पदमामनंतीति श्रुत्याऽपि सर्वे वेदसिद्धांतत्वेनैतदेव निर्णीतं स्वयं भगवताऽपि वेदैश्च सर्वैरहमेव वेद्य इति वर्णितम् । तथा पृथुचरित्रेऽपि । शास्त्रेष्वियानेव सुनिश्चितो नृणां क्षेमस्य सध्र्यङ्ङ्विमृशेषु हेतुः । असंगमात्मन्यतिरिक्त आत्मनि दृढा रतिर्ब्रह्मणि निर्गुणे च या॥इति सर्वं त्यक्त्वा ब्रह्मण्येव रतिः कार्येति विहितम् ।श्रीकपिलदेवेनाप्युक्तम् । एतावानेव लोकेऽस्मिन्पुंसां निःश्रेयसोदयः। तीव्रेण भक्तियोगेन मनो मय्यर्पितं स्थिरमिति । भक्त्यंगेष्वपि प्रणतेरैहिकामुष्मिकफलदत्वेन मुख्यत्वम् । तदुक्तं भारते । एकोऽपि कृष्णस्य कृतः प्रणामो दशाश्वमे-

लुक् चतुर्थी तु 'नमआदियोगे' इति । 'कर्तृकर्मक्रियादीनां य स्थानं न लभ्यते । अध्याहारं तदा कुर्यान्मुख्यार्थप्रतिपत्तये । इत्यनुशासनादित्यलं प्रपञ्चेन ॥ इति श्रीकौशिकगोत्रगौडवं धरसंगृहीतो मातृकाविलासाख्यो निबन्धः समाप्तिं पफाण श्रीकृ कृपया ॥ श्रीमातृकाविलासाख्या वाक्पुष्पस्रक्समर्पिता । कृ कण्ठे स गृह्णातु श्रीवंशीधरशर्मणा ॥ गोश्रुतिनन्दचंद्राब्दे शुचि ष्णे ज्ञवासरे । समाप्तः सुनिबंधोयं पञ्चम्यां गुर्वनुग्रहात् ॥ श्री

अथ ग्रन्थान्ते स्मरणपथमागतां स्वकृतिं तावदत्रैव निवेदयामः ।

हारबंधोयम्

	प २	
तैः	र	द्मा
	नृ २	
	तं २	
रा	ता २	ह
	रिः १	
	र २	
रो	स	म्यैः
	प २	
	ति २	
रं	यो	र्न
	हि २	
	नि २	
शा	र	द्रा
	व २	
	सं २	
वा	रा	र
	सं २	
	यः २	
यं	व	सं
	श २	

मूलश्लोकश्चाम् ।

पद्मानृतैः परनृतं हरिराततारी रम्यैः परो पतिर्नहिरंति यो हि॥निद्रावशानिरवसं रर सरासं यः संशयंयवशशंकरणेशरीरम् ॥

टीका—एकस्मिन्नवसरे श्रीनारद इंद्रस स्थितं काममिदमाह हे र काम 'रश्चकामे वज्र' इति कोशात् । यो हरिः श्रीकृ पद्मायाः श्रीराधाया नृतैर्नर्तनैः समं परेषां गोपीजनानां नृतम् अंति कोर्थःन अ अमंस्त । इहांति निषेधेऽव्ययम् । तनुध ज्ञानेर्थे बोध्यः।'धातवश्चोपसर्गाश्च निपाता ते त्रयः । अनेकार्थाः स्मृताः सर्वे पाठा निदर्शनाम्॥'इत्युक्तेः।'वैकुंठे या रमा सैव वृंदावने स्मृता' इत्यादिपुराणात् श्री पद्मयोरभेद एव । लक्ष्मीः पद्मालया

किंभूतैः पद्मानृतै रम्यैर्मनोहरैः । किंविशिष्टो हरिः नहिः नह्यंते बध्यंते वाक्तंत्या सर्वे येन स नहिः । णह बंधने कर्मणि किरौणादिकः। 'तस्य वाक्तंती' इत्यादिश्रुतेः । पुनः परः पिपर्त्ति पालयति लोकान्कामैः पूरयति वेति परः। पृ पालनपूरणयोरतोऽच्। पुनः रसस्य शृंगारादेः पतिर्नाथः पुनः आसमंतादियर्तीत्यारिः सर्वगतः। ऋ गतावतो धातोरिरौणादिकः। च पुनः यो रसस्य शृंगारस्य वासो यस्मिंस्तं रासं रासमंडलमातत व्यस्तारीत्। अत्र चेति शेषः। तनुधातुर्विस्तार एव। किंभूतं परनृतं निद्रावशेन आ ईषत् निरवसं सदोषमप्रियमित्यर्थः । यश्च हरिः यवान् शीलंते धारयंतीति यवशा मुनयस्तदर्थं शरीरमातत धृतवान्।अत्र तनुर्धारणे ज्ञेयः। सप्तमी तु निमित्ते।यवोपपदाच्छीलेर्डः प्रत्ययः।मुनीनां कल्याणार्थमेव श्रीकृष्णरूपं धृतवानिति भावः। किंभूतं शरीरं सम्यक् शेरते प्रलये सर्वे लोका यस्मिंस्तत् संशयम्। शेतेरच् ॥ 'यस्मिंश्च प्रलयं यांति' इतिस्मृतेः ॥ १ ॥

अस्य ग्रंथस्य संपाठात्सर्वशास्त्रस्य निश्चितम् ॥
अनायासेन ज्ञायेत ततो ज्ञेयः प्रयत्नतः ॥ १ ॥
अस्य ज्ञानं विना कथं वाच्यो विज्ञोयामिति।
मातृकार्थापरिज्ञानान्न मानं लभतेतराम् ॥
इति विज्ञाय कृतवानिमं वंशीधरः कृती ॥ २ ॥
नाभिकंजाभिधपुरे गोकुलेन्द्रनिशान्तके ॥
राज्ये वज्रमृगेन्द्रस्य प्रीतये गोपिकापतेः ॥ ३ ॥

समाप्तोऽयं मातृकाविलासः।

पुस्तक मिलेनका ठिकाना-

ह्यंते
णा
ठ्य-
पुनः
तः।
स्य
षः।
वसं
शा
तु
कृ-
सर्वे
ति'

श्रीमहाभारत सटीक मोटे अक्षरका।

श्रीः।

व्याकरणग्रंथोंकी सूचना।

व्याकरणमहाभाष्यम् कैय्यटकृतभाष्यप्रदीपसहित और वा
शास्त्रिकृतटिप्पणीसमेत किंमत १२ रुपये. कारकसमासतद्धि
दिक् क्रियाकलापः आख्यातचन्द्रिकाधातुरूपभेदः श्लोकयोजनि
पायः की० ६ आना समासकुवलयाकर नियमोंके साथ उदाः
की० ४ आना सारस्वतसटीक प्रसादटीका की० १२ अ
सारस्वतमूल पूर्वार्द्धजिल्द टाईपका की० ८ आना सारस्वत त
वृत्ति की० १२ आना सारस्वतचंद्रकीर्तिटीकासह परसोत्तम
१। रु० कारकवादार्थशब्दबोध व्याकरणन्याय किं० २

सिद्धांतकौमुदी अष्टाध्यायी, गणपा० धातुपा० लिंगानुः
पा० और सूत्रसूचीस० अक्षर मोठा की० ४ रु० सिद्धांतक
अतिउत्तम और बारीक टैपमें छप रहीहै की० २ रु० अ
यी, गणपाठ, धातुपाठ, लिंगानुशासन की० १ रु० लघुां
कौमुदी टिप्पण सहित जिल्द मोठे अक्षर की० १२ आ०
सिद्धांतकौमुदी टिप्पणस० ग्लेज छोटा कि० ४ आ०

पुस्तक मिलनेका ठिकाना–

खेमराज श्रीकृष्णदास.

" श्रीवेंकटेश्वर " छापाखाना–

ं के
ादि
नू
यमें
ल्द

न्तु
एव
क-
ती
क्खे
एक

तकैं